सम्मुखी नाम सायाह्नव्यापिनी सर्वथा। ब्रह्मवैवर्तेपि। रंभाख्यां वर्जयित्वैकां तृतीयां द्विजसत्तम। अन्ये
शुभकार्ये बुगणापुत्र्यः प्रशस्यते इति गणोश्चतुर्थी।। भाद्रकृष्णतृतीयायां विशालाक्षीयात्रोक्ता काशी
खंडे।। भाद्रकृष्णतृतीयायामुपवासपरैर्नरैः। कृत्वा जागरणं रात्रौ विशालाक्षीसमीपत इति। अ
त्र रात्रिव्यापिनी ग्राह्या। रात्रौ जागरणविधानात्। भाद्रशुक्लतृतीया हरितालिकोच्यते। सा मुहूर्तमात्रा
पि परयुता ग्राह्या। तदाह माधवः। मुहूर्तमात्रसत्वेपि दिने गौरीव्रतं परे। शुद्धाधिकायामप्येवं गणयोग समय०
प्रशंसनादिति। चतुर्थीयुक्तायां तु फलाधिक्यमाह माधवीये आपस्तंबः। चतुर्थीसहिता यातु सा तृतीया फल २४

---

प्रदा। अवैधव्यकरी स्त्रीणां पुत्रपौत्रप्रवर्द्धिनी।। द्वितीयायोगमप्यवाप्याह स एव। द्वितीयाशेषसंयुक्तां
या करोति विमोहिता। सा वैधव्यमवाप्नोति प्रवदंति मनीषिण इति।। आश्विनकृष्णतृतीयायां ललिता
देव्या यात्रोक्ता काशीखंडे। इषकृष्णतृतीयायां ललितां प्रतिपूज्य वै।। नारी वा पुरुषो वापि लभते वां
छितं फलमिति तृतीयानिर्णयः।। ।। अथ चतुर्थी।। सा परविद्धा ग्राह्या।। युग्मभूतानामिति युग्मवाक्यात्
माधवीये बृहद्वसि ष्ठोपि।। एकादशी तथा षष्ठी अमावास्या चतुर्थिका।। उपोष्या परसंयुक्ताः परा
पूर्वेण संयुता इति ।सर्वासु चतुर्थीषु दुंढियात्रोक्ता काशीखंडे।। कुर्यान्मतिचतुर्थीह यात्रां विघ्नजितः
सदा।। व्रजरोपि लतुद्दिशाद्यावैमोदकामुदेति।। लैंगे। अंगारकचतुर्थ्यां यत्ता वानरवह्नि
नि। अभ्यर्च्य गा रकेशानं न पश्यंति न रास्तमाः। न तेषां ग्रहपीडा च कदाचित्क्वापि जायते।। नाग
चतुर्थी तु मध्या ह्नव्यापिनी परविद्धा ग्राह्या।। तदाह देवलः। युगं मध्यंदिने यत्र तत्रोपोष्य फणीश्वर
राना।। ही रे गां व्याप्य पंचम्यां पूजयेत्प्रयतो नर इति।। युगं चतुर्थी।। विनायकव्रते तृतीयायुते

Indira Gandhi National
Centre for the Arts

समय० व॥ तदुक्तं तत्रैव। चतुर्थी तु तृतीयायां महापुण्यफलप्रदा॥ कर्तव्या व्रतिभिर्वत्स गणनाथतुतोषणी॥
२५ ति अमांतमानेन। श्रावणकृष्णचतुर्थी संकष्टचतुर्थी उच्यते॥ सा चंद्रोदयव्यापिनी ग्राह्या। तदुक्तं
स्कांदे॥ श्रावणे बहुले पक्षे चतुर्थ्यां विधूदये। तस्मिन्दिने व्रतं कार्यं संकष्टाख्यं सुरेश्वरीति॥ दिन
द्वये चंद्रोदयसत्वे असत्वे वा पूर्वैव। मातृविद्धो गणेश्वर इति वचनात्॥ भाद्रकृष्णचतुर्थ्यां बहु
लाव्रतं। तत्र पूर्वैव। तदुक्तं गोविंदार्णवे पुराणसमुच्चये। गौरीचतुर्थी वटधेनुपूजा दुर्गो च नंदभ
रहोलिके च। वत्सस्य पूजा शिवरात्रिरेताः परान्विता घ्नंति नरं परस्य भूमिनि गोपोः गौरीव्रत
संबंधिनी चतुर्थी। वटसंबंधिनी पंचदशी। धेनुपूजा तत्संबंधिनी बहुला चतुर्थी। वत्सस्य पूजा वत्सद्वा
दशी। भाद्रशुक्लचतुर्थी वरदचतुर्थी सोच्यते॥ तच्च विष्णुपुराणांतरे। सुरासुराणां भवतीगणेशं
भक्तिपूर्वकं। तस्यां प्रदाहूं यस्मात्तस्माद्वरचतुर्थिकेति सा मध्याह्नव्यापिनी पूर्वविद्धा ग्राह्या। पूर्व समय०
दिने मध्याह्नव्याप्त्यभावे परैव॥ तदुक्तं माधवीये बृहस्पतिना॥ चतुर्थी गणनाथस्य मातृविद्धा प्रशस्य २५

ते॥ मध्याह्नव्यापिनी चेत्स्यात्परतश्चेत्परेहनीति॥ स्मृत्यंतरेपि। मातृविद्धा प्रशस्ता स्याच्चतुर्थी गणना
यके॥ मध्याह्ने परतश्चेत्स्यान्नागविद्धा प्रशस्यत इति॥ सिद्धिविनायकेपि मध्याह्नव्यापिनी ग्रा
ह्या। प्रातः शुक्लतिले स्नात्वा मध्याह्ने पूजयेन्नृप इति पूजायास्तत्कालत्वात्॥ उभयदिने मध्याह्न
व्याप्त्यभावे व्याप्तिसत्वे वा पूर्वैव॥ मातृविद्धा प्रशस्यत इति वाक्यात्। इयं च रविभौमाभ्यां पुण्यकामहती
मुच्यते। तदुक्तं गोविंदार्णवे वाराहे॥ भाद्रे शुक्लचतुर्थ्यां या भौमेनार्केण वा युता। महती सात्र वि
५ घ्नेशमार्च्य वांछितमभेन्नरः इति। अस्यां चंद्रं न पश्येत्॥ तदाह तत्रैव मार्कंडेयः भाद्रे मासि सिते पक्षे चतु
र्थी स्वातियोगिनी॥ मिथ्याभिशापं कुरुते दृष्ट्वेंदुं नात्र संशयः पराशरोपि॥ कन्यादित्ये चतुर्थ्यां तु शु
क्ले चंद्रस्य दर्शनं॥ मिथ्याभिदूषणं कुर्यात्तस्मात्पश्येन्न तं सदा॥ अत्र रात्रिग्रहणाद्दिवादर्शनेन दो
ष इति॥ रात्रावेव चंद्रप्राधान्यात्। तद्दोषशांत्यर्थं तत्रैव पुराणांतरे॥ ततश्चतुर्थ्यां श्रोतव्यं प्रमाद
द्वा समानतः। पठेत्पौराणिकं वाक्यं प्राङ्मुखो वाप्युदङ्मुखः सिंहः प्रसेनमवधीत्सिंहो जांबवता

Indira Gandhi National
Centre for the Arts

समय० व॥ तदुक्तं तत्रैव। चतुर्थी तु तृतीयायां महापापफलप्रदा॥ कर्तव्या व्रतिभिर्वत्स गणनाथसुतोषिणी
२५ ति। अमान्तमानेन। श्रावणकृष्णचतुर्थी संकष्टचतुर्थी उच्यते॥ सा चन्द्रोदयव्यापिनी ग्राह्या। तदुक्तं
स्कान्दे॥ श्रावणे बहुले पक्षे चतुर्थ्यां विधूदये। तस्मिन्दिने व्रतं कार्यं संकष्टाख्यं सुरेश्वरीति। दिन
द्वये चन्द्रोदयसत्त्वे असत्त्वे वा पूर्वैव। मातृविद्धा गणेशस्येति वचनात्॥ भाद्रकृष्णचतुर्थ्यां बहु
ला व्रतं। तत्र पूर्वैव। तदुक्तं गोविन्दार्णवे पुराणसमुच्चये। गौर्याश्चतुर्थी वटधेनुपूजा दुर्गा च नन्दभ
रहोत्तिके च। वत्सस्य पूजा शिवरात्रिरेताः पराह्निता घ्नन्ति नरस्य राष्ट्रमिति। गौर्याः गौरीव्रत
संबन्धिनी चतुर्थी। वटसंबन्धिनी पंचदशी। धेनुपूजा तत्संबन्धिनी बहुला चतुर्थी। वत्सस्य पूजा वत्सद्वा
दशी। भाद्रशुक्लचतुर्थी वरदचतुर्थी उच्यते॥ तत्तु विहितं पुराणान्तरे। सुरासुराणां वनीगणेशं
भक्तिपूर्वकं। तस्यां प्रदाहूर्यस्मात्तस्माद्वरचतुर्थिकेति सा मध्याह्नव्यापिनी पूर्वविद्धा ग्राह्या। पूर्वे रामः
दिने मध्याह्नव्याप्त्यभावे परैव। तदुक्तं माधवीये बृहस्पतिना॥ चतुर्थी गणनाथस्य मातृविद्धा प्रशस्य २५

ते॥ मध्याह्नव्यापिनी चेत्स्यात्परतश्चेत्परेऽहनीति॥ स्मृत्यन्तरेपि। मातृविद्धा प्रशस्ता स्याच्चतुर्थी गणना
यके॥ मध्याह्ने परतश्चेत्स्यान्नागविद्धा प्रशस्यत इति। सिद्धिविनायकेपि मध्याह्नव्यापिनी ग्रा
ह्या। प्रातः शुक्लतिले स्नात्वा मध्याह्ने पूजयेन्नृप इति पूजायास्तत्कालत्वात्॥ उभयदिने मध्याह्न
प्रभावे व्याप्तिसत्त्वे वा पूर्वैव॥ मातृविद्धा प्रशस्यत इति वाक्यात्। इयं च रविभौमवारयुक्ता महती
मुच्यते। तदुक्तं गोविन्दार्णवे वाराहे॥ भाद्रे शुक्लचतुर्थी या भौमेनार्केण वा युता। महती सात्र वि
घ्ने सार्च्येष्टं लभेन्नर इति। अस्यां चन्द्रं न पश्येत्॥ तदाह तत्रैव मार्कण्डेयः भाद्रमासि सिते पक्षे चतु
र्थी स्वातियोगिनी॥ मिथ्याभिशापं कुरुते दृष्टश्चेद्राजन् संशयः पराशरोपि॥ कन्यादित्ये चतुर्थ्यां तु शु
क्ले चन्द्रस्य दर्शनं॥ मिथ्याभिदूषणं कुर्यात्तस्मात्पश्येन्न तं सदा॥ अत्र रात्रिग्रहणाद्दिवा दर्शनेन दो
ष इति। रात्रावेव चन्द्रप्राधान्यात्। तद्दोषशान्त्यर्थं तत्रैव पुराणान्तरे॥ तनश्चतुर्थ्यां श्रीपो ममाद
द्वौ सममानवः। पठेत्पौराणिकं वाक्यं माशुचो वापुदमुखे सिंहः प्रसेनमवधीत्सिंहो जाम्बवता

Indira Gandhi National
Centre for the Arts

रामय० हनः सुकुमारकमारो दीप्तवत्से पःस्मर्मनकः इति। माघशुक्लचतुर्थी तिलचतुर्थी। तदुक्तं काशीखंडे।
२६ माघशुक्लचतुर्थ्यां तु नक्तव्रतपरायणाः। ये त्वां ढुंढे र्चयिष्यंति ते र्च्याः स्युरसुरद्रुहां॥ विधाय वार्षिकीं
यात्रां चतुर्थ्यां प्राप्य तापसी। शुक्लान् तिलान् गुडे बद्ध्वा माश्नीयान्नक्तुकान्नती॥ तापसी माघी॥ अत्र न
क्तग्रहणात् प्रदोषव्यापिनी ग्राह्येति दिक्॥ इति चतुर्थीनिर्णयः। अथ पंचमी॥ सा चतुर्थीयुतैव ग्रा
ह्या॥ युगभूतानामिति युग्मवचनात्॥ पंचमी सप्तमी चैव दशमी च त्रयोदशी॥ प्रतिपन्नवमी चै
व कर्तव्या संमुखी तिथिरिति पैठीनसिवचनाच्च संमुखी सायाह्नव्यापिनी॥ ब्रह्मवैवर्ते। प्रतिपत्पं
चमी भूतसावित्री वटपूर्णिमा। नवमी दशमी चैव नोपोष्याः परसंयुताः। माधवीये। पंचमी च तथा का
र्या चतुर्थीसहिता विभो। चैत्रादिमासगताः पंचम्यादयः कल्पादयः। तथा च मात्स्ये ब्रह्मणोक्ता
दिनस्यादिः कल्पादिः सप्त कीर्तिताः। वैशाखस्य तृतीया या कृष्णा फाल्गुनस्य च॥ पंचमी चैत्रमासस्य रामय०
तस्यैवांत्यातिथिः परा॥ शुक्ला त्रयोदशी माघे कार्तिकस्य तु सप्तमी॥ नवमी मार्गशीर्षस्य सप्तैताः सं २६

स्मराम्यहं॥ कल्पानामादयो ह्येता दत्तस्याक्षयकारकाः। तस्यैवांत्या चैत्रस्य वामावास्या। अत्रैताः शुक्लाः
पौर्वाह्णिकाः कृष्णास्त्वपराह्णिका इति युगादिवद्व्यवस्था। शुक्लपक्षे तिथिर्ग्राह्या यस्यामभ्युदितो रविः
कृष्णपक्षे तिथिर्ग्राह्या यस्यामस्तंगतो रविरिति वाक्यात्। अत्र पक्षविशेषानुपादाने शुक्लो ज्ञेयः
श्रावणशुक्ल पंचमी नागपंचमीत्युच्यते। सा परविद्धा ग्राह्या। तदुक्तं चमत्कारचिंतामणौ। पंचमी
नागपूजायां कार्या षष्ठीसमन्विता। तस्यां तु तुषिता नागा इतरा सचतुर्थिके नि मदनरत्ने स्मृत्यंतरे
पि॥ श्रावणे पंचमी शुक्ला संप्रोक्ता नागपंचमी। तां परित्यज्य पंचम्यः चतुर्थीसहिता हिताः इति॥
॥ अत्र यवमा त्रिमुहूर्ता कर्तव्येत्युक्तं काशीखंडे। पः स्नातो नागपंचम्यां कुंडे वासुकिसंज्ञके न तस्य
विषसंसर्गो भवेत्सर्पमेसुरद्रुहः। कर्तव्या नागपंचम्यां यात्रा वयोसु तच्चवै॥ नागाः प्रसन्ना जायंते कु
ले तस्याविसर्वदेति भविष्ये॥ श्रावणे मासि पंचम्यां शुक्लपक्षे नराधिप। द्वारस्योभयतो लेख्या गोमये
न विषोल्बणाः॥ पूजयेद्विधिवद्वीर दधिदूर्वांकुरैः कुशैः गंधपुष्पोपहारैश्च ब्राह्मणानां च तर्पणैः

Indira Gandhi National
Centre for the Arts

रा मय० येनस्यां पूजयन्तो हि नागान्भक्तिपुरःसराः॥ न तेषां सर्पतो वीर भयं भवति कुत्रचित्॥ इति॥ भाद्रशुक्लपंचमी
२७ ऋषिपंचमी सोच्यते॥ तदुक्तं ब्राह्मे॥ नभस्ये शुक्लपक्षे तु यदा भवति पंचमी॥ नद्यादिके तथा स्नात्वा
कृत्वा नियममेव च॥ ब्राह्मणी क्षत्रिया वैश्या शूद्रा वापि वरानने॥ कृत्वा नैमित्तिकं कर्म गत्वा निजगृहं पु
नः वेदिं सम्यक् प्रकुर्वीत गोमयेनोपलिप्य ताम्॥ रंगवल्लिसमायुक्तां नानापुष्पोपशोभिताम्॥ तत्र सप्त ऋ
षीन् दिव्यान् भक्तियुक्तान् समपूजयेत् इति॥ तत्र पंचमी मध्याह्नव्यापिनी ग्राह्या॥ पूजाव्रतेषु सर्वेषु मध्या
ह्नव्यापिनी तिथिरिति माधवीये हारीतोक्तेः॥ उभयदिने तद्व्याप्तावव्याप्तौ वा पूर्वा॥ युग्मवाक्यात्॥ आ
श्विनशुक्लपंचम्यां उपांगललिताव्रतम्॥ तत्प्रयोगो निबंधेष्वनुक्तः॥ तथाप्यतिप्रचारत्वान्निर्णीयते
॥ तत्र पंचमी मध्याह्नव्यापिनी ग्राह्या॥ तत्रैव पूजाविधानात्॥ माधवीये स्मृत्यंतरेपि॥ पूजाव्रतेषु स
र्वेषु मध्याह्नव्यापिनी तिथिरिति॥ मार्गशुक्लपंचम्यां नागपंचमी॥ उक्तं मार्गशिरे शुद्धा श्रावणे वापि रा प० 
च पंचमी॥ स्नानदानं बहुफला नागलोकप्रदायिनीति हेमाद्रौ स्कांदात्॥ इयमपि परयुतैव ग्राह्या॥ पंच २७

मी नागपूजायां कार्या षष्ठीसमन्विता इति पूर्वोक्तवचनात्॥ इति पंचमीनिर्णयः॥ अथ षष्ठी॥ सा तु सर्वे
षूपवासव्रतादिषु स्कंदव्रतातिरिक्तासु सप्तमीयुतैव ग्राह्या॥ षण्मुन्योरिति युग्मवाक्यात्॥ माधवीये स्कां
देपि॥ नागविद्धा न कर्तव्या षष्ठी चैव कदाचन॥ सप्तमीयुतैव ग्राह्या॥ षण्मुन्योरिति युग्मवाक्यात्॥ माधवी
ये स्कांदेपि सप्तमीसंयुता कार्या षष्ठी धर्मार्थवित्तकरी इति॥ अत्र पंचमीवेधः षण्मुहूर्तात्मको ज्ञेयः॥ ना
गो द्वादशनाडीभिर्दिक्पंचदशभिस्तथा इति वचनात्॥ तेन षण्मुहूर्तन्यूनपंचमीयोगे परदिने च सप्तमी
विद्धषष्ठ्यभावे पूर्वैव॥ अस्यामेव रविवासरयोगे लोलार्कयात्रोक्ता काशीखंडे कृतानि यानि पापानि
नरैः संवत्सरादपि नश्यंति तत्क्षणात्तानि षष्ठ्यां लोलार्कदर्शनात्॥ लोलो लोलार्कः वार्षिकयात्राप्यु
क्तात्रैव मार्गशीर्षे सप्तम्यां षष्ठ्यां वा रविवासरे विधाय वार्षिकीं यात्रां नरः पापात्प्रमु
च्यत इति॥ आषाढशुक्लषष्ठी स्कंदषष्ठीत्युच्यते॥ सा पंचमीयुता ग्राह्या॥ तदुक्तं स्कांदे॥ कृष्णाष्टमी
स्कंदषष्ठी शिवरात्रिश्चतुर्दशी॥ एताः पूर्वयुताः कार्याः तिथ्यंते पारणं भवेदिति भाद्रकृष्णषष्ठी योगवि
ति

Indira Gandhi National
Centre for the Arts

रामय०
२८

षे
शेणकपिलाषष्ठीसुच्यते॥ तदुक्तं पुराणसमुच्चये भाद्रे मास्यसितेपक्षे भानौ चैव करे स्थिते॥ पाते
कुजे च रोहिणी पाता षष्ठी कपिला भवेत्॥ संयोगे तु चतुर्णां तु निर्दिष्टा परमेष्ठिनेति। वाराहपुराणे
पि नभस्ये कृष्णपक्षे तु रोहिणीपातभूसुतैः॥ युक्ता षष्ठी पुराणज्ञैः कपिला परिकीर्त्तिता। व्रतोप
वासनियमैर्भास्करं तत्र पूजयेत्। कपिलां च द्विजाग्र्याय दत्वा क्रतुफलं लभेत्। व्रतं हेमाद्रौ स्कां
दे। मोष्टपघासितेपक्षे षष्ठी भौमेन संयुता। व्यतीपाते न रोहिण्या सा षष्ठी कपिला स्मृता। द्वितीया
नु महापुराणा व्रतिनां दुर्लभा क्वचित्। षष्ठी संवत्सरस्यान्ते सा युनक्ति नसंयुता॥ चैत्र वैशाखयोर्मध्ये
सितेपक्षे शुभोदये। वैशाखेपि च राजेंद्र द्वारवत्यां पराम्मतेति। मार्गशुक्लाचंपाषष्ठी॥ तस्यां खंडेरा
वाख्यमल्लारिपूजा ब्राह्मणभोजनादि मल्लारिमहात्म्ये दाक्षिणात्येषु प्रसिद्धं॥ अस्यां योगविशे
षस्तत्रैवोक्तः॥ मार्गभाद्रपदे शुक्ला षष्ठी वैधृतिसंयुता। रविवारेण संयुक्ता साचंपेतीह कीर्त्तितेति राम०
वैधृतियोगश्च भाद्रपदाभिप्रायेण। तथा मार्गशीर्षे मलेप तथष्ठा वारेशुभातिनःशततारणं तेच द २८

लिंगस्या दृष्टिगोचरमिति। लिंगदर्शनं कार्यमित्यर्थः। एवं च योगविशेषेण पूर्वा यवाव्याप्त्या॥ तदभावे सप्तम्या
युता कार्या। पूर्वोक्तसामान्यनिर्णयादिति दिक्॥ इति षष्ठीनिर्णयः॥ अथ सप्तमी॥ सा सर्वत्र पूर्वैव षण्मु
न्योरिति युग्मवचनात्॥ स्कांदेपि॥ षष्ठ्या युता सप्तमी च कर्त्तव्या तात सर्वदेति वैशाखशुक्लसप्तम्यां गंगा
पूजोक्ता ब्राह्मे। वैशाखशुक्लसप्तम्यां जह्नुना जाह्नवी स्वयं क्रोधात्पीता पुनस्त्यक्ता कर्णरंध्रात्तु दक्षि
णात्। तां तत्र पूजयेद्देवीं गंगां गगनमेखलामिति। अत्र पूर्वाह्णव्यापिनी ग्राह्या दिनद्वये साम्येन पू
र्वाह्णव्याप्त्या पूर्वा सामान्यनिर्णयात्। आश्विनशुक्लसप्तमी देवीपूजायां परयुता ग्राह्या। पुण्यघां
वर्षवृद्धिश्च सप्तम्यां पावतीमिथ्यारवेहृदयमी सतेन तामुतिथियुग्मतेनिमताय मार्त्तंडभविष्योक्तेः
। वर्षवृद्धिजन्मतिथिः। अत्रैव मूलेन तत्र पुस्तकस्थापनमुक्तं रुद्रयामले। मूलऋक्षे सुराधीश पूज
नीया सरस्वती। पूजयेन्मसहं देवपावदृश्यवमत्सरं॥ नाध्यापयेन्न च लिखेन्नाधीयीत कदाचन॥ पु
स्तके स्थापिते देवि विद्याकामो द्विजोत्तमः। सम्यहोपा। आश्विनस्यासितेपक्षे मेधाकामः सरस्वतीं मूलेना

Indira Gandhi National
Centre for the Arts

समय० वाहूये देवीं श्रवणेन विसर्जयेत्॥ माघशुक्लसप्तमी रथसप्तमी स्यात्॥ सारुणोदयव्यापिनी ला
२९ ना दीपः ग्राह्या॥ सूर्यग्रहणतुल्या तु शुक्ला माघस्य सप्तमी। अरुणोदयवेलायां तस्यां स्नानं महाफल
मिति चंद्रिकायां विष्णूक्तेः। अरुणोदयवेलायां शुक्ला माघस्य सप्तमी। प्रयागे यदि लभ्येत कोटि
सूर्यग्रहैः समेति स्मृत्यंतराच्च। दिनद्वये अरुणोदये चेत्पूर्वैव षष्ठीयुक्तायोरिति युग्मवाक्यात्। अत्र व ४
कृत्यं भविष्ये॥ सौवर्णे राजते ताम्रे भस्मालाबुमयेन वा। तैलेनैर्जि दतिव्यामहारजनरंजिताम्
माहितमना भूत्वा दत्वा शिरसि दीपकं। भास्करं हृदये ध्यात्वा इमं मंत्रमुदीरयेत्। नमस्ते रुद्ररूपा
य रसानां पतये नमः। वरुणाय नमस्तेस्तु हरिवास नमोस्तु ते। जले परिहरे दीपं ध्यात्वा संतर्प्य देव
ता इति। महारजनकं सुमं। परिहरेन्मुचेत्। काशीखंडे विशेषः। लोलार्के रथसप्तम्यां स्नात्वा गंगासि
संगमे॥ सप्तजन्मकृतैः पापैर्मुक्तो भवति तत्क्षणात् इति। इयं च षष्ठीरविवासरयोगे तिफलदा राम०
।षष्ठ्यां च सप्तमी योगो वारश्चेदंशुमालिनः। योगोयं पद्मको नाम सहस्रार्कग्रहैः सम इति स्मृतेः चंद्रो २९

यदाजन्मकृतं पापं मया सप्तसु जन्मसु। तन्मे रोगं च शोकं च मा
दयेगार्गोक्तः॥ अर्घ्यमंत्रश्च काशीखंडे सप्तसप्तिवहप्रीत सप्तलोकप्रदीपन। सप्तम्यासहितो देव
करी हंतु सप्तमीति अर्घ्यदानमंत्रोन्यत्र। सप्तमी सप्तसप्तिके सप्तव्याहृतिके दे
गृहाणार्घ्यं दिवाकरेति। ततः प्रार्थना। जननी सर्वलोकानां सप्तमी ... सा कृष्णा पूर्वा शुक्ला परा ग्राह्या॥ शु
वि नमस्ते रविमंडल इति॥ ॥ इति सप्तमीनिर्णयः॥ अथाष्टमी॥ पूर्वविद्धा न कर्तव्या कर्तव्या परसंयुतेति॥ कृष्णपक्षेष्टमी
क्लपक्षेष्टमी चैव शुक्लपक्षे चतुर्दशी॥ पूर्वविद्धा न कर्तव्या परविद्धा न कुत्रचित्। उपवासे पुराजे इत्यापधर्मः स्मृता
चैव कृष्णपक्षे चतुर्दशी॥ पूर्वविद्धैव कर्तव्या परविद्धा न कुत्रचित्। काशीखंडे अष्टम्यां च चतुर्दश्यां रविभूमिजवासरे॥
ननृत्य ति नेत्यमात्॥ सर्वास्वष्टमीषु भैरवयात्रा। काशीखंडे अष्टम्यां च चतुर्दश्यां भौमवारे विशेषतः। संप्र
यात्रां च भैरवीं कृत्वा नरः पापैः प्रमुच्यते इति॥ तत्रैव॥ अष्टम्यां च चतुर्दश्यां भौमवारे विशेषतः तत्र
दुर्गा मतत्तेकाश्यां दुर्गोति नाथ नामेति। चैत्रशुक्लाष्टम्यां विशेषस्तत्रैव चैत्राष्टम्यां महायात्रां भवानी मा का
रयेत्सुधीः। अष्टाधिकाः प्रकर्तव्याः शतकृत्वः प्रदक्षिणा इति॥ इयं च परयुता ग्राह्या। युग्मवचनात्॥ अ

समय० वर्णकृष्णाष्टमी द्वेधा। जन्माष्टमी जयन्ती च। तत्र केवला जन्माष्टमी। रोहिणीयुक्ता जयन्ती। तत्राद्योक्ता
३० स्कान्दे अष्टमी श्रावणे मासि कृष्णपक्षे यदा भवेत्॥ कृष्णजन्माष्टमी ज्ञेया महापातकनाशिनी। तिथि पु
राणान्तरेपि श्रावणे वहुले पक्षे कृष्णजन्माष्टमीव्रतं॥ रात्रियुक्तामकुर्वीत विशेषेणोडुसंयुता
मिति। जयन्ती तूक्ता वह्निपुराणे। कृष्णाष्टम्यां भवेद्यत्र कलैका रोहिणी यदि। जयन्ती नाम सा प्रोक्ता
उपोष्या सा प्रयत्नत इति। स्कान्देपि प्राजापत्येन संयुक्ता अष्टमी तु यदा भवेत्॥ श्रावणे बहुले
सा तु सर्वपापप्रणाशिनी॥ जयन्त्यां पूर्वचक्रुस्ते जयन्तीं तां विदुर्बुधा इति। पद्मपुराणे शिववाक्यं प्रण
वे तस्यैव स्वामिन्नष्टमीभेदनिर्णयं॥ श्रावणे कृष्णपक्षस्य घटिकाषष्टिर्यदा भवेत्। तदा जन्माष्ट
मी ख्याता लंघ्याणां सा प्रकीर्तिता। रोहिणी ऋक्षसंयुक्ता जयन्ती सा तु कथ्यते
। जयन्ती यदि लभ्येत तत्र पुण्यं न गण्यते इति। पाद्मे येन योनिगतानां च येन त्वं नाशितं नरैः। येः कृता समय०
श्रावणे मासि अष्टमी रोहिणीयुता॥ किं पुनर्बुधवारेण सोमेनापि विशेषत इति। तेन सोमवार इति ३०

केचित्। युक्तं तु चन्द्रोदयपर्यन्तं। अर्धरात्रे तु योगोयं तारापत्युदये सतीति विष्णुधर्मोत्तरे कमूलकल्पनालाघवा
त्। तत्र जन्माष्टमी नित्या। येन कुर्वन्ति ये नराः कृष्णजन्माष्टमीव्रतं। ते भवन्ति नराः प्राज्ञ व्याला व्याघ्राश्च
कानने इति स्कान्दे कृष्णकरणे च नित्यश्रुतेः श्रावणे बहुले पक्षे कृष्णजन्माष्टमीव्रतं। न करोति महा
प्राज्ञ व्यालीभवति कानने इति भविष्ये च। जयन्त्यपि नित्या काम्या च। तत्र नित्या स्कान्दे। शूद्रान्नेन तु
त्यापेशावहस्य भोजने। तत्फलं लभते कुन्ति जयन्तीविमुखो नरः। न करोति यदा विष्णोर्जयन्तीसंभवं
व्रतं। यमस्य वशमापन्नः सहते नारकीं व्यथां इत्यकरणे प्रत्यवायश्रवणात्। काम्या पुण्य स्कान्दे॥
महाजयार्थं कुरुतां जयन्तीं मुक्तये थवा॥ धर्ममर्थं च कामं च मोक्षं च मुनिपुंगव ददाति वांछितानर्थान्ये चान्ये
प्यतिदुर्लभा इति फलविशेषश्रवणात्॥ अस्मिंश्च व्रते उपवासः पूजा चेत्युभयं प्रधानं। जन्माष्ट
मीदिने प्राप्ते येन भुक्तं द्विजोत्तम। त्रैलोक्यसंभवं पापं तेन भुक्तं न संशय इति स्कान्दात्। अर्धरात्रे तु रो
हिण्यां यदा कृष्णाष्टमी भवेत्। तस्यामभ्यर्चनं शौरेर्हन्ति पापं त्रिजन्मजं। सोपवासो हरेः पूजां कृत्वा त
त्र न सीदति। इति भविष्यपुराणाच्च फलसंबंधावगमादिति नव्याः। तन्न। चित्रेरिंद्र नैरयेत फलसंब

Indira Gandhi National
Centre for the Arts

समय० धान्यपोगभेदापत्तेः ननु पूर्वोदाहृतेषु वाक्येषु योगख्यापरिजिहीर्षया केवलं फलसंबंधएवंक्लिपने। श्रा
३१ वणे बहुले पक्षे कृष्णजन्माष्टमीव्रतं न करोति नरो यस्तु भवति क्रूरराक्षसः इत्यादिषु कालविधायकेषु
३ षु भविष्यत्पुराणादिवचनेषु कृष्णजन्माष्टमीव्रतशब्देनोभयोरुपादानात् तद्दर्शपूर्णमासराजसूयादिव
त्प्रयोगैक्यमिति चेन्न। प्रातिस्विककर्मवाक्यैः पृथक्फलसंबंधउत्पत्तिश्चित्रादिवत्। परस्परनैरपेक्ष्येणो
त्पत्तिकर्तव्यतायाअप्यन्वयात् भिन्नएव प्रयोगविधिः कल्प्यते। एवं चैकशब्दोपादानमपि यदश्वाप्रश्रु
नासोमेनेत्यादिवत्रविरुद्धेन। यत्तु घटकप्रयोगनैति चेन्न। अनेन रात्रकृतव्रतानुष्ठानपद्धतौए
कप्रयोगलेखनेविरोधात्। तस्मात्सोपवासो हरेः पूजाप्रियत्वेन नरो यस्तु मासिमाद्रपदेष्टम्यां कृष्ण
पक्षेर्द्धरात्रके। शशांके वृषराशिस्थे ऋक्षे रोहिणिसंज्ञके। योगोऽस्मिन्वसुदेवाद्धि देवकी मामजी
जनत्। तस्मात्मां पूजयेत्तत्र शुचिः सम्यगुपोषितः इत्यादावुपवासस्य गुणत्वप्रतीतेः सदंतोधावर्ती
त्यादिवत्फलिसंस्कारः पूजैव प्रधानं। एवं चोपवासस्य पारार्थ्यं निर्णीते पललद्धाक्यसंप्रलोन्ह्वेखःसकेव रामप०
लं स्नावकएवपर्णतादिवत्। अंगफलश्रुतिरर्थवादः इति न्यायात्। ननु वासुदेवं समभ्यर्च्य सर्वपा ३१

पप्रशांतये ह्युपवासं करिष्यामि कृष्णाष्टम्यां नभस्यहं। अद्य कृष्णाष्टमीं देवीं नभश्चंद्रसरोहिणीं। अर्च
यित्वोपवासेन भोक्ष्येहमपरेहनि इति भविष्यदुक्तेः संकल्पवाक्ये उपवासस्य कर्तव्यत्वेनोल्लेखात् सापिप्र
धानमिति चेन्न। आगत्वेष्युपवासस्य क्रियाक्रियासंबंधिनं वा प्रकाशयन्मंत्रः करणत्वं भजतइति न्या
यात् क्रियासंबंध्युपवासप्रकाशकत्वेनापि मंत्रस्य करणत्वोपपत्तेः उपवासेनेत्युपलक्षणे तृतीया
। उपवासस्य पूजाकरणत्वासंभवात्। ननु पूर्वोदाहृतयोः पूजाफलसंबंधबोधकवाक्ययोरकरणानि
दार्थवादादेरभावात्कथं व्रतस्य नित्यत्वं ह्येषु इति चेन्न। उक्तपत्यापूजाया एव फलसंबंधे पूर्वोदाहृते
षु श्रावणे बहुले पक्षे इत्यादिवाक्येषु कृष्णजन्माष्टमीव्रतशब्देन पूजापायग्रहणात् तथोक्तोऽकरणानि
दार्थवादश्रवणान्नित्यत्वं ह्येषु इति। तस्मादुपवासोंगं पूजैवतु प्रधानं। अस्याश्च पूजायाः काल उक्तो
विष्णुधर्मोत्तरे। रोहिणीसहितो कृष्णा मासि भाद्रपदेष्टमी। सप्तम्यामर्द्धरात्राधः कलयापि यदा भवेत्
। तत्र जातो जगन्नाथः कौस्तुभी हरिरीश्वरः। तमेवोपवसेत्कालं तत्र कुर्याच्च जागरं। अर्द्धरात्रेतु योगो

Indira Gandhi National
Centre for the Arts

समय० पंतारापत्युदयेतथा॥ नियतात्मा शुचिः स्नातः पूजां तत्र प्रवर्तयेदिति॥ वसिष्ठस्तु सप्तम्यष्टमी तत्र समुख्य
३२ कालत्वमाह॥ अष्टमी रोहिणी युक्ता निश्यर्धे दृश्यते यदि। मुख्यकालः स विज्ञेयः सप्तम्यां जातो हरिः
स्वयमिति॥ मुख्यस्य प्रधानस्य कालो मुख्यकालः। अत्र केवलाष्टमी चतुर्धा। पूर्वेद्युरेव निशीथव्याप्ति
नी परेद्युरेवोभयेद्युर्नोभयेद्युश्चेति॥ तत्र प्रथमद्वितीययोस्त्वयोः कर्मकालव्यापित्वेनासंदिग्धैवात्र
सयोरपि पक्षयोः प्रातःसंकल्पकालेसत्वादाधिक्याच्चपरैव। व्रतं चैव वर्ज्यत्वा॥ वर्जनीया प्रयत्नेन स
सप्तमीसंयुताष्टमीति। रोहिणीयुतापि चतुर्धा। पूर्वेद्युरेव निशीथयोगवती। परेद्युरेव तादृशी। उभ
ये द्युर्नोभयेद्युश्चेति॥ तत्र पूर्वेद्युर्निशीथयुता पूर्वैव कार्या विद्धापि सप्तम्या रोहिण्या सहिताष्टमी
तिथा प्रोक्ता। सप्तमीसंयुताष्टम्यां निशीथे रोहिणी यदि। भविता सा ष्टमी पुण्या यावच्चंद्रदिवाकरावि
ति वह्निपुराणात्। जयंत्यां पूर्वविद्धायां उपवासं समाचरेदिति गारुडाच्च॥ भविष्येपि सुधमेत्तिरे समय०
चा रोहिण्या मर्धरात्रे च यदा कृष्णाष्टमी भवेत्॥ तस्यामभ्यर्चनं शौरेर्हंति पापं त्रिजन्मजं॥ प्राजाप ३२

सर्क्षसंयुक्तायां कृष्णानभसि चाष्टमी। सोपवासो हरेः पूजां कृत्वा तत्र न सीदति॥ अर्धरात्रे तु
योगोयं तारापत्युदये तथा। नियतात्मा शुचिः स्नातः पूजां तत्र प्रवर्तयेत्। रोहिणीसहिता कृ
ष्णा मासि च श्रावणेष्टमी॥ अर्धरात्रादधश्चोर्ध्वं कलयापि यदा भवेत्। तत्र जातो जगन्नाथः कौ
स्तुभी हरिरीश्वरः। तथा सप्तमी योगे तु रोहिण्या निशि योगजे। समजायत गोविंदो बलरूपी
चतुर्भुजः तस्मात्तं पूजयेत्तत्र निशीथे राजसत्तमेति॥ अवशिष्टेषु त्रिषु पक्षेषु परदिनएवव्रतं।
तदुक्तं ब्रह्मवैवर्ते वर्जनीया प्रयत्नेन सप्तमीसहिताष्टमी। सर्क्षापि न कर्तव्या सप्तमीसंयुता
ष्टमीति। स्कांदे। सप्तमीसहिताष्टम्यां भूत्वा ऋक्षं द्विजोत्तम। प्राजापत्यं द्वितीयेह्नि मुहूर्तार्द्धं भवेद्य
दि। तदाष्टयामिकं व्रतं प्रोक्तं आदिभिःपुरा। पाद्मे मुहूर्तेनापि संयुक्ता संपूर्णा साष्टमी भवेत्। किं
पुनर्नवमीयुक्ता कुलकोट्यास्तु मुक्तिदेति। यदा तु पूर्वेद्यू रोहिणीरहिता निशीथव्यापिनी परेद्यु
र्वि रोहिणीसहिता निशीथात्पूर्वं कदाचन तदा पूर्वैव ग्राह्या। कर्मकालशास्त्रस्य प्राबल्यात्सम

Indira Gandhi National
Centre for the Arts

समय० वैयर्थ्यप्रसिद्धत्वात्। रोहिणीयोगेतु माशस्यात्फलातिशयमात्रं न तु नस्यानिर्णयोपयोगिता। नवमीबुध
३३ - वारवृत्ता। अन्यथा प्रेतयोनिगतानां तु प्रेतत्वं नाशितं नरैः। यैः कृता श्रावणे मासि अष्टमीरोहि
णीयुता॥ किं पुनर्बुधवारेण सोमेनापि विशेषतः। किं पुनर्नवमीयुक्ता कुलकोट्यास्तु मुक्तिदेति पा
द्मवचसाप्यर्वेघुरर्द्धरात्रेवर्तमानाया रोहिणीमप्यष्टमी सत्वा बुधनवमीयुतापरैव कार्येति ये
न। यत्तु पुनर्नव्याः सत्यं कर्मकालशास्त्रं सर्वापेक्षया प्रबलं तथापि यस्मिन्नन्ते परे वचसा त्ये ते
वं विधनप्रातिस्विकेन शास्त्रेण वाध्यते अनएव विष्णुरहस्ये। प्राजापत्यर्क्षसंयुक्ता कृष्णानभसि
चाष्टमी॥ मुहूर्त्तमपि लभ्येत सोपोष्या सा महाफलेति॥ वह्निपुराणेपि॥ कृष्णाष्टम्यां भवेद्यत्र कले
कारोहिणी स्मृता। जयंती नाम सा प्रोक्ता उपोष्या व प्रयत्नतः स्कांदे। उदये चाष्टमी किंचिन्नवमी सक
लायदि॥ भवेत्तु बुधसंयुक्ता प्राजापत्यर्क्षसंयुता॥ अपि वर्षशतेनापि लभ्यते यदि वा न वेति। ब्रह्मवैव रामं४
र्त्ते। दिवा वा यदि वा रात्रौ नास्ति चेद्रोहिणीकला। रात्रियुक्तां प्रकुर्वीत विशेषेणेंदुसंयुतामिति - ३३

(प्रे)मान्तु कृष्णाष्टमी द्वेधा। जन्माष्टमी जयंती च॥ तत्र केवला जन्माष्टमी। रोहिणीयुक्ता जयंती। तत्राद्या
स्कांदे अष्टमी श्रावणे मासि कृष्णपक्षे प्रदा भवेत्॥ कृष्णजन्माष्टमी ज्ञेया महापातकनाशिनी। भवि
ष्यपुराणांतरेपि। श्रावणे वहुले पक्षे कृष्णजन्माष्टमी व्रतं॥ रात्रियुक्तां प्रकुर्वीत विशेषेणेंदुसंयुता
मिति। जयंती तूक्ता वह्निपुराणे। कृष्णाष्टम्यां भवेद्यत्र कलैका रोहिणी यदि। जयंती नाम सा प्रोक्ता
उपोष्या सा प्रयत्नत इति। स्कांदेपि प्राजापत्येन संयुक्ता अष्टमी तु यदा भवेत्॥ श्रावणे वहुले सा तु
सर्वपापप्रणाशिनी॥ जयं पुण्यं च कुरुते जयंती तां विदुर्बुधा इति। शिवपुराणे शिववाक्ये प्यशुचे
र्ष्वमुख सामिन्द्राष्टमी भेदनिर्णयः। श्रावणे कृष्णपक्षस्य घटिषष्टिर्यदा भवेत्। तदा जन्माष्टमी रव्या
तास्तद्भू। प्रातिस्विकशास्त्रस्य कर्मकालशास्त्रापेक्षया प्राबल्यं माधवाचार्यादिभिर्व्यवस्थापितमेवमा
ऊः तदयिन। न देवहि प्रातिस्विकशास्त्रं कर्मकालबाध कं पदनन्यथासिद्धं भवति॥ संभवति त्वस्य मा
धा स्योर्थः तथा हि॥ यत्तावद्धुसर्ववर्णोयतत्रेंदुसंयुतामित्यस्मो मेनायविशेषतरदंसने न कमूलक

समय० स्मनाला घवलिप्तया सोमवारपरत्वात्रास्यदिवावच्छेदेन रात्र्यवच्छेदेन वा रोहिणीकलायोगा
३४ भावे निशीथव्यापिनी ग्राह्येत्ययमर्थः निशीथगामकत्वाभावात्। किंतु सोमवारयुक्ता विशे
षेणाधिक्येन रात्रियुक्ता ग्राह्येति। एवं चोभयदिने निशीथस्पर्शाभावे सोमवाराधिकरात्रिव्याप्तेर्नि
र्णायकत्वमुक्तं भवति। पद्मे॥ इंदुसंयुतामित्यस्य निशीथपरत्वेपि रात्रिपदेनैवाधिकरात्रिल
क्षयित्वा ऽहोरात्रावच्छेदेन कलयापि रोहिणीयोगाभावेऽधिकरात्रिव्यापिनीं कुर्वीतेत्युक्तावि
शेषेणोक्तादिनानदयोघते॥ मत्स्ये रोहिणी [illegible] इंदुसंयुते व ग्राह्येति। अत्र पवा निशीथस्पृ
हूर्त्तमात्रात्मकत्वादुभयदिने चैव [illegible] निशीथस्पर्शो [illegible] रोहिणीयोगाभावे च विशेषेणा
धिके इंदुसंयुक्ता निशीथगा ग्राह्या। अधिकनिशीथव्यापिनीं निरावर्त्य रोहिणीयोगे त्वधिकनि
शीथव्यापिनीमपि विहाय स्वल्पनिशीथयोगिनीं रोहिणीयुक्तामेव कुर्वीतेति। पद्मे [illegible] उदये चा ग्रं० ३४
ष्टमी किंचिदित्यत्रापि पदपशाहस्य तारापक्षदयेसतीत्याघेकमूलकल्पनाला घवलिप्त यां च

ष्टेदयपरतैवांगीकार्या। न सूर्योदयपरता॥ यदि त्वेवं न व्याख्यायते ततो यथाश्रुतवाक्यबलाद्यदा पूर्वे
द्युर्निशीथेऽष्टमीमात्रसत्त्वमुत्तरेद्युश्च निशीथस्पर्शिन्यष्टमी रोहिणीयुक्ता च सती यदा बुधयुक्ता (१२
न देवोत्तरा स्यात्तत्र तु न द्वाभावे। यावद्वचनं वाचनिकमिति न्यायात्॥ यदि तु बुधाभावेपि रोहिणीमा
त्रवशादेवोत्तरो ग्राह्यते तदा रोहिणीयोगाभावेपि बुधमात्रस्य सद्भावादुत्तरा स्यात्। अन्यतरापायेप्यत
द्वचनप्रवृत्तेः स्वीकारात्। [illegible] योगवद्वारयोगस्यापि प्राशस्त्यहेतुत्वाच्च॥ अतो द्विजरत्नीयापत्ति
:किंच यथा पूर्वेद्युर्निशीथेऽष्टमीमात्रसत्त्वे उत्तरेद्युश्च निशीथास्पर्शे तत्र योगो बुधसत्त्वे चेत इवना
उत्तरेद्युर्व्रतं एवं पूर्वेद्युर्निशीथेऽष्टमीमात्रे बुधाधिक्यादुत्तरा [illegible] यापत्तिः प्रपंचिता चैतद्वचो [illegible] ख्या दुर्लभ [illegible]
नेतन्निर्णये गुरुभिः पञ्चविंशु रहस्य [illegible] दीपवत् [illegible] ग्रन्थेनात्र मुहूर्त्तपदं निशीथात्मकमुहूर्त्त
परं कलापदं तत्तूर्त्ति कलापरमिति न विरोधः। वस्तुतस्त्वेतद्वाक्यद्वयमुभयदिने निशीथेऽष्टमीव्याप्तौ वृद्ध्या
प्तावेकदेशव्याप्तौ वा साम्ये वा [illegible] कर्मकालव्याप्ति बाधकं तस्मात्कर्मकालशास्त्राबाधात् [illegible]

Indira Gandhi National
Centre for the Arts

रामय० ३५ त्या। यदि तु जयंती व्रतं जन्माष्टमीव्रतान्भिन्नं तदा तद्भवतु परेहनि न तु जन्माष्टमीव्रतं। यत्तु माधवाचार्यैर्ज
यंती व्रतं जन्माष्टमीव्रतस्य प्रसंगसिद्धिरभ्यधापि तन्न। कालभेदात्॥ योपि च तैरेव नामभेदात्त्रिमि
त्तभेदाद्रूपभेदाच्छुद्धमिश्रत्वभेदान्निर्देशभेदाच्च कर्मभेद उक्तः सोप्ययुक्तः कर्मनामधेयभेदे हि
स्यात्कर्मभेदः न त्वत्र जयंतीशब्दः कर्मनाम किंतु रोहिणीसहिताया अष्टम्याः रोहिणीचयदा
कृष्णपक्षेष्टम्यां हि जोजम ॥ जयंती नाम सा प्रोक्ता सर्वपापहरा तिथिरिति विष्णुधर्मोत्तरात्॥ य
दपि हि रूपभेदादित्युक्तं तत्र रूपशब्देन धात्वर्थभेदो गुणभेदो वाभिप्रेतः नाद्यः कर्मभेदसाधकत्वाऽ
भिप्रायाधिकरणीयन्यायासंगतेः न द्वितीयः अधिकरणोधात्वर्थभेदाभ्देदः सिध्यति॥ नांत्यः उत्पत्तिशि
ष्टस्य गुणस्य वाक्यांतरस्थ्रवणात्। निमित्तभेदस्तु शुद्धमिश्रत्वभेदनिर्देशभेदानां तु कर्मभेदकत्वं न का
पि स्मृत्यादिते॥ ननु जन्माष्टमी जयंती च शिवरात्रिस्तथैव च। सर्वविद्धैव कर्तव्या तिथिभांते च पारणा रामय०
मिति भगुवाक्येऽ नन्यपरपुनः श्रवणालक्षणादप्याः सा देवभेद इति चेन्न। एतस्य वचसो जन्माष्ट ३५

मीमत्स्यादिजयंत्यनुवादेन पूर्वविद्धत्वगुणमात्रविधायकत्वेनाप्युपपत्तेः अथ पूर्वोदाहृते पुवाक्ये
ष्वयवसेत्स्तूजयेद्वेसपर्यायधातुनिष्पन्नत्वात् रूपाच्छद्धांतरादेवभेदस्य नेन त्वशद्धांतरेणोपवास
प्रजयोर्भेदिपुयत्स्यपूजांगत्वस्य प्राकृस्थापितत्वेनन त्वांतरंगणकालानिरोपप्रयोजकत्वा। प्रकर
णांतराभेदइति चेन्न। उपलभ्यमानस्मृतिपुराणादिषु त्रसंनिधनुपलंभात् यदि स्यात्तदा किमि
तीमं राजमार्गं विहाय शुद्धमिश्रत्वादिकुमार्गो माधवाचार्यैराश्रीयेत। एवमपि स्वमात्रसाक्षिकत्वे
न प्रकरणांतराभेदस्य माश्रीयमाणोभवतु जयंती व्रतं परेहनि। जन्माष्टमीव्रते तु सत्सप्तम्युत्तरदिने नि
शीथव्यापिन्यास्त्वष्टम्या रोहिणीयोगे पूर्वदिने चाष्टकेवलापि निशीथयोगे पूर्वैव ग्राह्येति दिक् ॥ त्र
य जन्माष्टमीव्रतप्रयोगः व्रतपूर्वदिने दंतधावनं कृत्वोपवासदिने प्रातः सूर्यः सोमो यमः कालः सं
ध्ये भूतान्यहःक्षपाः पवनो दिक्पतिर्भूमिराकाशं खेचरा नराः ब्रह्मशासनमास्थाय कल्पध्वमिह संनि
धिमिति कृष्णोसफलयुक्तं जलपूर्णतामपात्रमादाय मासाद्युल्लिख्य मुक्तफलकामः पापक्षय

Indira Gandhi National
Centre for the Arts

मस· ३६

कामो वा कृष्णप्रीतये कृष्णजन्माष्टमीव्रतं करिष्ये। तथा वासुदेवं समुद्दिश्य सर्वपापप्रशांतये। उपवासं
करिष्यामि कृष्णाष्टम्यां नभस्य हं॥ अथ कृष्णाष्टमी देवी नभश्चंद्रसरोहिणी। अर्चयित्वोपवासेन
भोक्ष्येहमपरेहनि॥ एनसो मोक्षकामोस्मि यद्गोविंद त्रियोनिजं। तन्मे मुंचतु मां त्राहि पतितं शोक
सागरे। आजन्ममरणं यावद्यन्मया दुष्कृतं कृतं॥ तत्प्रणाशय गोविंद प्रसीद पुरुषोत्तम। ततः कृत्वा पा
त्रस्थजलं क्षिपेत् ततः कदलीस्तंभवासोभिरामपल्लवपुतसजलपूर्णकलशोद्दीपैः पुष्पमालाभिर्यु
नमगरुधूपितं अग्निखड्गकृष्णछागरक्षामणिहारन्यसमुसलादियुतं मातापेतं षष्ठ्या देव्याधिष्ठि
तं देवकाः स्तुतिवागहं विधाय तस्यासमंतात्पितृपितृमाकुसुमांजलीन् देवगंधर्वादीन् सुरकृष्णचर्मधरव
सुदेव देवकीनंदयशोदागर्गगोपीगोपान् कंसनियुक्तान् गोधेनुकुंजरान्यमुनांतं न्मध्ये कालियं
अन्यच्च तत्कालीनं गोकुलचरितं यथासंभवं लिखित्वा सूतिकागृहमध्ये प्रच्छदपटावृतं मंचकं स्थाप राम० 
यित्वा मध्याह्ने नद्यादिजलेन तिलैः स्नात्वा ... रात्रे सपरिवारः श्रीकृष्णपूजां करिष्ये इति संकल्प्य ... व ३६

ता।

नीराजनी ताम्रीयेच्च लीमन्मयी तथा। वा स्त्री मणिमयी चैव वर्णकैर्लिखिताथ सु ... न प्रतिमां
विधाय अग्न्युत्तारणं कृत्वा प्रतिमाकपोलौ स्पृष्ट्वा तद्देवतानां मूलमंत्रप्रणवादिचतुर्थ्यंतं नाम वा अ
स्मै देवत्वसंख्यायै स्वाहेति च मंत्रं पठन् प्राणप्रतिष्ठां कुर्यात्॥ अस्मात्स्वस्थानेन तद्देवतानाम आदौ गा
यद्भिः किंनराद्यैः सततपरिवृतो वेणुवीणानिनादैः शृंगारादर्शकुंतप्रवरकृतकरैः किंनरैः सेव्यमा
नः पर्यंके स्वास्तृते या मुदितततरमुखी पुत्रिणी सम्यगास्ते। सा देवी देवमाता जयति सुवदना देवकी दिव्य
रूपा। ति देवकीं मां चापि वालकृष्णं स पर्यंके स्तनपायिनं। श्रीवत्सवक्षसं शांतं नीलोत्पलदलच्छविं मि
मित्ति श्रीकृष्णं च ध्यात्वा॥ ॐ नमो देव्यै श्रियै इति श्रिया देवकीसहितं वसुदेवं। यशोदासहितं नंदं। श्री
कृष्णसहितं बलदेवं। चंडिकां चा नमोंतैर्नाममंत्रैः पूजयेत्॥ तत्र मंत्रा योगेश्वराय देवाय योगानां पत
ये विभो। योगोद्भवाय नित्याय गोविंदाय नमो नमः स्नानं। यज्ञेश्वराय देवाय तथा यज्ञोद्भवाय च॥ यज्ञा
नां पतये नाथ गोविंदाय नमो नमः पाद्यं। विश्वेश्वराय देवाय तथा विश्वोद्भवाय च। विश्वस्य पतये

Indira Gandhi National
Centre for the Arts

म.स०
३७

तुभ्यंगो   विंदायनमोनमः।नैवेद्यं।गारुडे तु।यत्तायपतेश्वराय यत्तपतये यत्तसंभवायगोविं
दायनमो   नमः।दत्तार्घ्यं।सर्वेषांयत्तपदानांस्थाने योगपदान्युक्त्वा यमेव मंत्रःस्यात्।विश्वायवि
श्वेश्वरायेत्याद्युक्त्वा नैवेद्यं।धर्माय धर्मेश्वरायेत्यादि।स्वासंनातिल होमे।विश्वायविश्वेश्वरायेत्यादिः
शयने।सोमाय सोमेश्वरायेत्यादिश्चंद्रपूजायामिति मंत्राउक्ताः।ततो गामघृतेनाश्नोवसोर्द्धाराः
घृचिदुदुघतेनेति।ततोजातकर्मनालछेदषष्ठीपूजानामकर्माणि स्वयेण कार्याणि।ततः
श्चंद्रोदये रोहिणीयुतं चंद्रस्पीडिलेप्रतिमायां वा नाममंत्रेण संपूज्य शंखे तोयं समादाय सपुष्प
कुशचंदनं।जानुभ्यां धरणीं गत्वा चंद्रायार्घ्यं निवेदयेत्। क्षीरोदार्णवसंभूत अत्रिनेत्रसमुद्भव गृ
हाणार्घ्यं शशांकेमं रोहिण्या सहितो मम।इति।ततो ज्योत्स्नापाः पतये तुभ्यं ज्योतिषां पतये नमः।नमस्ते रो
हिणीकांत सुधावास नमोस्तु ते।नमो मंडलदीपाय शिरोरत्नाय धूर्जटेः कलाभिर्वर्द्धमानाय नमश्चंद्र चारुदेवाय   राम ४ ३७
य चारवरतिप्रणामेत्॥ततः अनघं वामनं शौरिं वैकुंठं पुरुषोत्तमं।वासुदेवं हृषीकेशं माधवं मधुसू

---

दनं।वराहं पुंडरीकाक्षं नृसिंहं दैत्यसूदनं।दामोदरं पद्मनाभं केशवं गरुडध्वजं।गोविंदमच्युतं कृष्णमनंत
मपराजितं॥अधोक्षजं जगद्बीजं सर्गस्थित्यंतकारिणं।अनादिनिधनं विष्णुं त्रिलोकेशं त्रिविक्रमं॥नारा
यणं चतुर्बाहुं शंखचक्रगदाधरं।पीतांबरधरं नित्यं वनमालाविभूषितं।श्रीवत्सांकं जगत्सेतुं श्रीकृष्णं
श्रीधरं हरिं।शरणं तु प्रपद्येहं सर्वकामार्थसिद्धये।प्रणामामि सदा देवं वासुदेवं जगत्पतिमिति   मंत्रैः
प्रणम्य त्राहि मां सर्वलोकेश हरे संसारसागरात्॥त्राहि मां सर्वपापघ्न दुःखशोकार्णवात्प्रभो।सर्वलोके
श्वर त्राहि पतितं मां भवार्णवे॥देवकीनंदन श्रीश हरे संसारसागरात्॥त्राहि मां सर्वदुःखघ्न रोगशोका
र्णवाद्धरे॥दुर्गतांस्त्रायसे विष्णो ये स्मरंति सकृत्सकृत्॥सोहं देवातिदुर्वृत्तस्त्राहि मां शोकसागरात्॥पु
ष्कराक्ष निमग्नोहं मायाविज्ञानसागरे।त्राहि मां देवदेवेश त्वत्तो नान्योस्ति रक्षिता॥यद्बाल्ये यच्च कौमारे
यौवने यच्च वार्द्धके।तत्पुण्यं वृद्धिमाप्नोतु पापं हर हलायुध।इति मंत्रैः प्रार्थयेत्।ततः स्तोत्रपठनपुराणश्रवणा
दिना जागरणं कृत्वा द्वितीयेह्नि प्रातः कालीनं नित्यं कृत्वा पूर्ववद्देवं पूजयित्वा ब्राह्मणान्भोजयित्वा तेभ्यः सु

मस·
३८

वर्णाधेनुवस्त्रादिकं स्तोमेप्रीयतामिति दत्वा। यं देवं देवकी देवी वसुदेवादजीजनत्॥ भौमस्य ब्रह्मणो गुप्त्यै तस्मै
ब्रह्मात्मने नमः। सुजन्म वासुदेवाय गोब्राह्मणहिताय च॥ शांतिरस्तु शिवं चास्त्वित्युक्त्वा प्रतिमामुद्दि
श्य तां ब्राह्मणाय दत्वा पारणं कृत्वा व्रतं समापयेत्॥ सर्वाय सर्वेश्वराय सर्वपतये सर्वसंभवाय गोविंदा
य नमो नम इति पारणायां। भूताय भूतपतये भूतादिसमापने च मंत्रः उद्यापनमनुक्त्वात्त्वाप्तिस
वं यथोक्ततिथौ व्रतं कृत्वा परदिने पारणां कुर्यात्॥ ब्रह्मवैवर्त्ते॥ अष्टम्यामथ रोहिण्यां न कुर्यात्पार
णां क्वचित्। हन्यात्पुराकृतं कर्म उपवासार्जितं फलं। तिथिरष्टगुणं हंति नक्षत्रं च चतुर्गुणं। तस्मात्प्र
यत्नतः कुर्यात्तिथिभांते च पारणमिति। तत्र दिवसेऽभयांते पारणमिति मुख्यः कल्पः एकतरांत
स्त्वनुकल्पः तत्र यदि तिथिनक्षत्रयोरन्यतरस्य वा नो रात्रौ भवांतस्तदा तद्रात्रौ न कुर्यात्किंतु दिवैव।
सर्वेष्वेवोपवासेषु दिवा पारणमिष्यते॥ अन्यथा पुण्यहानिः स्यादृते धारणपारणामिति ब्रह्म एन
वैवर्त्ते निषेधात्। अन्यतिथ्यामो रात्रौ नाम सहस्रे जसो दिवा। नामहे पारणां कुर्वन्त्सानसीं गतिमश्नुते

इति गरुडपुराणाच्च॥ यत्तु केनचिदुक्तं तिथिनक्षत्रयोगादिना पारणस्यासंभवे रात्रावपि कार्यं तदुक्तं
माधवीये स्मृत्यंतरे। तिथ्यृक्षयोर्यदा छेदो नक्षत्रांतमथापि वा। अर्धरात्रेऽथवा कुर्यात्पारणं त्वपरेऽहनी
ति ब्रह्मांडपुराणेऽपि नरात्रौ पारणं कुर्यादृते वै रोहिणीव्रतात्। अत्र निश्यपि तत्कुर्याद्वर्जयित्वा म
हानिशामिति। पूर्वोदाहृतं तु सामान्यवाक्यं हृयं जन्माष्टमीपारणातिरिक्तपारणपरमिति न त्वाब्र
ह्मांडीयवचनेनापवाद पिशाच ब्रवणादपि वेदांतगं रणमिति वक्तव्यार्थत्यागो नोभयांतादरः प्रतीयते ए न्यरा·
वं च स्तुत्यर्थत्वे संभवति न सामान्यवचनबाधकत्वमेतस्योपपद्यते। यदपि तिथ्यृक्षयोरिति वचनं। ६
तत्राप्येकं पदमेकत्रान्वितमन्यत्र विना बलवदनुपपत्त्या नान्वेतीत्यपार्धरात्रे यदोभयांतस्त
दा वचनांतरबोधिते दिन एव पारणं कुर्यात्त्वर्धरात्रे पारणमित्येवंपरं न्यायश्चायं तन्त्रीये सिद्धः
यथा च ममम न्यांश्च मम पांश्च मसिनो भक्ष्य पंतीत्यत्र यजनस्य हारियोजनस्य सर्वेष्वलिप्संनहस्तत्र चम
सिपदस्य हारियोजनान्वयानभ्युपगमात्। किंच त्वयापि च परेऽहनीत्यस्याविवक्षांगीकृत्यैतदेवात्र

Indira Gandhi National
Centre for the Arts

मस.
३८

व्याप्तौ यदि नेपारणाय तिः यदप्यत्र माधवेनोक्तं। अर्द्धरात्रशब्देन रात्रिमात्रं गत्यन्तरत्वादिति न
दधि मध्याह्नाभावे नैवापालंघविवक्षातदादिनस्यैव ग्रहणौचित्यात्। तस्मादस्मदुक्त एव
पक्षः श्रेयान्। तत्र शुक्लभ्याप्तेऽशुक्लस्वल्पनन्तरान्तेऽन्नस्त्वां नेवा। तिथ्यन्ते वान्ते वा त्रेवा ब्रतीकुर्वीत पा
रणमिति कालादर्शादिनिबंधवचनात्। उत्सर्वान्ते जागरा घुत्सर्वान्ते॥ भाद्रशुक्लाष्टमी दूर्वाष्टमी भवि
ष्ये। शुक्लाष्टमी तिथिर्या तु मासि भाद्रपदे भवेत्। दूर्वाष्टमी तु सा ज्ञेया नोत्तरा सा विधीयत इति॥ इ
यं च पूर्वविद्धा तदुक्तं बृहद्यमेन॥ श्रावणी दुर्गानवमी दूर्वा चैव हुताशनी। पूर्वविद्धा मकर्त्तव्या शि
वरात्रिर्वलेर्दिनमिति। अत्र च स्त्रीणामेवाधिकारो न पुंसां। या न पूजयते दूर्वां मोहादिह यथाविधि
जन्मानि त्रीणि वैधव्यं लभते नात्र संशयः तस्मात्संपूजनीया सा प्रतिवर्षं वधूजनैरिति। चंद्रप्रकाशे
पुराणसमुच्चये। करणीवेधवद्रूपानि ष्क्रतेः अतएव निर्णयामृतेऽपि दा। इदं चव्रतं भाद्रशुक्ले गस्तो राम
दयसंभावनायां भाद्रकृष्णाष्टम्यां कार्यं। शुक्ले भाद्रपदे मासि दूर्वासंज्ञा तथाष्टमी। सिंहार्के एव कर्त्तव्या ३८

---

न कन्यार्के कदाचन॥ सिंहस्थे चोत्तमा सूर्ये तु दिने मुनिसत्तम। रतिगोविंदार्णवे ह्यंदात्त्वत्र अगस्त्योदय का
लश्च दिवोदासीये तदेतिपाद्ये हरिसंक्रमाद्भवेरेकाधिके विंशतिमेन्ध गस्त्यः। अत्र कृत्समुत्क्रम
दनरत्ने भविष्यत्पुराणे। शुचौ देशे प्रजातायां दूर्वायां ह्यत्र णेत्र मान्स्यात्यलिंगंततो गंधैः पुष्पैर्धू
पैः समर्चयेत्। दध्यक्षतैर्द्विजश्रेष्ठ अर्घ्यं दत्वा फलैर्वने। दूर्वां शमीं च विधिवत्पूजयेच्छुद्धया पुत्रे
तत्र मंत्रः त्वं दूर्वेऽमृतजन्मासि वंदितासि सुरासुरैः। सौभाग्यं संततिं देहि सर्वकार्यकरी भव। यथा शाखा
प्रशाखाभिर्विस्तृतासि महीतले। तथा ममापि संतानं देहि त्वमजरामर। इति। भ सत्तिपमोऽपि भवि
ष्ये॥ अनग्निपक्वमश्नीयाद्दत्तं दधि फलं तथा॥ अक्षारलवणं वर्त्तं ब्रह्मचारी पानमधुनापुतमिति। इयं च
ज्येष्ठामूलयुक्तरोहिणी मुहूर्त्तव्यापिनी ग्राह्या॥ मुहूर्त्ते रोहिणी ज्येष्ठा यां पूर्वा वा परदिवा परा। दूर्वाष्टमी
तु सा कार्या ज्येष्ठामूलं च वर्जयेदिति पुराणसमुच्चयात्। दिनद्वये रोहिणी ज्येष्ठामूलयोगे न द्वयोर्वा
वा पूर्वैव श्रावणी दुर्गानवमीति पूर्वोक्तवाक्यात्॥ अत्रैव ज्येष्ठापूजनं लोके। कन्यार्के या ष्टमी शु

Indira Gandhi National
Centre for the Arts

मस०
४० क्ता ज्येष्ठर्क्षे महती स्मृता। अलक्ष्मीपरिहाराय ज्येष्ठां तत्र प्रपूजयेत्॥ तथा। मासि भाद्रपदे शुक्ले पक्षे ज्येष्ठ
र्क्षसंयुते॥ यस्मिन्कस्मिन्दिने कुर्याज्ज्येष्ठायाः परिपूजनमिति स्कांदोक्तेरियं ज्येष्ठायोगवशेनस्यात्॥
नक्षत्रयोगाभावे तु परैव। पूर्वेद्युरात्रौ नक्षत्रयोगे तु पूर्वैव। तथा च तत्रैव। नवमीसहिता कार्याष्ट
मी नात्र संशयः मासि भाद्रपदे शुक्ले पक्षे ज्येष्ठर्क्षसंयुते॥ रात्रिर्यस्मिन्दिने कुर्याज्ज्येष्ठायाः परिपूज
नमिति॥ तत्रैव। यस्मिन्दिने भवेज्ज्येष्ठा मध्याह्नादूर्ध्वमप्यणु। तस्मिन्हविष्यं पूजा च स्मृता चेत्स्मृ
र्वे वासर इति निर्णीतपूजादिनात्पूर्वदिने तु राधायामावाहनं उत्तरदिने मूले विसर्जनं। तथा च
स्कांदे। मैत्रेणावाहयेद्देवीं ज्येष्ठायां तु प्रपूजयेत्। मूले विसर्जयेद्देवीं त्रिदिनं व्रतमुत्तममिति महाल
क्ष्मीयात्राप्यस्यामेवोक्ता काशीखंडे। महालक्ष्म्याः समीपं प्राप्य तत्र यात्रा कृतान्नरैः। संपूजिते हविधि
वत्सम्प्रासप्तनमुंचनिरहति॥ व्रतवंतस्तु एतदारभ्याश्विनकृष्णाष्टमीपर्यंतं षोडशदिनानि महालक्ष्म्या राम०
४० व्रतं कुर्युरिति शिष्टाः अत्र व्रतमुक्तं पुराणसमुच्चये॥ अश्वयोर्चेन भाद्रपदे सिताष्टमीमारभ्य कन्यामगते

सूर्ये॥ समापयेत्तत्र तिथौ च यावत्सूर्यस्य पूर्वार्द्धगतो भवत्याद्रति। कन्यामगते सिंहस्थे सूर्ये प्रारंभः युवताः
कन्यायाः पूर्वार्द्धे सूर्ये च स्थिते सति समाप्तिरित्यर्थः प्रथमारंभ एवायं नियमः षोडशवार्षिके तत्प्रयोग
गतद्वितीयादिवर्षे तु न नियमः एतच्च द्वादशत्रातिक्रमवर्तिन्यामष्टम्यां कार्यं। अर्द्धरात्रमतिक्रम्य वर्त्त
ते योजनातिथिः। तदा तस्यां तिथौ कार्यं महालक्ष्मीव्रतं सदेति चंद्रप्रकाशोक्तेस्तदेतरात्। समापनं तु य
स्यां स्पष्टम्यां तच्चंद्रोदयव्यापिन्यां कार्यं। चंद्रोदयव्रते चैवं तिथिर्या कालिकी स्मृतेत्युक्तेः॥ दिनद्वये
चंद्रोदयसत्वे असत्वे वा कृष्णपक्षे ष्टमी चेत्त्वादिवा व्याप्ता सैव वा परदिने चंद्रोदयोत्तरं त्रिमुहूर्त्ता चेत्प
रैव। तदुक्तं समुच्चये। पूर्वा वा परविद्धा वा ग्राह्या चंद्रोदये सदा। त्रिमुहूर्तापि सा पूज्या परतश्चोर्द्धगा
मिनीति॥ आश्विनशुक्लाष्टमी महाष्टमी सा च व्रते तथा च ब्रह्मपुराणे। तत्राष्टम्यां भद्रकाली दक्षयज्ञविना
शिनी। प्रादुर्भूता महाघोरा योगिनीकोटिभिर्वृता॥ तत्र आश्विनशुक्लपक्षे। अतोऽत्र पूजनीयासा तस्मि
न्नहनि मानवैरिति। इयं चाष्टमी नवमीयुक्ता ग्राह्या तथा च देवीपुराणे। हेमन्माबेधसंयुक्तायेः कृता

Indira Gandhi National Centre for the Arts

म.स.
४१

तुमहाष्टमी। पुत्रदारधनैर्हीनाभ्रमंती हपिशाचवदिति। मदनरत्ने स्मृतिसंग्रहेपि। शरन्महाष्टमीपूजा
नवमीसंयुतासदा। सप्तमीसंयुतानित्यं शोकसंतापकारिणी। जंभेनसप्तमीयुक्तापूजिताचमहाष्ट
मी। इंद्रेणनिहतोजंभस्त ... स्यांदानवपुंगवः तस्मात्सर्वप्र
यत्नेनसप्तमीसहिताष्टमी। वर्ज्जनीयाप्रयत्नेनमनुजैःशुभकांक्षिभिः सप्तमीकलयायत्रपरतश्चाष्टमीभ
वेत्। तेनशल्यमिदंप्रोक्तं पुत्रपौत्रक्षयप्रदं तथा। पुत्रान्हंतिपशून्हंति हंतिराष्ट्रं सराजकं।। हंतिजातान
जातांश्च सप्तमीसहिताष्टमी।। ब्रह्मवैवर्त्ते। शुक्लपक्षेष्टमीचैव शुक्लपक्षेचतुर्द्दशी।। पूर्वविद्धानक
र्त्तव्याकर्त्तव्यापरसंयुतेति। वसुरंध्रयोरितियुग्मवचनाच्च। अत्रत्रिमुहूर्त्तन्यूनापिसप्तमीवर्ज्जन
प्रयोजिकानत्रिमुहूर्त्तैव। तथाचपुराणे।। सप्तमीशल्यसंयुक्तावर्जनीयासदाष्टमी। स्तोकापि
सातिथिःपुण्यायस्यांसूर्योदयोभवेदिति। स्तोकाकलाकाष्ठा ... दिमात्रापीत्यर्थः इय ए५०
मेवभौमयुक्तातिप्रशस्ता। अष्टम्यामुदितेसूर्येदिनार्द्धेनवमीभवेत्। कुजवारेभवेत्तत्रपूज ४१

---

नीयाप्रयत्नतः इति मदनोक्तस्मृतिसंग्रहात्। नवमीयुक्तालाभेतु सप्तमीयुतैवकार्या। तत्रपुराणेएव सप्तम्यापि
पुताकार्यामूलनापिविशेषेण रत्नादीनिवचनानि पदानुनवमी। दिनेसूर्योदयोत्तरमष्टम्यास्त्रिमुहूर्त्त
व्यापित्वान्नवमीविद्धत्वेपिपरेद्युः क्षयवशान्नवमीसूर्योदयेत्रस्पृशति तदा तत्राष्टमीपूर्वविद्धैवका
र्यानपरा एवंह्युक्तं मदनरत्नादौ स्मृतिसंग्रहे। यदासूर्योदयेनष्टा नवमीवापरेहनि। तदाष्टमी
प्रकुर्वीन सप्तम्यासहितांनृपः दुर्गोत्सवेपि नत्वपरा यायोपत्रक्षयेयाति नराधिपः। पूर्वाष्टमींतदा
कुर्यादन्यथात्वशुभंभवेदिति नवरात्राशक्तौत्रिरात्राद्युक्तं देवीपुराणे नवरात्रव्रतेशक्तस्त्रिरात्रंचै
करात्रकं व्रतेचरन्निपोभक्त्यासर्वेसाप्राप्नुवन्ति वा ... नमिति केवला ष्टम्युपवासस्तुपुत्रवतानकार्यः
उपवासंमहाष्टम्यांपुत्रवान्नसमाचरेत्। यथातथावापूतात्मा व्रतीदेवींप्रपूजयेदिति कालिका
पुराणात्। मार्गशीर्षकृष्णाष्टम्यां काशीखंडे काशीवासनिर्विघ्नार्थं कालभैरवपूजोक्ता कृत्वाचवि
विधांपूजांमहासंभारविस्तरैः। नरोमार्गासिताष्टम्यां वार्षिकं विघ्नमुत्सृजेदिति। तत्रैवतीर्थे ...लोदके

Indira Gandhi National
Centre for the Arts

मस०
४२

स्नात्वा कृत्वा तर्पणमत्स्यरः विलोक्य कालराजानं निरयादुद्धरेत्पितॄनिति। उपोषणमप्युक्तमस्यामेव का
शीखंडे मार्गशीर्षासिताष्टम्यां कालभैरवसंनिधौ। उपोष्य जागरं कुर्यात्सर्वपापैः प्रमुच्यत इति। अत्रोपो
षणांगतया अर्घ्यदानमपि कार्यमिति शिवरहस्ये। अत्रोपवासजागरणयोः प्रधानयोरहोरात्रसाध्य
त्वेनाहोरात्रपूर्वविद्धा ग्राह्या। अहोरात्रव्रतेष्वेककर्मकालयोगतः तस्यामुभययोगिन्यामाचरे
त्तकृतं व्रतीतिस्मृतेः। यदातु पूर्वदिने सायाह्ने उत्तरे प्रदोषे तुल्यात्तदपि पूर्वैव रुद्रव्रतेषु सर्वेषु कर्तव्या न.
संमुखी तिथिरिति ब्रह्मवैवर्तात्। परंतु। क्वचिदुपोषणांगस्यांगभूतमर्घ्यदानमिति शिवरहस्यात् उपोषणा
मेव प्रधानं न जागरणमिति नतु छं। अर्घ्यदानस्योपोषणांगत्वेपि जागरणांगत्वाप्योगात्। यदपि मध्या
ह्ने संस्थिते रवावित्युपक्रम्य तदोग्ररूपादनवान्मतः श्रीकालभैरवः आविरासीत्ततो लोकान्भीषयन्न
खिलानपीति शिवरहस्ये मध्याह्ने कालभैरवाविर्भावात्तद्व्यापिनी ग्राह्येति कश्चित्। तदपि तुच्छं शिवरहस्ये राम४
मध्याह्नोत्तरं कृत्वा निवासेश्वरं सापुर्देवाविव्रतादिसाधनार्थ्यादिनाम्रूपः कर्मकलापमुक्ता भैरवाविर्भावं वा ४

त्क्वानुपदमेव सूर्योपस्तमुपागमादित्युक्तं तत्र मध्याह्ने परान्हे सायाह्ने वाविर्भावानिश्चयात्। अस्तु
वा मध्याह्ने आविर्भावस्तथापि तत्कालीनस्यास्यतायां मानाभावः न त्याविर्भावकालीना ग्राह्येति
वाक्यमस्ति किंचित्। जन्माष्टम्यादौ तु पूजाख्यकर्मकालत्वेन निशीथव्यापिनी ग्राह्येत्युक्तं। न जन्मका
लत्वेनेति संक्षेपः। माघकृष्णाष्टम्यां भीष्मतर्पणं श्राद्धं चोक्तं हेमाद्रौ पाद्मे माघे मासि सिताष्टम्यां स
तिलं भीष्मतर्पणं। श्राद्धं च ये नराः कुर्युस्ते स्युः संततिभागिन इति। तर्पणमंत्रस्तु भारते भीष्मः शां
तनवो वीरः सत्यवादी जितेंद्रियः आभिरद्भिरवाप्नोतु पुत्रपौत्रोचितां क्रियां। वैयाघ्रपाद्गोत्राय
सांकृत्यप्रवराय च। अपुत्राय ददाम्येतज्जलं भीष्माय वर्मणे॥ वसूनामवताराय शंतनोरात्मजाय च
॥ अर्घ्यं ददामि भीष्माय आबाल्यब्रह्मचारिणे इति। पाद्मे। ब्राह्मणाद्यास्ये वर्णा दद्युर्भीष्माय नो
जलं। संवत्सरकृतं तेषां पुण्यं नश्यति सत्तमेति। इदं च जीवत्पितृकोपि कुर्यात् न निषेधाभावात्॥ यत्तु
सपितुः पितृकृत्येष्वनाधिकारः कथं च नेति निषेधः स पित्र्यकर्मपर इति दिक्॥ ॥ इत्यष्टमी॥ ॥ अ

Indira Gandhi National
Centre for the Arts

मस०
४३ ष्य नवमी सा तु पूर्वा वसुरंध्रयोरिति युग्मवचनात्। ब्रह्मवैवर्तेपि। अष्टम्या नवमी विद्धा कर्तव्या फलकां ९२
क्षिभिः न कुर्यान्न वमीं तात दशम्यां तु कदाचनेति। चैत्रशुक्ला नवमी रामनवमी सा पूर्वविद्धा मध्या
ह्नव्यापिनी ग्राह्या। तदुक्तमगस्त्यसंहितायां। चैत्रशुद्धा तु नवमी पुनर्वसुयुता यदि सैव मध्याह्न
योगेन महापुण्यतमा भवेदिति॥ नवमी चाष्टमीविद्धा त्याज्या विष्णुपरायणैः उपोषणं नवम्यां वै
दशम्यां पारणं भवेदिति वचनाच्च। तत्रैव चैत्रमासे नवम्यां तु जातो रामः स्वयं हरिः पुनर्वस्वृक्षसंयु
क्ता सा तिथिः सर्वकामदा॥ श्रीरामनवमी प्रोक्ता कोटिसूर्यग्रहाधिका॥ तथा। केवलापि सदोपो
ष्या नवमी शब्दसंग्रहात्। तस्मात्सर्वात्मना सर्वैः कार्यं वै नवमीव्रतं। उपोषणं जागरणं पितृनुद्दि
श्य तर्पणं। तस्मिन्दिने तु कर्तव्यं ब्रह्मप्राप्तिमभीप्सुभिः अत्र पूर्वदिन एव मध्याह्नव्यापिनी चेत्पू
र्वा। दिनद्वये तद्व्याप्तौ तदव्याप्तौ वैकदेशसमव्याप्तौ च सनक्षत्रा चेत्पूर्वान्यथोत्तरेति। अष्टमीविद्धा नि राम०४
षेधादिति। तत्रैव। यस्तु रामनवम्यां तु भुंक्ते मोहाद्विमूढधीः कुंभीपाकेषु घोरेषु पच्यते नात्र संशय ४३

इत्यकरणे प्रत्यवायश्रुतेर्नित्यं फलश्रुतेश्च काम्यं रामनवमीव्रतं। यत्तु तद्भक्तानामेव नित्यमिति तत्र संकोचे
मानाभावात् जन्माष्टमी शिवरा आदिव्रतेष्वितथात्वापत्तेः। अथ व्रतपद्धतिः व्रतपूर्वदिने सायं दंतधा
वनं व्रतदिने च प्रातः सूर्यः सोमो यमः कालः संध्ये भूतान्यहः क्षपा पवनो दिक्पतिर्भूमिराकाशं खचरा न
राः ब्राह्मं शासनमास्थाय कल्पध्वमिह सन्निधिमिति उक्त्वा फलपुष्पाक्षतसहितं जलपूर्णं ताम्रपात्रं गृही
त्वा मासाद्युल्लिख्य णपक्षयकामो भुक्तिफलकामो वा श्रीरामचंद्रप्रीतये श्रीरामनवमीव्रतमहं करिष्ये। उ
पोष्येन नवमीं त्वद्य यामेष्वष्टसु राघव तेन प्रीतो भव त्वं भोः संसारात् त्राहि मां हरे इत्युक्त्वा पात्रस्थं जलं क्षिपे
त्। ततः शक्तितो हैमीं रामप्रतिमां कृत्वा प्रत्युत्तारणपूर्वकं केपोलौ स्पृष्ट्वा मूलमंत्रं प्रणवादिचतुर्थ्यंतं ना
म रामाय देवत्वसंख्या यैस्वाहेति च मंत्रं पठन्प्राणप्रतिष्ठां कुर्यात्॥ ततः कोमलांगं विशालाक्षमिंद्रनील
समप्रभं॥ दक्षिणांगे दशरथं पुत्रावेक्षणतत्परं। पृष्ठतो लक्ष्मणं देवं सच्छत्रं कनकप्रभं॥ पार्श्वे भर
तशत्रुघ्नौ तालवृंतकरावुभौ। अग्रे व्यग्रं हनूमंतं रामानुग्रहकांक्षिणं इति ध्यात्वा षट्कोणरामयंत्रे पूजये

Indira Gandhi National
Centre for the Arts

म स० ४४ न।। श्रीरामप्रतिमासमीपे षट्कोणमध्ये कोणेष्वाद्यं दशारं पंचपूजयेत् षट्कोणेषु रां हृदयाय नमः रीं शिर
से स्वाहा। रूं शिखायै वषट्। रैं कवचाय हुं। रौं नेत्रत्रयाय वौषट्। रः अस्त्राय फट् इति हृदयादीनि षट्का ष
कोणाद्बाह्ये अष्टदलकमले दलमूलेषु हनूमंतं सुग्रीवं भरतं विभीषणं लक्ष्मणं अंगदं शत्रुघ्नं जांबवंतं
दलमध्येषु धृष्टिं जयंतं विजयं सुराष्ट्रं राष्ट्रवर्द्धनम कोपं धर्मपालं सुमंत्रं च दलाग्रेषु इंद्रं आग्नेयं यमं नि
र्ऋतिं वरुणं वायुं कुबेरमीशानं चाष्टौ लोकपालानं तदग्रे वज्रं शक्तिं दंडं खड्गं पाशं अंकुशं गदां
शूलं चेति तेषामायुधानि च पूजयेत् ॥ श्रीरामपूजायां मूलमंत्रः वैदिको वा वेसवः प्रणवादिचतुर्थ्यं
तं नमोंतं नाम वा मंत्रः इंद्रोग्निश्च यमश्चैव नैर्ऋतो वरुणोनिलः कुबेर ईशोत्र ह्याहिदिक्पालाः स्थापयंतु
न इति स्थाने। रामस्य जननी चासि रामात्मकमिदं जगत्। अतस्त्वां पूजयाम्यद्य लोकमातर्नमोस्तु ते इति कौश
ल्यापूजायां। ॐ नमो दशरथायेति दशरथपूजायां इतरेषां मूलमंत्रः प्रणवादिचतुर्थ्यंतं नमोंत नामानि राम० ४५
वा। उच्चस्थे ग्रहपंचके सुरगुरौ सेंदौ नवम्यां तिथौ लग्ने कर्कटके पुनर्वसुदिने मेषं गते पूषणि। निर्दग्धुं नि

खिलाः पलाशसमिधो मध्याद्दयोधारणे राविर्भूतमभूतपूर्वविभवं यत्किंचिदेकं महस्तमि मध्यान्हे ज
न्मभाव ... नीवाद्यादिवादनं च पुष्पांजलेः पूर्वं। फलपुष्पाद्युसंपूर्णं गृहीत्वार्घं स्वमुत्तमं। अशोक
रक्तकुसुमैर्युक्तं चतुलसीदलैः दशाननवधार्थाय धर्मसंस्थापनाय च।। दानवानां विनाशाय दैत्या
नां निधनाय च। परित्राणाय साधूनां जातो रामः स्वयं हरिः। गृहाणार्घ्यं मया दत्तं भ्रातृभिः सहितोन
घेति मंत्रेणार्घ्यं दद्यात्। पुष्पांजलिं पुनर्दत्वा यामे यामे द्विजः पूजयन् विधिवद्भक्त्या दिवारात्रं न राम० ६
येद्बुध इति ततः स्तोत्रपाठपुराणश्रवणादिभी रात्रौ जागरणं कृत्वा द्वितीयेन्हि प्रातः काली नं
नित्यं कृत्वा पूर्वदेवं श्रीरामपरिवार देवतांश्च संपूज्य द्विजान् संभोज्य रामो मे प्रीयतामिति तेभ्यः सुव
र्णधेनुवस्त्रादि दत्वा प्रतिमामुपस्करान्वितां विप्राय दत्वा पारणं कृत्वा व्रतं समापयेत्। आश्विनशुक्लनव
मी महानवमी स्मृता। तदुक्तं व्रतापमार्तंडे लैंगे। दुर्गापूजानवमीमूलाद्युक्ता सत्रपान्विता। महती
कीर्तिता तस्यां दुर्गा महिषमर्दिनी। नित्या पूजयेद्दिनिशो यतत्रप्र वेविध्याराध्या प्रणमत् वस्मात्। वृहद्धर्मो

Indira Gandhi National
Centre for the Arts

मस॰ पि। अश्वयुक्तौ दुर्गानवमी हूयां चैव बहुताशनी। पूर्वविद्धा प्रकर्त्तव्या शिवरात्रिर्बलेर्दिनमिति। अस्यामेव
४५ दुर्गापूजनं होमबलिदानादि कार्यमिति राजमार्तंडे। नवम्यां च जपहोमं समाप्य विधिवद्बलिमिति
नवमीमपुक्तबलिदानेऽन्तरविद्ध्याख्या। नतु कंमदनरत्ने देवीपुराणे। सूर्योदये परं रिक्ता पूर्णाभ्या
दयगा यदि बलिदानं प्रकर्त्तव्यं तत्र देशः शुभावहः बलिदाने कृते षष्ठ्यां पुत्रभङ्गो भवेदिति। प्र
नितु दशमीविद्धनवमीनिषेधकानि तानि शुक्लाधिकनवमीविषयाणि ब्रह्मवैवर्त्तेपि। अत्राप
राह्निके काले बलिदानमशस्यते।। दशमीं वर्जयेत्तत्र नात्र कार्या विचारणेति। तेन नवम्यामुपक्र
म्य नवम्यामेव समापयेत्।। गौडनिबंधेप्येवं। केचिदष्टम्यामारभ्य नवम्यां समापयंति। तत्र मूलं
शिष्टाचार एव। अत्र डामरतंत्रे विशेषः पायसं सार्पिषाक्तं तिलैः शुक्लैर्विमिश्रितं।। होमयेद्विल्वभ
क्ष्या दशांशेन नपोत्तम। रुद्राध्यायेपथा होमे मंत्रेण तेन साधयेत्। रुद्रयामलेपि।। मधानद्रव्यमुद्दि रामं०
श्यपायसान्त्रं तिलांस्तथा।। किंशुकैः सर्षपैः पूगैर्लाजैर्दूर्वांकुरैरपि।। पद्मैर्वा श्रीफलैर्दिव्यैर्नानावि ४५

धफलैरपि। रक्तचंदनखंडैश्च गुग्गुलैश्च नवनीहरैः प्रतिश्लोकं च जुहुयात्सर्वद्रव्याणि चक्रमादिति। य
त्तु केचित् अष्टम्यां जागरं कुर्यान्नवम्यां पारणं तथा।। दशम्यां च विसर्गः स्यादभिषेकश्च माधवेति
रुद्रयामलात्।। नवम्यां च … लक्षिकार्या होमादिकाः क्रियाः।। पारणं च प्रकुर्वीत देवीपूजनपूर्व
कं।। दशम्यामिश्रिता यत्र पारणं नवमी भवेत्। सप्तजन्मकृतं पुण्यं पतत्यस्य गणादेवनश्यति तथा। योमो
हात्पारणं कुर्याद्दशम्यां दिवसे विभो।। तद्राष्ट्रं नाशमायाति दुर्भिक्षादिभयं भवेत्। नृपहानिर्भवेद्दष्टं द
शम्यां पारणे कृते।। तस्मात्तु पारये देवं नवम्यां भक्तितत्परः। नवम्यां पारिता देवी कुलवृद्धिं प्रयच्छति
। दशम्यां पारिता देवी कुलनाशं करोति वै। तस्मात्तु पारणं कुर्यान्नवम्यां विबुधाधिपेति देवीपुराण
दिश्च नवम्यामेव नवरात्रपारणमित्याहुः तन्न। एवं च विंध्यवासिन्यां नवरात्रोपवासतः एकभक्ते
र्नक्तेन स्वशक्त्या याचितेन वा।। अथवा न वनक्तैश्च नवरात्रं समापयेदिति भविष्यादिवचोभि
रूपवासादिषु शक्त्या विहितस्य नवतिथ्याधिकरणकत्वस्य बाधापत्तेः अस्मिन्वाक्ये एकभक्तादि

Indira Gandhi National
Centre for the Arts

मस० शब्दसमभिव्याहारेण नवरात्रं समापयेदिति नामधेयांतरसत्त्वाच्च नवतिथिरूपगुणविधिरेवयुक्तो।
४६ नवरात्रोपवास इतिन्न नामधेयं। नवमीपारणविधायकानि दशमीनिषेधकानि च पूर्वोक्तानि व
चांसि तु महानिबंधादिष्वदृष्टत्वेनातो निर्मूलान्येव समूलत्वेपि तेषां पूर्वेद्युरष्टमीविद्धत्वेन न
नवमीप्रयुक्तोपवासे जाते परेद्युश्चावशिष्टे किंचिन्नवमीसत्त्वेन नवम्यंतः पारणविधायकत्वं॥ ननु
प्राप्तोपवासबाधकत्वं। एवं च सर्वेषामुपवासानां प्रातरेव हि पारणमिति वचोवगतावशिष्टनव
म्यंतः पारणस्योपोष्यतिथ्यंतःपारणविधिना बाधितस्य प्रतिप्रसवविधित्वेनैषां लाघवाच्चान्यथा
प्राप्तविधित्वगौरवं॥ अतश्च दशम्यां पारणं न कार्यमित्येतेषामनुवादकत्वमेव न विधाय
कत्वं तिथिवृद्धौ ह्रासेपि नवम्यां पूजोपवासादिकार्यमेवं आश्विने शुक्लपक्षे तु कर्त्तव्यं नव
रात्रकं प्रतिपदादिक्रमेणैव यावच्च नवमी भवेदिति हेमाद्रौ धौम्योक्तेः यावद्दशम्यभिव्याप्तो नव रामः
म्यां पूर्ववत्पूजा कर्तव्या भूतिमिच्छता। दक्षिणां वस्त्रयुग्मं च आचार्याय निवेदयेदिति मात्स्यात्.३ ४६

नरेण नवम्यां तु बलिना पूजयेच्छिवां॥ श्रवणेन दशम्यां तु प्रणिपत्य विसर्जयेदिति देवीपुराणात्। तत्रैव-महा
नवम्यां पूजयेत् स्वर्गमोक्षप्रदायिनीमित्युक्तेश्च। अतएव नवम्यां दशम्यां वा समाप्तौ त्वेतद्वचोबाधः स्यात्। न चाश्वि
ना। प्रतिपन्मुख्यापूरणपक्षतिथयो न वेत्यादिदेवीपुराणीयनवतिथिरूपकालविधिविरोधः सावनाष्टदश
॥ विस्तरश्चात्र नातिचरणकृते हेतनिर्णये बोध्यः। पारणं तु सूतकेपि कार्यं। तदुक्तं रुद्रयामले। सूतके
पारणं कुर्यात्तु नवम्यां होमपूर्वकमिति। एवं स्त्रीभिरपि रजोदर्शनमध्ये कार्यं। तदाह सत्यव्रतः प्रारब्ध
दीर्घतपसां नारीणां यद्रजो भवेत्। न तत्रापि व्रतस्य स्यादुपरोधः कदाचनेति। एतच्च सर्वव्रतपरं त्रेयं विध
वायास्तु त्रिरात्रमध्ये भोजननिषेधादिके तिचिन्त्यम्। निषेधस्य रागप्राप्तभोजनगोचरत्वेन वैधपारण
३ म विषयत्वायोगात् वस्तुतस्तु रजस्वलाया विधवायास्त्रिरात्रे भोजननिषेध एवावधुष्यायमानरतिदिक्
। इति नवमीनिर्णयः। अथ दशमी। सा तु कृत्स्ना पूर्वा। शुक्लोत्तरा सं पूर्णा दशमी कार्या परया पूर्वयाथवा॥
पुत्रान् दूषिता पस्मादिति सा सर्वेनोमुख्यं नीतिश्रोणिरः स्मृतेः अपवविकल्पोव्यवस्थितः शुक्लपक्षे तिथि

मस० ५१ ग्रोत्वायस्यामभ्युदितो रविः कृष्णपक्षे तिथिश्चोत्यापस्यामस्तमितो रविरिति वचोनरात्।माधवमतेप्येवं
।परंतु हेमाद्रिर्दिनद्वये कर्मकालव्याप्त्यभावे ऐच्छिको विकल्प इत्याह। तन्न। शास्त्रतोनवस्थासंभवे ऐच्छि
कत्वायोगात्। उपवासे तु सर्वोपि सर्वमते पूर्वैव नागविद्धा तु या षष्ठी शिवविद्धा च सप्तमी। दशम्येका
दशीविद्धा नोपोष्या माकथंचनेति शिवरहस्योक्तेः परंतु प्रनापमाजं दु स्कांदे। दशमी चैव कर्त्तव्या सदु
र्गा द्विजसत्तमेति। न दृष्युपवासपरं। ज्येष्ठशुक्लदशमी दशहरा। ज्येष्ठे मासि सिते पक्षे दशमी हस्त
संयुता॥ हरते दश पापानि तस्माद्दशहरा स्मृता॥ तस्यां स्नानं प्रकुर्वीत दानं चैव विशेषत इति हे
माद्रौ ब्राह्मोक्तेः। दश पापानि चाह मनुः। पारुष्यमनृतं चैव पैशुन्यं चापि सर्वशः। असंबद्धप्रला
पश्च वाङ्मयं स्याच्चतुर्विधं। अदत्तानामुपादानं हिंसा चैवाविधानतः। परदारोपसेवा च कायिकं त्रिवि राम०
धं स्मृतं। परद्रव्येष्वभिध्यानं मनसानिष्टचिंतनं। वितथाभिनिवेशश्च त्रिविधं कर्म मानसमिति। स्कांदे ४७
पि। ज्येष्ठे मासि सिते पक्षे दशम्यां बुधहस्तयोः। व्यतीपाते गरानंदे कन्याचंद्रे वृषे रवौ॥ दशयोगे नरः स्ना

त्वा सर्वपापैः प्रमुच्यत इति। इयं च योगविशेषवशात्पूर्वा परा वा ग्राह्या॥ काशीखंडे॥ दशाश्वमेधि
के स्नात्वा मुच्यते सर्वपातकैः। लिंगं दशाश्वमेधेशं दृष्ट्वा दशहरातिथौ। दशजन्मार्जितैः पापैस्त्यज्य
ते नात्र संशयः। स्कांदे। यां कांचित्सरितं प्राप्य दद्याद्दर्भतिलोदकं॥ मुच्यते दशभिः पापैः समहापात
कोपमैः। यदा ज्येष्ठो मलमासो भवति तदा मलमास एव कार्यं। दशहरासु नोत्कर्षश्चतु पेपिपुगादि
षु॥ उपाकर्म महाषष्ठी द्वितीयोदकं च आदिनदिति हेमाद्रौ ऋष्यशृंगोक्तेः। आश्विनशुक्लदशमी
विजयदशमी स्मृता सा शमीपूजायात्रादौ नक्षत्रोदयव्यापिनी ग्राह्या। तदुक्तं रत्नकोशे। ई
षत्संध्यामतिक्रांतः किंचिदुद्भिन्नतारकः। विजयो नाम कालोयं सर्वकार्यार्थसाधक इति। चिं
तामणावपि। आश्विनस्य सिते पक्षे दशम्यां तारकोदये। स कालो विजयो ज्ञेयः सर्वकार्यार्थसि
द्धये। अपराजितपूजायां त्वपराह्णव्यापिनी ग्राह्या। आश्विनशुक्लपक्षे प्रक्रम्य दशम्यां च नरैः स
म्यक् पूजनीयापराजिता। ऐशानीं दिशमाश्रित्य अपराह्णे प्रयत्नत इति पुराणसमुच्चयवचनात्

Indira Gandhi National Centre for the Arts

क्षेमार्थं विजयार्थं च पूर्वोक्तविधि
मस० ।दिनद्वयेन व्याप्तौ पूर्वैव।पापूरणान्नवमीयुक्ता तस्यां पूज्याऽपराजिता।दद्यातिविजयं देवीपूजिता जयवर्द्धिनी।एकादश्यां नक्त
४८ नानरैः नवमीशेषयुक्तायां दशम्यामपराजिता॥ददातिविजयं देवीपूर्वोक्त त्वार क्रोद्यह्यसंध्याका
वीतपूजनं चापराजितमितिपुराणसमुच्चयोक्तेः देशांतरयात्रा तु पूर्वोक्त ...आश्विनस्य सिते
लेकार्यादिनद्वयेनाऽरुणोदयकालाभावे परदिन एकादशमुहूर्ते यात्रा कार्या॥आश्विनस्य सिते
पक्षे दशम्यां सर्वराशिषु॥सायंकाले शुभा यात्रा दिवा वा विजयप्रस्तरेण एकादशो मुहूर्तोऽपिवि
जयः परिकीर्तितः तस्मिन्सर्वैर्विधातव्या यात्रा विजयकांक्षिभिरितिभ गुक्तेः परपूर्वदिन ए
कादशमुहूर्तव्याप्त्यभावे पिश्रवणयोगश्चेत्तद्दैवयात्रा कार्या।पूजा तु पूर्वेद्युरेव।उद
येदशमी किंचित्संपूर्णैकादशीपदि॥श्रवणर्क्षं यदा काले सा तिथिर्विजयाभिधा।श्रवणा एम४
र्क्षे तु पूर्णायां काकुत्स्थः प्रस्थितो यतः उल्लंघयेयुः सीमानं तद्दिनर्क्षे ततो नराः रतिकश्यप ४८
वचनात्।स्कंदपुराणेऽपि दशमीयः समुल्लंघ्य प्रस्थानं कुरुते नरः तस्य संवत्सरं राज्ये न क्वापि

विजयो भवेदिति।अत्र कृत्यं भविष्ये।शमीमुलक्षणे येतां दृष्ट्वा नाशमप्रतिष्ठितां संप्रार्थितां च संपूज्य
त्वेशानीं सुमुखो भवेत्।शमी शमयते पापं शमी लोहितकंटका।धारिण्यर्जुनबाणानां रामस्य
प्रियवादिनी।करिष्यमाणयात्रायां यथाकालं सुखं मम॥तत्र निर्विघ्नकर्त्री त्वं भव श्रीरामपूजि
दं ते।गृहीत्वा साक्षतामार्द्रां शमीमूलगतां मृदंगीतवादित्रनिर्घोषैरानयेत्स्वगृहं प्रति।ततो भूषण
वस्त्रादि धारयेत्स्वजनैः सहेति दिक्।इति दशमीनिर्णयः।अथैकादशी।तत्रोपवासो नित्यः
काम्यश्च।तत्राद्यमाह सनत्कुमारः न करोति हि यो मूढ एकादश्यामुपोषणं॥स नरो नरकं याति
रौरवं तमसावृतमिति॥गारुडे उपोष्यैकादशी नित्यं पक्षयोरुभयोरपीति।काम्यस्तु कौर्मे यदी
च्छेद्विष्णुसायुज्यं श्रियं संततिमात्मनः एकादश्यां न भुंजीत पक्षयोरुभयोरपीति।स्कांदे ग्यापदीच्छे
द्विपुलान्भोगान्भक्तिं वा संततं हरेः।एकादश्यामुपवसेत्पक्षयोरुभयोरपीति॥अथाधिका
री।कात्यायनः अष्टवर्षाधिकोमर्त्यो ह्यशीतिर्न्यूनवत्सरः एकादश्यामुपवसेत्पक्षयोरुभयोरपीति।अष्टव
न्यूः

मस० वाधिकरत्वरूपनयनोजरत्वस्योपलक्षणं। अपिवावेदनत्वात्वादुपधापेनप्रवर्त्तेरन्निति सर्वेष्वापितत्वात्
४९ एतच्च गृहस्थव्यतिरिक्तपरं। तदुक्तं कौर्मे। एकादश्यां न भुंजीत पक्षयोरुभयोरपि॥ वनस्थयतिधर्मी
यं शुक्लामेव सदागृहीति। एकादश्यां न भुंजीत पक्षयोरुभयोरपि॥ ब्रह्मचारी च नारी च शुक्लामेव सदा गृ
हीति। नारीविधवा॥ ब्रह्मचारिसाहचर्यात् सधवायास्तु पक्षद्वयेपि निषेधः पत्यौ जीवति या नारी उपो
ष्य व्रतमाचरेत्। आयुष्यं हरते भर्तुः सा नारी नरकं व्रजेदिति विष्णूक्तेः नास्ति स्त्रीणां पृथग्यज्ञो न
व्रतं नाप्युपोषणं। पतिं शुश्रूषते यातु तेन स्वर्गे महीयत इति मनूक्तेश्च। तथा॥ पदे वेभ्योपवासपित्रा
दिकेभ्य कुर्यात्। तन्नैभ्यर्चनं सत्क्रियां च। तस्यास्यर्द्धं सा फलं नाप्नुवित्तानारी भुंक्ते भर्तृशुश्रूषयेवेति
॥ भर्त्रानुज्ञया तु सधवाया अप्यधिकारो स्त्येव। भार्या पत्युर्मतेनैव व्रतादीनाचरेत्सदेति कात्यायनोक्तेः
चातुर्मास्यांतर्गतातु नस्या सिगृहिणोपोष्या। शयनीबोधनी मध्ये या कृष्णैकादशी भवेत्। सैवोपोष्या रामं४
गृहस्थेन नान्या कृष्णा कदाचनेतिपाद्मात्॥ एतच्चापुत्रगृहिविषयं। पुत्रवतस्तु तत्रापि निषेधः संक्रां ४९

त्यामुपवासं च कृष्णैकादशिवासरे। चंद्रसूर्यग्रहे चैव न कुर्यात्पुत्रवान्गृहीति नारदोक्तेः। आदित्ये ह
निसंक्रांतौ ग्रहणे चंद्रसूर्ययोः पारणां चोपवासं च न कुर्यात्पुत्रवान् गृहीतत्प्रयुक्तोपवासस्यानिषेधो
पमुदाहृतः प्रयुक्तं तरगुणस्य न विधिर्नेनिषेधन मितिजैमिनिसूत्रेश्च॥ सम्मतं नरेपि। विधवापावन
स्पस्यपतेश्चैकादशीद्वये। उपवासो गृहस्थस्य शुक्लायामेव पुत्रिण इति हेमाद्रिरप्येवं। काम्यापां तु स्मा
र्त्त वादमाह नारदः पुत्रवांश्च सभार्यश्च वंधुयुक्तस्तथैव च। उभयोः पक्षयोः काम्यव्रतं कुर्यात्तु वैष्ण
वमिति। वैष्णवे स्कंदे कृष्णाप्युपोष्या हस एव। निसंभक्तिस मायुक्तैर्नरैर्विष्णुपरायणैः पक्षयोरुभयो
च कर्तव्यमेकादश्यामुपोषणं। सपुत्रश्च सभार्यश्च स्वजनोभक्तिसंयुतः एकादश्यामुपवसेत्पक्ष
योरुभयोरपि। तत्रैकादशी द्वेधा। शुद्धा दशमीविद्धा च। आ घागारुडे। उदयात्प्राग्यदा विप्र मुहूर्त्तद्व
यसंयुता। संपूर्णैकादशीज्ञेया तत्रैवोपवसेद्गृही॥ गृहीवेष्णवः स्मार्त्तविषयं तु तत्रैव। आदित्यो
दयवेलायामारभ्यषष्ठिनाडिकाः संपूर्णैकादशीनाम कापोधर्मफलेप्सुभिरिति। दशमीविद्धापि

Indira Gandhi National
Centre for the Arts

म.स०
५० दृषा।अरुणोदयेसूर्योदयेचदशमीसत्वेन।तत्राद्याभविष्यउरारो।अरुणोदयकालेतुदशमी
यदिदृश्यते।साविद्धैकादशीतत्रयापमूलमुपोषणं॥तथा॥अरुणोदयवेलायांदिशांगंधोभ
वेद्यदि।दुष्टंनतुप्रयत्नेनवर्जनीयंनराधिप॥दिशादशमी।दशमीशेषसंयुक्तोयदिस्यादरु
णोदयः नैवोपोष्यंवैष्णवेनतद्दिनेकादशीव्रतंतरसादिभिर्वाक्यैररुणोदयेदशमीसत्वेएकाद
शीविद्धा॥यदपिसौरधर्मेषु।आदित्योदयवेलायांमुहूर्त्तद्वयान्विता।सैकादशीतुसंपूर्णा
विद्धान्यापरिकीर्त्तितेति॥तदप्यरुणोदयवेलायांदशमीसत्वेएकादश्याविद्धत्वपरंमुहूर्त्त
द्वयस्यारुणोदयपरिमाणत्वात्।अतएवहेमाद्रौस्मृतिः।निशिमानेतुयामार्द्धेदेववादित्रवादने
।सारस्वतानध्ययनेचारुणोदयउच्यतेइति।यामार्द्धमपिमुहूर्त्तद्वयमेव।यत्तुउदयात्प्राक्तनस्र
स्तुनाडिका।अरुणोदयइतितदपिद्वात्रिंशद्घटिकारात्रिमानपक्षेमुहूर्त्तद्वयस्यतावत्परिमाण राम०
त्वादुक्तमितितोनचरणोः यदपिब्रह्मवैवर्त्तीयं॥चतस्रोघटिकाःप्रातररुणोदयनिश्चयःच ५०

तुष्टयविभागेत्रवेधादीनांकिलोदितः।अरुणोदयवेधःस्यात्सार्द्धंतुघटिकात्रयं॥अतिवेधोद्विघटिकः
प्रभासंदर्शनाद्रवेः।महावेधोपितत्रैवदृश्यतेर्कोनदृश्यते।तुरीयस्तत्रविहितोयोगःसूर्योदयेस
तीत्यरुणोदयवेधातिवेधमहावेधयोगसंज्ञाकरणमर्वाक्दोषातिशयार्थं॥सार्द्धंतुघटिकात्र
यंचतस्रोघटिकाइतिचद्विमुहूर्त्तरूपानुगतएवहासः।यैनावसरिमाणस्यापिमुहूर्त्तद्वयस्यरात्रि
मानवशेनकदाचित्संभवात्मुहूर्त्तद्वयारुणोदयपरमेव।यत्तुब्रह्मवैवर्त्ते॥अर्द्धरात्रेतुकेषांचि
द्दशम्यावेधइष्यते।कपालवे धस्त्वाहुराचार्यायेहरिप्रियाइतितल्लेमुतिकरीसात्र अरुणोदय
वेधनिंदार्थमितिमाधवः।तत्वेतुदिवसमध्येव्रतसंकल्पपूजनार्थमित्यनुपदमेवव्यक्तं।यदपिना
३ ५ गोद्वादशनाडीभिर्दिक्पंचदशभिस्तथा।भूतोष्टादशनाडीभिर्दूषयत्युत्तरांतिथिमितिस्कांदेतदेव
स्योक्तंनिगमे॥सर्वप्रकारवेधोयमुपवासस्यदूषकः।सार्द्धसप्तमुहूर्त्तस्तुयोगोयंबाधतेव्रतमितिव्र
तमुपवासभिन्नमितिमाधवः।तत्राहरुणोदयवेधेवैष्णवपरः।तद्वामेवैष्णवग्रहणात्।परिशेषात्स

Indira Gandhi National
Centre for the Arts

म॰स॰ ५१

योंदृपवेधो वैष्णवभिन्नपरः अतएवस्मार्त्तपदेन व्यवह्रियंते येषु वैष्णवलक्षणंतु गारुडे वैष्णवान्
साघाामो क्रदीक्षां प्राप्तो हि वैष्णवः माधवीये स्कांदेपि॥ परामापदमापन्नो हर्षे वा समुपस्थिते॥
नैकादशीं त्यजेद्योपि यस्य दीक्षास्ति वैष्णवी॥ अन्यच्च॥ विष्णुर्पिताखिलाचारः स हि वैष्णव उच्य
ते भविष्येपि। यथायोभ्युत्थानं तथा कृत्स्ना यथा कृत्स्नातपो नरः। नुत्वेति मन्यते यस्तु स हि वैष्णव उच्य
ते। तत्र शुद्धैकादशी चतुर्धा। अधिकैकादशिका। अधिकद्वादशिका। उभयाधिका। अनुभया
धिका चेति। एवं विद्धापि। शुद्धायामेकादश्याधिक्ये नारदः संपूर्णैकादशी यत्र द्वादश्यां वह्निगामि
नी॥ द्वादश्यां लंघनं कार्यं त्रयोदश्यां तु पारणमिति। ईदृश एव विषये शंकरोपवासद्वयमाहह
हयमः संपूर्णैकादशी यत्र प्रभाते पुनरेव सा। लुप्यते द्वादशी तत्र उपवासः कथं भवेत्॥ उपोष्ये द्वे
तिथी तत्र विष्णुप्रीणनतत्परैरिति शुद्धायां द्वादशीमात्राधिक्ये परेद्युरुपवासः तथा च भागवता राम० 
दितंत्रे। संपूर्णैकादशी त्याज्या परतो द्वादशी यदि। उपोष्या द्वादशी शुद्धा द्वादश्यामेव पारणमिति शुद्धा ५१

तु
यामेवैकादशीमात्राधिक्ये स्मार्त्तानामपि स्कांदे प्रथमेहनि संपूर्णा व्याप्याहोरात्रसंयुता। द्वादश्यां तु तथा
तात दृश्यते पुनरेव च। पूर्वा कार्या गृहस्थैश्च यतिभिश्चोत्तरा विभो इति। एतच्च परेद्युर्द्वादश्यभाव
परं। पुनः प्रभातसमये घटिकैकापि दोषभवेत्। तत्रोपवासो विहितो वनस्थस्य यतेस्तथा। विधवाया
श्च तत्रैव परतो द्वादशी न चेदिति गारुडात्। उभयवद्धोपरत्रैवोपवासविधानाच्च स्मार्त्तानां। शुद्धा
यां द्वादशीमात्राधिक्ये तु पूर्वेद्युरुपवासः। तदाह नारदः न चेदेकादशी विष्णौ द्वादशी परतः स्थिता
। उपोष्यैकादशी तत्र यदीच्छेत्परमं पदमिति। विष्णौ द्वादश्यां। उभयाधिक्ये तु शुद्धापि द्वा च सर्वैः।
परैव कार्या संपूर्णैकादशी यत्र प्रभाते पुनरेव सा। सर्वैरेवोत्तरा कार्या परतो द्वादशी यदीति गा
रुडात्। विद्धापि तादृशी परैव कैमुतिकन्यायात् यत्तु हेमाद्रौ पाद्मे। विद्धाप्यविद्धा विज्ञेया परतो
द्वादशी न चेत्। अविद्धापि च विद्धा स्यात् परतो द्वादशी यदीति। तदप्युभयवृद्धौ तत्परं। अनुभयाधिक्ये तु ५२
संदेह एव। विद्धैकादश्याधिक्ये तु प्रचेताः। एकादशी विद्धा चेच्छुक्ले कृष्णे विशेषतः उत्तरां तु यतिः

Indira Gandhi National
Centre for the Arts

मस. ५२

कुर्यात्सर्वामुपवसेद्द्वहीति। विद्धायां द्वादशीमात्राधिक्ये तु परे द्युरुपवासः तदाह व्यासः एकादशी यदा
लुप्ता परतो द्वादशी भवेत्। उपोष्या द्वादशी तत्र यदीच्छेत्परमां गतिमिति यत्तु शुद्धायां द्वादशीमात्राधिक्ये
वैष्णवानामप्येतस्मादेव वचनात्स्मार्तेषूपवास इति माधवः। तत्र। लोपपदस्य सूर्योदयास्पर्शित्वेऽवमे
प्रसिद्धा सूर्योदयगत दशमीविद्धायामेतद्वचनप्रवृत्तेः अतो नेदं शुद्धन्यूनाधिकद्वादशीको...दिन
उपवासविधायकं यदपि केचिदनुपनिच्छिन्ने दमेनत्परतया योजितं। तावंतं। अत्र कारभ
श्लेषमानाभावात् दिनक्षये तु उत्तरवद्द्वहस्पृशे नोपवासो न कार्यः तदाह पितामहः एकादश्यं
दिनक्षये उपवासं करोति यो नरस्तस्य पुत्रादि नश्यंति मत्वा पापिंडतो पयाति। दिनक्षयस्तु पापाद्द्वे
निष्पन्नावेकवारे यस्मिन्स स्याद्दिनक्षय इति। दिनक्षये च उपवासनिषेधः स निराहारस्यैवेन।
थाचवायवीये। उपवासेन जयंतु भ संक्रांतौ प्रकल्पयेत्। नक्तमुपवासेन उपवासफलं ल राम.
भेत्॥ एवं कृत्स्ने कादश्या ... पि गृहस्य स्यान्नैव नक्तं ह... न्नमनोदनं वा फलं तिलाः क्षीर

मप्यंबु वाज्यं। पंचगव्यं यदि वापि वायुः प्रशस्तमत्रोत्तरमुत्तरं चेति। व्रते विशेषः स्मृत्यंतरे द
शम्यादिमहीपालत्रीदिनं परिवर्जयेत्। गंधतांबूलाभ्यादि स्त्रीसंभोगमहापापाः स्त्रीसंभोगनिषे
धस्तु ऋतुकालादन्यत्रेति श्रान्तिकांते उक्तं। स्कांदे। कांस्यं मांसं मसूरं च क्षौद्रं चानृतभाषणं पुन
र्भोजनमायासं दशम्यां परिवर्जयेत्॥ कौर्मे। कांस्यं मांसं मसूरं च ... चणकान्कोरदूषकान्॥ शा
कंमधु परान्नं च सज्जेदुपवसन् स्त्रियं। मात्स्ये। कांस्यं मांसं सुरां क्षौद्रं तैलं वितथभाषणं। व्यायामं च प्रवा
संचादिवास्वापं च मैथुनं तिलपिष्टं मसूरं च दशम्यादिषु वर्जयेत्॥ दशम्यामेव कल्पनारदीये। अक्षारल
वणाः सर्वे हविष्यान्नैकभोजिनः। अवनीतल्पशयनाः प्रियासंगविवर्जिताः अन्यत्रापि दशम्यामे
कभक्तं तु कुर्वीत नियतेंद्रियः आचम्य दंतकाष्ठं तु खादेत्तदनंतरं। ततश्चानंतरं विप्र ब्रह्मचारी
जितेंद्रियः रात्रिं नयेत्ततः पश्चात्प्रातः स्नात्वा समाहितः उपवासं तु संकल्प्य मंत्रपूतं जलं पिबेत्। दश
म्यामेकभक्तं कामेकादशीपरं। सायमाद्यंतयो रन्होः सायं प्रातश्च मध्यमे। उपवासफलं प्रेप्सुर्जह्या

Indira Gandhi National
Centre for the Arts

म स०
५३ र्ऋचतुष्टयं।अथनित्योपवासीचेत्सायंप्रातर्भुजिक्रियां।वर्जयेन्मतिमान्विप्रःसंप्राप्तेहरिवासरइति
विष्णूक्तेः।दशम्यामेकभक्तस्तुमांसमैथुनवर्जितः।एकादशीमुपवसेत्पक्षयोरुभयोरपिदेवतास्य
स्यानुष्ठंतिकामितंचास्यसिध्यतीतिदेवलोक्तेश्च।।अन्येपिदिनत्रयेनियमानित्यव्रतेनावश्यकाः
।तथाचब्रह्मवैवर्ते।।इतिविज्ञायकुर्वीतावश्यमेकादशीव्रतं।विशेषनियमाशक्तोहोरात्रंभुक्ति
वर्जितइति।कात्यायनोपि।शक्तिमांस्तुपुनःकुर्यान्नियमंसविशेषणमिति।ब्रह्मवैवर्तेप्राप्तेह
रिदिनेसम्यग्विधायनियमंनिशि।दशम्यामुपवासस्यप्रकुर्याद्वैव्रतं।।देवलः।गृहीत्वौदुंब
रंपात्रंवारिपूर्णमुदङ्मुखः।उपवासंतुगृह्णीयाद्यथासंकल्पयेद्बुधः।औदुंबरंताम्रमयं।पृथ्वा
संकल्पयेद्यथाकामंफलमुद्दिश्यवीदित्यर्थः।वाराहे।इत्युच्चार्यततोविद्वान्पुष्पांजलिमथार्पयेत्
।इत्युच्चार्यसंकल्पसमर्थःकात्यायनः।अष्टाक्षरेणमंत्रेणात्रिर्जप्तेनाभिमंत्रितं।उपवासफलंप्रेप्सु राम ४
:पिवेत्पात्रगतंजलं।पूर्वोक्तकपालवेधेतुविशेषोनारदीये।।दशम्यांशेषेणत्र्यहरात्रात्परेणतु ५३

.वर्जयेच्चतुरोयामान्संकल्पार्चनयोस्तदा।।विद्धोपवासेऽनर्हस्तुदिनंपक्षासमाहितः।रात्रौसंपूजयेद्विष्णुंसंकल्पं
चतदाचरेत्पूजाप्रकारश्चवाराहे।।एकादश्यामुभेपक्षेनिराहारःसमाहितः।नानापुष्पैर्मुनिश्रेष्ठविचित्रैर्म
धुपंशुभं।।कृत्वेतिशेषः।स्नात्वासम्यग्विधानेनसोपवासोजितेंद्रियः।संपूज्यविधिवद्विष्णुंश्रद्धयासुसमा
हितः।पुष्पैर्गंधैस्तथाधूपैर्दीपैर्नैवेद्यकैःपरैः।उपचारैर्बहुविधैर्जपहोमैःप्रदक्षिणैः।स्तोत्रैर्नानाविधै
र्दिव्यैर्गीतवाद्यैर्मनोहरैः।दंडवत्प्रणिपातैश्चजयशब्दैस्तथोत्तमैः।एवंसंपूज्यविधिवद्रात्रौकृत्वाप्र
जागरं।यातिविष्णोःपरंस्थानंनरोनास्त्यत्रसंशयइति।।विशेषोबृहन्नारदीये।पंचामृतेनसंस्नाप्य
एकादश्यांजनार्दनं।द्वादश्यांपयसास्नाप्यहरिसारूप्यमश्नुतइति।सूतकादौतुवाराहे।सूतकेच
नरःस्नात्वाप्रणम्यमनसाहरिं।एकादश्यांनभुंजीतव्रतमेवंनलुप्यते।मृतकेपिनभुंजीतएकादश्यां
सदानरइति।स्त्रीणांरजोदर्शनेत्वाहमाधवीयेकृष्णपक्षगाः।संप्रवृत्तेपिरजसिनत्याज्यंद्वादशीव्रत
मिति।एकादश्यांश्राद्धप्राप्तौत्वाहमाधवीयेसएव।।उपवासोयदानित्यःश्राद्धंनैमित्तिकंयदा।उपवासं

Indira Gandhi National
Centre for the Arts

म॰स॰ ५४ त स्नाकुर्याद् घ्रायचित्तसेवितमिति। उपवासासामर्थ्ये त्वाह माधवीये मार्कण्डेयः एकभक्तेन नक्तेन तथैवाया
चितेन। चउपवासेन दानेन न निर्द्वादशिको भवेत् हेमाद्रौ पुराणे। उपवासासमर्थश्चेदेकं विप्रं तु भो
६३ जयेत्। तावद्धनानि वा दद्याद् भुक्तश्चेद्द्विगुणं तथा। सहस्रसंमितां देवीं जपेद्वा प्राणसंयमान्। कुर्याद्द्वा
दशसंख्याकान् यथाशक्त्या तु रोन रइति। ब्राह्मणाभोजनमकृत्वा भुक्तश्चेदित्सर्थः व्रताकरणे प्रा
यश्चित्तं स्मृत्यंतरे। अर्के पर्वद्वये रात्रौ चतुर्दश्यष्टमी दिवा। एकादश्यामहोरात्रं भुक्त्वा चान्द्रायणं चरे
दि॥ ज्येष्ठशुक्लैकादशी निर्जला। ज्येष्ठे मासि नृपश्रेष्ठ या पाशुक्लैकादशी भवेत्। निर्जलं समुपोष्यात्र
जलकुंभान्सशर्करान्। प्रदाय विप्रमुख्येभ्यो मोदते विष्णुसंनिधाविति। [illegible] आषाढशुक्लैका
दश्यां विष्णुशयनं ब्राह्मे। एकादश्यां तु शुक्लायामाषाढे भगवान्हरिः। भुजंगशयने शेते क्षीरार्णवज
ले सदा स्वापविधिर्भविष्ये। महापूजां ततः कुर्यात् देवदेवस्य चक्रिणः। जातीकुसुममालाभिर्मंत्रे रामः ५४
णानेन पूजयेत्। सुप्ते त्वयि जगन्नाथ जगत्सुप्तं भवेदिदं। विबुद्धे च विबुध्येत प्रसन्नो मे भवाच्युतेति। अ

व चातुर्मास्यव्रतारंभ उक्तो महाभारते। आषाढे तु सिते पक्षे एकादश्यामुपोषितः। चातुर्मास्यव्रतं कुर्याद्य
त्किंचिन्नियतो नरः इति। व्रतानि तु चातुर्मास्यप्रकरणे वक्ष्यंते। चातुर्मास्यव्रतारंभस्य कालांतरमपि
ब्रह्मवैवर्ते। एकादश्यां तु गृह्णीयात् संक्रांतौ कर्कटस्य वा। आषाढ्यां वा नरो भक्त्या चातुर्मास्यव्रतक्रिया
मिति। व्रतग्रहणप्रकारो भविष्ये वा भावेताग्रतो विष्णोः कृतांजलिपुटस्तथा। चतुरो वार्षिका
न्मासान्देवस्योत्थापनावधि॥ इमं करिष्ये नियमं निर्विघ्नं कुरु मेऽच्युत। इदं व्रतं मया देव गृहीतं पु
रतस्तव। निर्विघ्नां सिद्धिमायातु प्रसादात्तव केशव। गृहीतेऽस्मिन्व्रते देव पंचत्वं यदि मे भवेत्। तदा
भवतु संपूर्णं त्वत्प्रसादाज्जनार्दन। गार्ग्यः न शोभते वनं मौढ्यं च शुक्रगुर्वोर्न वा तिथेः खंडत्वं विनये
च्चातुर्मास्यव्रतविधौ नर इति। एतद्द्वितीयाद्यारंभपक्षमारंभेऽपि न भवतीति कश्चित्। तन्न तुच्छत्वव्यवस्था
यां मानाभावात्। यद्यपि हेमाद्रौ चातुर्मास्यव्रतप्रकरणे भविष्ये। असंक्रांतं तु यो मासं दैवे पित्र्ये च व
र्जयेत्। मलमासप्रशोचं चैव वर्जयेन्मतिमान्नरः इति तदारंभसमाप्त्योरंतरा मलमासे व्रतानानुष्ठानविष

Indira Gandhi National
Centre for the Arts

मस०
५५

र्थमिति केचित्। युक्तं तु श्रावणे वर्जयेच्छाकं दधि भाद्रपदे त्यजेत्। दुग्धमाश्वयुजे मासि कार्त्तिके
द्विदलं त्यजेदिति श्रावणादिमासविशेषव्रतानां तु हि समर्थत्वं। एष च मासविशेषाख्यो विहितं
वर्जयेन्मत इति वचनात्। चातुर्मास्यव्रतानि त्वं तरामलमासं एतु वर्जनेन एवेति परे। निरसा
नामारंभः काम्यानां वर्जनेमितिनुयुक्तं॥ एकादश्यामाशौचे पूर्णिमायां कर्कसंक्रांतौ वा रभेते
। त्रिनपत्राप्याशौचे नारंभ एव। आरब्धे सूतकं न स्यादनारब्धे तु सूतकमिति विष्णूक्तेः। यत्तु वचनं
दीपिकायां एकादश्यां भुवि वीक्षुचि वापि यदि स्त्री यदि वा पुमान्। व्रतमेतन्नरः कुर्यात् सूतके सर्वपा
तकैरिति तदारब्धोत्तरं बोध्यं॥ भाद्रशुक्लैकादश्यां विष्णोरंगपरिवर्तनं तदुक्तं भविष्योत्तरे मा
ते भाद्रपदे मासि एकादश्यां दिने सिते॥ कटिदानं भवेद्विष्णोर्महापातकनाशनमिति। कटिदानम
गपरिवर्त्तनं। कार्त्तिकशुक्लैकादश्यां देवस्योत्थापनमुक्तं हेमाद्रौ पाद्मे। एकादश्यां तु शुक्लायां कार्त्ति रामा०
के मासि केशवं। प्रसुप्तं बोधयेद्रात्रौ श्रद्धाभक्तिसमन्वित इति। उत्थापनविधिर्भविष्ये। तथैव देव देव ५५

स्य स्नानं पूर्वं महद्भवेत्। महापूजां ततः कृत्वा देवमुत्थापयेत्सुधीः रामार्चनचंद्रिकायां रदंविसु
रनेनां वुतत्स्यादुत्थापयेत्प्रभुं॥ पौराणमंत्राः ब्रह्मेंद्ररुद्राग्निकुवेरसूर्यसोमादिभिर्वंदित वंद
नीय। बुध्यस्व देवेश जगन्निवास मंत्रप्रभावेन सुखेन देव॥ इयं तु द्वादशी देव प्रबोधाय विनि
र्मिता॥ त्वयैव सर्वलोकानां हितार्थं शेषशायिना। उत्तिष्ठोत्तिष्ठ गोविंद त्यज निद्रां जगत्पते।
त्वयि सुप्ते जगन्नाथ जगत्सुप्तं भवेदिदं। उत्थिते चेष्टते सर्वमुत्तिष्ठोत्तिष्ठ माधव॥ गता मेघा विय
च्चैव निर्मलं निर्मला दिशः। शारदानि च पुष्पाणि गृहाण मम केशवेति। ततस्तद्द्येयं व्रतं समाप
येत्॥ मंत्रश्चात्र निर्णयामृते। इदं व्रतं मया देव कृतं प्रीत्यै तव प्रभो। न्यूनं संपूर्णतां यातु त्वत्प्रसादाज्ज
नार्दनेति॥ एतत्पारणे हेमाद्रौ। आषाढमासे द्वादश्यां सर्वशांतिकरं शुभमित्यादिना द्वादश्यां शयनादिक
मुक्तं तन्मिथुनार्कपरं। आभाकादेषु मासेषु मिथुने माधवस्य च। द्वादश्यां शुक्लपक्षे च प्रस्वापो व
र्त्तनोत्सवो इति भविष्योक्तेः तत्रैवा आभाकासितपक्षेषु मैत्रश्रवणरेवती। आदिमध्यावसानेषु प्र

Indira Gandhi National
Centre for the Arts

मम० त्वापावर्त्तनोत्सवाः रेवतीसंचरस्यमालोपः उत्सवोजागरः मात्स्ये निशिस्वापोदिवोत्थानं संध्यायांय
५६ रिवर्त्तनं। निशादौ नक्षत्रपादयोगा नामभावे नक्षत्रमात्रेयोगोपि ग्राह्यः पादयोगेपदानस्या
दृत्तेर्गणितद्राभवेतदुतिवराहपुराणात्। द्वादश्या मक्षसंयोगेपादयोगेन कारणमितिविष्णुध
र्मोत्तरात्। द्वादश्यामेकदेशेनापिनक्षत्रयोगाभावेप्येकादश्यां त्रयोदश्यां वाप्रस्वापादिकार्य। अ
प्राप्ते द्वादशीमृक्षेउत्थानशयनेहरेः। पादयोगेन कर्त्तव्ये नाहोरात्रंविचिंतयेदितिजीमूतवा
हनोदाहृतवचनात्। एवं च द्वादश्यांनिशाद्यादरेन्यतिथौचनक्षत्रपादयोगादरेनियनेसति
यदाद्वादशीयुनिशादेरन्यत्रतत्तदृक्षभागयोगो ऽन्यतिथौ चतद्दिनरनक्षत्रस्यैवयोगः तदा द्वाद
३ ग्री शीयुसंध्यायांप्रस्वापादि द्वादश्यांसंधिसमयेनक्षत्राणामसंभवे। आभाकासितपक्षयुशयनाद रामं०
र्त्तनादिकमितिवराहवचनात्। संधिसमयदृतिशयनाद्यावर्त्तनं। संधिसमयश्चसापंसंध्येवर ५६
वसंतोयदारात्रौ द्वादश्यांचसमागतः नदाविबुध्यते विष्णुर्दिनांते प्राप्यरेवतीमितिजीमूतवाह

नोदाहृतवचनात्। आषाढकार्त्तिकयोर्मासयोरपि स्वापप्रबोधावाहयमः क्षीराब्धौशेषपर्यंकेआषा
ढ्यां संविशेद्धरिः। निद्रां त्यजति कार्त्तिक्यांतयोःसंपूजयेद्धरिं। ब्रह्महत्यादिकं पापंक्षिप्रमेव व्यपो
हतीति॥ यत्त्वाषाढ्यांस्वपं कार्त्तिक्यामितिछविषये प्योत्सर्गोकाराककरणोनाषाढीकार्त्तिकी
पदेएकादशीपरेत्येवेतितदयुक्तं आषाढशुक्लपक्षांतेभगवान्मधुसूदनः भोगिभोगेनिजांमायां
योगनिद्रांसमाप्रुयादितिविष्णुधर्मोत्तरात्। यदपि द्वादशीपदमेकादशीपरमितितदपिप्रमाणा
भावात्। एतेषां चपक्षाणांयथासंप्रदायंव्यवस्था। श्रीरामस्तुपारणोत्तरं द्वादशीमध्येत्रयोदशी
मध्येवापूर्वरात्रौस्वापोत्सवः पारणाहेपूर्वरात्रौघंटादीन्वादयन्मुकुंदःविधायमहतींपूजांविष्णु
मभ्यर्च्यवैस्वापानितिरामाचेनचंद्रिकोक्तेः शिष्टास्तुसदैवाभ्नामयपारणोत्तरमेवरात्रौकुर्वंति
॥यत्तुमोहचूडोत्तरे मिथुनस्थोयदाभानुरमावास्यादर्शस्यशोन। द्विराषाढःसविज्ञेयोविष्णुःस्वपिति
।कर्कटरतितदुत्तरवर्षेणनकर्कोकेस्वापपरमितिमाधवः मेषादिमिथुनांतेषुपदादर्शद्वयंभवेत्॥अ

मस०
५६

ग्रंतरेतदावश्यं कर्कटार्के हरिःस्वपेत्। कर्कटादित्रिके वापि यदा दर्शद्वयं भवेत्। अत्र ग्रंथांतरेतस्मा
दवश्यं मिथुनार्केहरिःस्वपेदिति वराहमिहिरोक्तेः भाद्रि ब्धे। आवणे वर्जयेच्छाकं दधिभाद्र
पदे तथा। दुग्धमाश्वयुजे मासि कार्तिके द्विदलं त्यजेत् इति शाकपदं दशसु योगरूढं। मूलपत्र
करीराग्रफलकांडाधिरूढकाः त्वक् पुष्पं कवकं चेति शाकं दशविधं स्मृतमिति क्षीरस्वाम्युक्तेः
मूलपदेन कंदस्यापि ग्रहणं। अग्रं पल्लवाः कंडदंडः क्रुडकं छत्राकं द्विदलं तु स्कांदे। माषमु
द्गमसूराश्च चणकाश्च कुलत्थकाः निष्पावा राजमाषाश्च आढक्यो द्विदलं स्मृतमिति लो
हुराने दस्कांदे। वार्षिकांश्चतुरो मासान्प्रसुप्ते दैजनार्दने। मंचखट्वादिशयनं वर्जयेद्भक्तिमान्
रः। अनृतौ वर्जयेद्भार्यां मांसं मधु परौदनं॥ पटोलं मूलकं चैव वृंताकं च न भक्षयेत्। अभक्ष्य राम४
वर्जयेद्धरात्रमूरमिति मर्षयं। राजमाषान्कुलत्थांश्च आशुधान्यं च वर्जयेत्। शाकं दधि पयो ५६
माषान् श्रावणादिषु वर्जयेत्। जंबीरं राजमाषांश्च मूलकं स्कन्मूलकं। कूष्मांडं चेक्षुदंडं च चातुर्मा

स्ये त्यजेद्बुधः॥ विशेषाद्द्दरीधात्रीकूष्मांडं तिंतिणीं त्यजेत्। जीर्णधात्रीफलं ग्राह्यं त्वक्पर्थं विल्वाय शोधनार्थ
मिति स्कांदे। निर्णयः अथ द्वादशी सा च पूर्वा ग्राह्या देशाद्वादशी युक्तेति वचनात्। माधवीये स्कांदेपि।
द्वादशी च प्रकर्तव्या एकादश्या युता प्रभो इति॥ एकादशी पारणविषये माधवीये स्मृत्यंतरे कलाह्यंत्र
यं वापि द्वादशीं नत्वतिक्रमेत्। पारणे मरणे नॄणां तिथिस्तात्कालिकी स्मृतेति। अस्य द्वादश्यां विशेषः
स्कांदे। पद्माभवेदल्पा वा यस्या द्वादशी पारणादिने। उषःकाले द्वयं कुर्यात्प्रातर्माध्याह्निकं तदेति॥ तत्र कू
र्म पंचित्या पारणं संभवेत्वाहदेवलः संकटे विषमे प्राप्ते द्वादश्यां पारयेत्कथं। अद्भिस्तु पारणं कुर्यात्पुनर्भु न५
क्तेन दोषकृदिति। संकटे त्रयोदशी निमित्तकं श्राद्धं स्नानादिकमन्यत्किंचित्। द्वादश्यामल्पायामपि
ति दोषः सर्वथा द्वादश्यभावे तु उक्तं नारदीये॥ त्रयोदश्यां तु शुद्धायां पारणे पृथिवी फलं॥ शतयज्ञाधिकं वा
पि नरः प्राप्नोत्यसंशयमिति॥ अत्र हरिवासरस्वरूपं तद्वर्जनं चोक्तं निर्णयामृते विष्णुधर्मोत्तरे द्वादश्याः
प्रथमः पादो हरिवासरसंज्ञितः अतिक्रम्य तु कर्तव्यं पारणं विष्णुतत्परैरिति॥ चैत्रशुक्लद्वादश्यां दमन

Indira Gandhi National
Centre for the Arts

मस०
५८

कार्यं रामस्य कामगात्मसंहितायां। द्वादश्यां चैत्रमासस्य शुक्लायां दमनोत्सवः। बोधापनादिभिः प्रोक्त
ः कर्त्तव्यः प्रतिवत्सरं। तत्र प्रथमं देव प्रार्थना। क्रियालोप विघातार्थं यत्त्वया विहितं प्रभो। नमेवि
घ्नो भवेदत्र कुरु तार्थ्यं दयामपि। सर्वथा सर्वदा विष्णो मम त्वं परमा गतिः। उपवासेन त्वां देव तोषया
मि जनार्दन। कामक्रोधादयो येन मे स्युर्व्रत घातकाः। अद्य प्रभृति देवेश यावद्वैशेषिकं दिनं। ताव
द्रक्ष्या त्वया कार्या सर्वस्यास्य नमोस्तु ते। एवं विज्ञाप्य देवेशं गुरुपादौ प्रणम्य च। प्रातः स्नात्वा समभ्य
र्च्य देवेशं विधिवन्नरः। गच्छेद् दमनकारामं मेकादश्यां सुशोभितं। क्रयेणादाय तत्रैव पूजयेच्चंदनादिनाने
ष्यामि राजपूजार्थमिति संप्रार्थ्य तत्र मे तात्। उत्पाद्यं च गत्वेन मोक्षाय संसारिणां। धौतेन वाससा छा
द्यानिधाय पटलेन वै। पटले वंशादिपात्रे घंटादुहषसूक्तादिस्वनैः। स्वगृहमानयेत्। ततो गृहमागत्य दे
वं प्रार्थयेत। आमंत्रितोसि देवेश पुराणपुरुषोत्तम। प्रातस्त्वां पूजयिष्यामि सान्निध्यं कुरु केशव। क्षीरोदधि राम०
महानागशेष्यासंस्थितविग्रह। प्रातस्त्वां पूजयिष्यामि सन्निधौ भव ते नमः। निवेदयाम्यहं तुभ्यं प्रातर्दमन ५८

कं शुभं सर्वथा सर्वदा विष्णो नमस्ते तु प्रसीद मे। इत्थमामंत्र्य दत्वा यत्नेन पुष्पांजलिं पुनः। पूजितं तं दमन
नकं कुंभस्योपरि संस्थितं। अभितः सर्वतो रक्षां वचेनावकुंठयेत्। रक्षेद्वा चक्रमंत्रेण नरहरेर्मनुना
थवा। ततो ब्राह्मणान् गुरून् रामस्य गीतवा द्यादिभी रात्रौ जागरणं कुर्यात्। ततः प्रातः संध्यामुपस्ना
नाद्याह्निकं नित्यपूजां च कृत्वा नैमित्तिकीं कुर्यात्तां न च यथा। पूर्वदिनाधिवासितं दमनकं हूर्वाद
लसहितं गृहीत्वा ॐ देवदेव जगन्नाथ वांछितार्थप्रदायक। हृदिस्थान् पूरय न कामान् मम कामेश्व
री प्रिया। इदं दमनकं देव गृहाण मदनुग्रहात्। इमां सांवत्सरीं पूजां भगवन्परिपूरयेति मूलमंत्रेण
पुष्पितेन मंत्रेण देवाय दमनकमर्पयेत्। ततउत्तर प्रार्थना। मणिविद्रुममालाभिर्मंदारकुसुमादिभिः
यं सांवत्सरी पूजा तवास्तु गरुडध्वज। वनमालां यथा देव कौस्तुभं सततं हृदि। तद्वद्दमनकीं पूजां मालां
च हृदये वह। जानता जानता वापि न कृतं यत्न वार्चनं। तत्सर्वं पूर्णतां यातु त्वत्प्रसादाद्रमापते। जि
तं ते पुंडरीकाक्ष नमस्ते विश्वभावन। नमस्तेस्तु हृषीकेश महापुरुषपूर्वज। मंत्रहीनं क्रियाहीनं भक्ति

Indira Gandhi National
Centre for the Arts

हीनं जनार्दन यत्पूजितं मया देव परिपूर्णं तदस्तु मे इति देवं प्रार्थयित्वा दंडवत्प्रणम्य भूषणवस्त्रादिभि
मस० पू९ र्गुरुं संपूज्य नत्वा ब्राह्मणान् भोजयेत्तु पंचपारणां कुर्यात् इति दमनकारोपणं॥ ॥पारणाहे द्वाद
श्यां लोभितत्रैव। पारणाहेन लभ्येत द्वादशी बुद्धिकापि वा। न दात्र यो दर्शी यात्रा पवित्रदमनार्पणो।
४ मा तथा धवे दमनकोयः स्यो त्म धोविधिस्तितो यदि वैशाख्यां श्रावणो नागे कर्त्तव्यं दमनार्पणमिति। माधवे
वैशाखेत द्वादश्यामित्यर्थः। नागे पंचम्यां। ज्येष्ठशुक्लद्वादश्यां वटसावित्री व्रतारंभ उक्तो भविष्ये। ज्ये
ष्ठे मासि सिते पक्षे द्वादश्यां रजनीमुखे। व्रतं त्रिरात्रमुद्दिश्य दिवारात्रिस्थिरो भवेदिति। आषाढशु
क्लद्वादश्यां तप्तमुद्राधारणमाह वैशेषश्रुतौ न द्विस्मोः परमं पदं येन यस्तितेहिलांछिता इति नार
दीयेपि अग्निनैव तु संतप्तं चक्रमादाय वैष्णवः धारयेत्सर्वगात्राणि सुसोपुत्र्यम श्रुतद्दति न
ष्ठ द्रविषयं न ब्राह्मणादेः यथा श्मशानजं काष्ठं अनर्हं सर्वकर्मसु। तथाच क्रांकितो विप्रः सर्वक रामप० पू९
र्मसु गर्हितः इति आश्वलायनोक्तेः द्विजं तु न तप्तमुद्रांघृतिं गांकित ननु रः संभाष्यो रौरवं यातियावदिं

न०

कृ

द्राश्चतुर्दशोति। नारदीयात्। तथा शंखं चक्रं मृदाय कुर्यात्तु प्राप्यसेन वा सुरश्च दुर्वदहिः कार्यः सर्वस्माद्द्वि
जकर्मणा इति शेवपुराणेपि। शंखचक्राघंकनं चगीतनृसादिकं तथा एकजातेरयं धर्मो न जातु स्याद्
द्विजन्मन इति। एतेषां च विधिनिषेधानां वैष्णवावैष्णवपरतया व्यवस्थेति केचित् वह वस्तु द्विधाना
मपि निर्मूलतामाहुः श्रावणशुक्लद्वादश्यां पवित्रारोपणमुक्तं रामार्चनचंद्रिकायां। श्रावणस्य सि
ते पक्षे द्वादश्यां शोनकादिभिः उक्तः सदा प्रकर्त्तव्यः पवित्रारोपणोत्सवः। पाप्रे तु ऊर्जे व्रतं मधौ दोला
श्रावणे तंतुपूजनं चैत्रे च दमनारोपमकुर्वाणो व्रजत्यधः पवित्रारोपणं विघ्नात् श्रावणे न भवेद्य
दि कार्त्तिकस्य वा विशुक्लाकें कुर्जे व्यपि तिना रदः शुक्लाकं शुक्लद्वादशी हेमरुप्यमयैः कृत्रैस्तथा कौशे
यपद्मजैः कुशैः काशैश्च कार्पासैः ब्राह्मणपा कार्त्तितैः शुभैः कृत्या वा पवित्रं स्यात्र योश्चल्यादिभिः
कृतैः स्नात्वा त्रिगुणितं सूत्रं त्रिगुणी कृत्य शोधयेत् पथकृपथ कृपं चग अर्देहिः प्रक्षाल्य पेत्ततः मूले
नाष्टोत्तरशतमाप आरामसंत्यशांखोदके नाभिमंत्र्य पवित्राणि विनिर्मितेत्। तत्रोत्तमं पवित्रं तु ष

मस०
५८

ष्मा स हशतैस्त्रिभिः सप्तत्यासहितं द्वाभ्यां पवित्रं मध्यमं स्मृतं साशीतिनाशतेनैव कनिष्ठं तत्समाचरेत्
त्र्यष्टोत्तरशतं दद्यात् देवस्त्री स्तनेन वा जानूरू नाभिपर्यंतमुत्तमादित्रयं भवेत् अष्टोत्तरस हस्रे
सहस्रशतेन णोविंशोत्तरपुनः सप्तत्यावा वनमालां शतं पंचाशत् षट्त्रिंशद्भिरुत्तमादिः षट्त्रिंशच्चतुर्दशद्वा
दशभिरिति केचन। चतुर्विंशद्वादशाष्टाभिरित्येके। अंगुष्ठपर्वेतरं दद्यात् दद्यादरिमितो ग्रंथः। यस्त्वेनमा
देः स्नात्वा वितनोयत्यदेवं। क्रियालोपविधानार्थं यत्त्वया विहितं विभो। मयैतत्क्रियते देव तव तुष्ट्यै पवि
त्रकं। न मे विघ्नो भवेद्देव त्र्युन्नाय दयां मयि। सर्वथा सर्वदा विष्णो मम त्वं परमा गतिः उपवासेन
त्वां देव तोषयामि जगत्पते। कामक्रोधादयो येते न मे स्युर्व्रतघातकः। अद्यप्रभृति देवेश यावद्वैशे वि
कं दिनं तावद्रक्षत्वया कार्या सर्वे सास्सन्नमोऽस्तु ते। कुंभपुराणांबुना पूर्यं सर्वतोभद्रके शुभे। स्थापयेत्सु रामं ४
रतो विष्णोस्तत्र स्तूत्राणि पूजयेत्। सांवत्सरस्य यागस्य पवित्रीकरणाय भो। विष्णुलोकात्पवित्राय ५८
आगच्छेह नमोऽस्तु ते। सर्वाभरणचित्रांग सर्वदेवनुमस्कृत। लावण्यरूपसंपन्न सर्वकर्त्तः प्रजापते स

वेमाल्मेशस्तूत्रेऽस्मिन् सांन्निध्यं कुरु ते नमः सर्वरत्नोज्ज्वलार्करत्नस्रांउब्रह्मरोचिषः मुकुटोत्तमसर्वांगा
शिरसूत्र रहे हिभोऽरहते जगतः कीर्त्तिः सर्वलावण्यदायिनो श्रीसूत्राने सकल्याणसांनिध्यं कुरु
ते नमः मनुभिर्मंत्रपेदैतैः पूजयेन्मूलमंत्रतः अथ देवकरे विद्वान् गांधस्तत्र समुद्भवं वितस्मिमा
नकं डोरंवध्रीयान्मंगलात्मकं। संवत्सरकृताचार्चा संपूर्णफलदास्तु मे। पवित्रारोपणेचैवसां
निध्यं कुरु ते नमः। विष्णुतेजोद्भवं रम्यं सर्वपातकनाशनं। सर्वकामप्रदं देव तवांगे धारयाम्यहं। इ
ति मंत्रः नीराजयेत्ततो देवं मंगलाद्योषपूर्वकं मंत्रेणाथ पुरेशानं देवदेवं तु मंत्रयेत्। ओंमंत्रि
तोऽसि देवेश पुराणपुरुषोत्तम प्रातस्त्वां पूजयिष्यामि सान्निध्यं कुरु केशव। क्षीरोदधिमहानागश
य्यावस्थितविग्रह। प्रातस्त्वां पूजयिष्यामि संनिधो भव ते नमः निवेदयाम्यहं तुभ्यं प्रातरेतत्पवित्र
कं। सर्वथा सर्वदा विष्णो नमस्तेऽस्तु प्रसीद मे। निपत्ते दृं उवमद्मो। क्षिप्त्वा पुष्पांजलिं ततः ब्राह्मणोऽभ्यो
नमस्कृत्य गुरुपादौ प्रणम्य च गीतमंगलनिर्घोषैः कुर्याज्जागरणं ततः इत्यधिवासनं अथ परेद्युर्नि

Indira Gandhi National
Centre for the Arts

मस० त्वत्पूजां विधाय ततो मंगलानि घोषैः शंखतूर्यादिनिस्वनैः गंधदूर्वाक्षतायुक्तं दद्याद्वा यसूत्रकं ग
६० मरामनमस्कार्य गृहाणेदं पवित्रकं पवित्रीकरणार्थाय वर्षपूजाफलप्रदं पवित्रं च कुरु ग्रा
३ कां घय न्मया दुष्कृतं शुद्धो भवाम्यहं देवत्वत्प्रसादात्सुरेश्वर मूलसंपत्तितो येषपवित्रारोपणे
मनुः त्रगणघातित्वे देवेभ्यस्ततो दद्यात्स्वनामभिः नैवेद्यं तु महापूर्वं ततो दद्याद्भक्तितः नी
राजयेत्ततो देवं स्माकांतं समंगलां स्तवीत्पचामरैः पुरापेदर्पणं दर्शयेत्ततः प्रार्थयेद्देव देवे
शं मंत्रैरेभिर्यथाविधि मणिविद्रुममालाभिर्मंदारकुसुमादिभिः इयं सांवत्सरी पूजा तवास्तु
गरुडध्वज वनमालां यथा देव कौस्तुभं सततं हृदि तद्वत्पवित्रपूजां च हृदये वह केशव। जान
ता जानता वापि यत्कृतं तु त्वदर्चनं। केनचिद्विघ्नदोषेण न परिपूर्णं तदस्तु मे। मंत्रहीनं क्रियाहीनं
हीनं भक्तिहीनं जनार्दन। यत्पूजितं मया देव परिपूर्णं तदस्तु मे। अपराधसहस्राणि क्रियं राम ४
ते हर्निशं मया दासोयमिति मां मत्वा क्षमस्व मधुसूदन। ततः पवित्रं गुरवे दद्याद्धूंधादिपूर्वकं ६०

श्रवगं

अथैनं पूजयेद्भक्त्या स्वर्णवस्त्रानुलेपनैः ब्राह्मणान्वैष्णवां धूप्यादिनार्चयेत्मासं पक्षमहो
रात्रं त्रिरात्रं धारयेत्तथा देवतं सूत्रसंदर्भ देशकालविवक्षया। प्रत्यहं स्नानकार्या दौ सूत्राण्युज्ज्वालये
कारयेत्। अथांते देवमभ्यर्च्य ततः सूत्रं विसर्जयेत् सांवत्सरीं शुभां पूजां संपाद्य विधिवन्मम व्रजे
दानीं पवित्रत्वं विष्णुलोकं विसर्जितं यावद्देवे पवित्राणि तावत्तिष्ठेत्समाहितः ब्रह्मचारी हविष्या
शी देवपूजापरायणः। भाद्रशुक्लद्वादशी श्रवणाद्वादशी सा चैकादशीयुते वानयुक्तं मात्स्ये। द्वाद
शी श्रवणस्पृष्टा स्पृशेदेकादशी यदि। स एव वैष्णवो योगो विष्णुशृंखलसंज्ञितः तस्मिन्नुपोष्य
विधिवन्नरः संक्षीणकल्मषः प्राप्नोत्यनुत्तमां सिद्धिं पुनरावृत्तिदुर्लभामिति। द्वादश्यां श्रवणा
भावे तु नारदीये। पद्मेन प्राप्यते कृत्स्नं द्वादश्यां वैष्णवं क्वचित्। एकादशीतद्दोषोप्या पापघ्नी श्र
वणान्वितेति। द्वादश्यामेव श्रवणायोगेनु भविष्ये। एकादशीमुपोष्यैष द्वादशीं समुपोषयेत्।
न चात्र विधिलोपः स्यादुभयोर्देवतं हरिरिति। विधिलोपश्चैकादशीपारणहानिकृतः। अथांत्ये

Indira Gandhi National
Centre for the Arts

मस· ६९ तुमात्स्ये। द्वादश्यां शुक्लपक्षे तु नक्षत्रं श्रवणं यदि। उपोष्यैकादशीं तत्र द्वादश्यां प्रजपेद्धरिमित्यत्र
त्र कृतसमुक्तं भविष्योत्तरे। मासि भाद्रपदे शुक्ला द्वादशी श्रवणान्विता। सर्वकामप्रदा पुण्या उपवा
से महाफला। संगमे सरितां स्नात्वा द्वादशीं समुपोषितः। समग्रं फलमाप्नोति द्वादशद्वादशीफलं। वि
ष्णुधर्मोत्तरे। या राम श्रवणोपेता द्वादशी महती तु सा। तस्यामुपोषितः स्नातः पूजयित्वा जनार्दनं।
प्राप्नोत्ययत्नाद्धर्मज्ञ द्वादशद्वादशीफलं। दध्योदनयुतं तत्र जलपूर्णं घटं द्विजे। वस्त्रसंवेष्टितं द
त्वा छत्रोपानहमेव च। न दुर्गतिमवाप्नोति गतिमग्र्यां च विंदति। अक्षय्यं स्थानमाप्नोति नात्र का
र्या विचारणेति। पारणे तु विशेषो नारदीये। तिथिनक्षत्रयोगे तु उपवासो यदा भवेत्। पारणं तु
न कर्त्तव्यं यावन्नैकस्य संक्षय इति। अत्र वरुणसंगमे स्नानमुक्तं लैंगे। अतः परं तु संसेव्यं गंगा
वरुणसंगमं। श्रवणद्वादशीयोगे बुधवारो यदा भवेत्। तदा तस्मिन्नरः स्नात्वा लाभं निहत्य फलं त रामः
भेदिति। कार्त्तिककृष्णा वत्सद्वादशी। सा पूर्वविद्धा ... गोवत्सद्वादशी युक्तेति प्रमाणात्। वत्सपूजा व ६९
वा।

टश्चैव कर्त्तव्या प्रथमेऽहनीति स्मृत्यं नृणां च। भविष्यत्पुराणे। सवत्सां तुल्यवर्णां च शालिनीं गां पयस्विनीं।
चंदनादिभिरालिख्य पुष्पमालाभिरर्चयेत्। अर्घं ताम्रमये पात्रे कृत्वा पुष्पाक्षतैस्तिलैः। पादमूले तु
दद्याद्वै मंत्रेणानेन पांडव। क्षीरोदार्णवसंभूते सुरासुरनमस्कृते। सर्वदेवमये मातर्गृहाणार्घं नमो
नमः। ततो माषादिसंसिद्धान् वटकान् विनिवेदयेत्। सुरभि त्वं जगन्मातर्देवि विष्णुपदे स्थिता। सर्वदे
वमये ग्रासं मया दत्तमिमं ग्रसे। ततः सर्वमये देवि सर्वदेवैरलंकृते। मातर्ममाभिलषितं सफलं कु
रु नंदिनि। इति प्रार्थयेत्। तत्रैव। तद्दिने तैलपक्वं च स्थालीपक्वं युधिष्ठिर। गोक्षीरं गोघृतं चैव दद
धि तक्रं च वर्जयेदिति। अत्रैव द्वादश्यादिषु विशेषो नारदीये। आश्विने कृष्णपक्षे तु द्वादश्यादिषु
पंचसु तिथिषु क्रमः पूर्वरात्रे नृणां नीराजनो विधिः। नीराजयेत् देवान् स्तुविप्रान् गाश्च तुरंगमान्। ज्येष्ठा
न् श्रेष्ठान् जघन्यांश्च मातृमुख्याश्च योषित इति। अथ चातुर्मास्यांतः। कार्त्तिकशुक्लद्वादश्यां
चातुर्मास्यव्रतसमाप्तिरुक्ता भारते। चतुर्ष्वप्येव चीर्णं चातुर्मास्यव्रतं नरैः। कार्त्तिके शुक्लपक्षे तु

Indira Gandhi National
Centre for the Arts

मसं०
६२
द्वादश्यां तत्समापयेदिति। मंत्रस्तु। इदं व्रतं मया देव कृतं प्रीत्यै तव प्रभो। न्यूनं संपूर्णतां यातु त्वत्प्रसादा
ज्जनार्दनेति। अथ सर्वद्वादशीषु सत्तन्नियमाः। कात्यायनः। प्रातः स्नात्वा हरिं पूज्य उपवासं
समर्पयेत्। अज्ञानतिमिरांधस्य व्रतेनानेन केशव। प्रसीद सुमुखो नाथ ज्ञानदृष्टिप्रदो भवेति।
पारणं तु ततः कुर्यो घथासंभवमार्गोतरति। वृहन्नारदीये। ब्राह्मणान्भोजयेच्छक्त्या प्रद दृा
दक्षिणां तथा। ततः स्ववंधुभिः सार्द्धं नारायणपरायणः। कृतपंचमहायज्ञः स्वयं भुंजीत वाग्यत
तः इति। भोजने तु विशेषः स्कांदे। कृत्वा चैवोपवासं तु योऽश्नाति द्वादशीदिने। नैवेद्यं तुलसीमि
श्रं हत्याकोटिविनाशनं। पितितत्तर्द्धीनिब्रह्मांडे। कांस्यं मांसं सुरां क्षौद्रं लोभं वितथभाषणं। व्यापा
मं च प्रवासं च दिवास्वप्नमथांजनं। तिलपिष्टं मसूरं च द्वादशैतानि वैष्णवः। द्वादश्यां वर्जयेन्नित्यं सर्वपा त्यं
पैः प्रमुच्यते। तथा। कांस्यं मसुरापूपं माषान्मांसं क्रोधमैथुने। हिंसामसत्यं लौल्यं च तैलं निर्माल्यलंघ रापष
नं द्वादश्यां द्वादशैतानि वैष्णवः परिवर्जयेत्। वृहस्पतिः। दिवानिद्रां परान्नं च पुनर्भोजनमैथुने। क्षौद्रं ६२
सं२

---

कांस्यामिषे तैलं द्वादश्यामष्ट वर्जयेत्। कात्यायनः। द्वादश्यां पारणं कुर्याद्वर्जयित्वा सुयोदकौ मत्स्यादि सर्वं
चेतत्काम्यव्रतपरं। पुनर्भोजनमध्वानं भारमायासमैथुने। उपवासफलं हंत्युदि [illegible] न द्र [illegible] व पंच
मी। तथा। कांस्यं मांसं मसूरं च चणकं कोरदूषकं। शाकं मधु पराचं च हूसुरष्टाविमे फलमित्यादीफ
लग्रहणात्। स्कांदे। कलाह्यपंत्रपं वापि द्वादशी यत्र दृश्यते स्नानार्चनादिकं कर्म तत्र कार्यं त्रयो विधीयते
। अहरादौ प्रपरश्चात्ररात्रिशेषं तथा च नारदीये। अल्पायामथ विप्रेंद्र द्वादश्यामरुणोदये। स्नाना
र्चनक्रियाः कार्या जपहोमादिसंयुताः इति। होमादिशेषं न चात्र स्मार्त्तमेव कर्म गृह्यते न तु श्रौतं
। स्मृत्या श्रौतकालबाधायोगात् पाप्नोऽपि। यदा भवति अल्पा तु द्वादशी पारणादिने। उषःकाले द्वयं कु
र्यात्प्रातर्माध्याह्निकं तदेति महाहानिकरी सेयं पारद्वादशी लंघिता नरैः करोति धर्महरणमस्नातेव स
रस्वतीति। आस्नाते त्वधिकरणोक्तप्रत्ययः तेन न तस्यां स्नानमकृत्वा लंघिता सरस्वती यथा धर्मं हरति
तथा। भोजनेन लंघिता द्वादश्यपीत्यर्थः। तेन न धंनरेउ जीर्षस्नानं हरस्वमां तु स्नात्वा त्वरणमिति स्मृ

Indira Gandhi National
Centre for the Arts

मस०
६३

चितं भूयस्यामपि द्वादश्यां माध्याह्निकापकर्षो भवत्येवा सर्वेषामुपवासानां प्रातरेव हि पारणमिष्टं
र्केः। भोजनं माध्याह्निकपो श्ववीचानिकक्रमसम्भवात्। एवमुक्तप्रमेनियमलोये। यमः मानसे
नियमे लुप्ते स्मरेद्विष्णुम नामपमिति। पात्त्र वल्काय दिवा गृह्य मलोपः स्यात्स्नानदानादिकर्मसु आ
हरे द्वै स्मवं मंत्रस्मरेद्वा विष्णुमव्यपमिति। विष्णुधर्मोत्तरे। असंभाष्यान्हि संभाष्य तुलस्यंतसि
कोदलं आमलक्याः फलं वापि पारणे प्राश्य शुध्यति। हरं चोहारहरेत्सम्पकेकृत्वा तत्र वराम मनः
केशावीरमतः करणोपघातं वाच श्व विष्णुर्भगवान शेषं। शमनपत्वान्ममेह शर्मपायाद नंते ह
शारीरमतः करणोपघातं वाचश्व विष्णुर्भगवानशेषं। शमनपत्वान्ममेह शर्मपापाद नंतेह
दिष्टं निविष्टे। अंतः शुद्धिं वहिः शुद्धिं शुद्धोधर्मम यो स्तु तः स करोतु ममे तस्मिन्न शुचिरे वास्मिन्सर्वे
हा। वाल्योपघातानन घान्चो द्वाश्व भवगवानजः शमंनपत्वनं तान्मो विष्णुश्चेतासि संस्थितः। एत
त्संभाष्य प्रसंपावेतु भिह्न यो घितेरिति। वैष्णवे। तस्याव लोकनात्सूर्यं पश्येत मतिमान्नरः नमः रामं०
त्संभाष्य प्रसंपावेतु भिह्न यो घिते रिति। वै ष्णवे। तस्याव लो कनात्सूर्यं पश्येतमतिमान्नरः नमः रामं० ६३
शुचिषदेत्युक्तेति। तस्य पावेशादेः तत्स्पर्शेपि तत्रैव संस्पर्शेतु बुधः स्नात्वा शुचिरादित्य दर्शनादिति

। विष्णुरहस्ये। आङ्गोपवासदिवसे स्वादित्वादंतधावनं। गापन्याणन संपूतं त्वं तु प्राशपादिशुध्यतीति
। रजस्वलां च चांडालम हायातकिनं तथा। सूतिकां पतितं चैव उच्छिष्टं रजकादिकमित्युपक्रम्य बह
त्वार दीये। व्रतादिमध्ये श्रणुयाद घोषां क्षनिमुत्तमः। अष्टोत्तरस हस्तं तु जपेद्वेदमातरं वेदमातरंगा
यत्रीं का स्यापनः मिथ्यावादे दिवास्वापे व हुशोंवुनिषेवणे। अष्टाक्षरं व्रती जप्त्वा शतमष्टोत्तरं शु
चिरिति। अष्टाक्षरं ओं नमो नारायणायेति। शंखः कृत्वा तु प्रमादाद्धिंसां पथाई शास्त्र चोदितां।
। प्राप। श्चितंव्रती कुर्याज्जपेत्वा श्राशनतत्र पमितिपे ठीनसिः तांबूलचर्वणे त्स्त्री गणांभो गेमासनिषे
वणे। व्रतलोपो भवेत्कुर्याद्दष्टाक्षरमनो जपमिति। का स्यापनः रेतः सत्कमरणात्स्त्री गणांभो गेन्यत्रक्षपः
स्मृतः जपोष्टाक्षरमंत्रस्य नामशत त्रयस्य चेति रेतः संक्रमरणं मनुकालगमनेन दानक त्वीसंभो
गात् अन्यत्र भोगे व तस्य क्षय स्मर्यः देवलोपि। न दारे दृतुसंगमादिति रतिहा दशी अयत्रयोदशी
। त्रयोदशी तु शुक्ला पूर्वाह्न स्नोत्तरा त्वाशा। शुक्लत्रयोदशी पूर्वापरा कृष्णात्रयो दशीतिमाधवोक्ते:

प्र०स०
६४

दीपिकायां त्रयोदशी। तिथिः पूर्वा सिते याऽसिते पश्चादिति। अत्र प्रदोषव्रते प्रदोषो नरसिंहे उपसंहृते येन त्र
योदश्यां निराहारो भवेद्दिवा घटिकात्रितलमयात्सूर्यहा नं समाचरेत् तत्सुभक्तो वरे धरोभूत्वा वाग्यतो वि
यमान्वितः कृतसंध्याजपविधिः शिवपूजां समारभेदिति। अत्र प्रदोषव्यापिनी ग्राह्या। तत्रैव पूजावि
धानात्। दिनद्वये प्रदोषव्याप्तित्वेऽव्याप्तित्वे वा परैव। यदि स्यादुभयोरस्तिथ्योः प्रदोषव्यापिनी तिथिः
तदोत्तरत्र नक्तं स्यादुभयत्रापि सा यत इति जाबालिवचनात्। उभयत्र दिवारात्र्यादिरित्यर्थः। तथा। अ
तथात्वे परत्र स्यान्नत्वार्वागस्ततोदिवेति अतथात्वे दिनद्वये प्रदोषे तज्जिप्पभावे। अस्तादर्वाग
वसापाह्ने भोजनं स्यात् अत एव प्रदोषव्यापिन्या दिवा नक्तं विधीयत इत्युपक्रम्य एवं ज्ञा
त्वा ततो विद्वान्सापाह्ने तु भुजिक्रियां। कुर्यान्नक्तव्रती नक्तफलं भवति निश्चितमिति स्कांदे उप
संहृते। इदं च मंदवासरे कृष्णपक्षे इति प्रशस्तं। मंदवारे प्रदोषो येऽलभः सर्वदेहिनां। तत्रापि दुर्ल रा०म०
भस्तस्मिन् कृष्णपक्षे समागत इति। तत्रैवोक्तं। चैत्रे कृष्णत्रयोदश्यां शतभिषायोगः स्कांदे वारुणो ६४

न समायुक्ता मधौ कृष्णत्रयोदशी गंगायां यदि लभ्येत सूर्यग्रहशतैः समा। शनिवारसमायुक्ता सा महावा
रुणी स्मृता। गंगायां यदि लभ्येत कोटिसूर्यग्रहैः समा। शुभयोगसमायुक्ता शनौ शतभिषा यदि। महामहे
ति विख्याता त्रिकोटिकुलमुद्धरेत्। कार्त्तिके कृष्णत्रयोदश्यां दीपदानमुक्तं इत्प्रकाशे स्कांदे। कार्त्ति
कस्यासिते पक्षे त्रयोदश्यां निशामुखे। यमदीपं बहिर्दद्यादपमृत्युर्विनश्यतीति बहिर्गृहाद्बहिरिति
केचित्। गृहाद्बहिरित्यपरे। यं चलुमत्युनापाशदंडाभ्यां कालेन श्यामया सह। त्रयोदशी दीपदानात्सू
र्यजः प्रीयतां ममेति दिक्। इति त्रयोदशी। अथ चतुर्दशी। चतुर्दशी कृष्णा पूर्वा शुक्लोत्तरा ग्राह्या। वे
तुर्दश्यां च पूर्णिमेति आपस्तंबवाक्यात्। तीयैकादशी षष्ठी शुक्लपक्षे चतुर्दशी पूर्वविद्धा न कर्तव्या कर्तव्या
परसंयुतेति नारदीयात्। कृष्णपक्षेऽष्टमी चैव कृष्णपक्षे चतुर्दशी। पूर्वविद्धा तु कर्तव्या परविद्धा न क
र्हिचिदित्यापस्तंबोक्तेश्च। तत्र सर्वासु चतुर्दशीषु वीरेश्वरपूजोक्ता स्कांदे विधायैवं जागरणं रात्रौ वीरेश
मर्चयेत्। भूतानां नैव गच्छति शारीरं पांचभौतिकं चैत्रे कृष्णचतुर्दश्यां केदारकुंडे उदकपानमुक्तं तत्रैवा वे

तृ ४

Indira Gandhi National
Centre for the Arts

मस० ६५ कृष्णचतुर्दश्यामुपवासं विधाय च। केदारोदकपानेन यथोक्तफलभाक् भवेदिति। चैत्रशुक्लचतुर्दशी रा
त्रिव्यापिनी ग्राह्येति केचित्। मधोः श्रावणमासस्य शुक्ला या तु चतुर्दशी। सा रात्रिव्यापिनी ग्राह्या परा
पूर्वाह्णगामिनीति बोधायनवचनात्। निशि भ्रमन्ति भूतानि शक्तयः शूलभृद्यतः। अतस्तत्र चतुर्दश्यां स
त्यां तत्पूजनं भवेदिति। ब्रह्मवैवर्त्ते। नानचरणात्तु। ततो ये का दशी षष्ठी शुक्लपक्षे चतुर्दशी पूर्व
विद्धा न कर्त्तव्या कर्त्तव्या परसंयुतेति नारदेन शुक्लचतुर्दशी परविद्धोक्ता। कृष्णपक्षेऽष्टमी चैव कृष्ण
पक्षे चतुर्दशी पूर्वविद्धा तु कर्त्तव्या परविद्धा न कस्यचिदित्यापस्तंबेन वह्निकृष्णापूर्वोक्तं त्वत्र पराह्णव्या
पित्वेनोभे अपि पूर्वविद्धे एव। चतुर्दशी तु कर्त्तव्या त्रयोदश्या युता विभो। मम प्रपूजने मे हा वा होमे वेद्या चा
पराह्णिकी। दर्शविद्धा न कर्त्तव्या राकाविद्धा कदाचनेति स्कांदोक्तेः। मधोः श्रावणमासस्येति बोधायनी रामप० ६५
ये तु परा पूर्वाह्णगामिनी सर्वविधीयते। न रात्रिव्यापिनी सा ग्राह्येत्यपि उभयविधौ वा सम्भवे दर्शप्रसंगात्तत्किं
तु स्कांदवाक्यप्राप्तं पूर्वविद्धत्वमनूद्यते। तद्धि रात्रिव्यापित्वमेव भवति रात्रिव्यापिनीति विधिः पूर्वाह्णगामि

नीत्यनुवाद इति चेन्न। मधुश्रावणशुक्लचतुर्दशीभिन्नानां पूर्वाह्णव्यापिनीनां ग्रहणं स्यात् मतः श्रा तोलस्य
रा या रात्रिव्यापिनी स्यनेन पूर्वविद्धत्वमनूद्यते इत्याहुः। रात्रिव्यापिनी चेत्तत्पूर्वविद्धा परा। तच्च सायाह्नव्या
पित्वे भवति। पूर्वविद्धाया रात्रिव्यापित्वे एवं भवति एवं पूर्वविद्धत्वे परविद्धत्वे वा प्राप्ते मधोः श्रावणमासस्ये
ति वचो नियमविधिर्भवति। पूर्वविद्धत्वाभावे केवलं रात्रिमात्रव्यापित्वे त्वपूर्वविधित्वं स्यात् अतश्च नियम
विधेर्गुर्वी निशाद्युस्थिते सा रात्रिव्यापिनी सा तत्पूर्वविद्धा परामिति तु मम प्रतिभाति। अस्यामेव पशुप
तीश्वरपूजोक्ता तत्रैव। चैत्रशुक्लचतुर्दश्यामुपोषणपरायणः। प्रजापतिं पशुपतिं रात्रौ जागरणं नयेदिति
। वैशाखशुक्लचतुर्दशी नृसिंहजयंती तदुक्तं गोविंदार्णवे ब्राह्मे। शुक्लपक्षे चतुर्दश्यां मासि माधवसंज्ञके
। प्रादुर्भूतो नृपंचास्यस्तस्मात्तामुपोषयेदिति। माधवो वैशाखः नृपंचास्यो नृसिंहः इयं प्रदोषव्यापिनी
त्तंन्त श्रीतपोत्तरम हर्देवास्यजतीति श्रुतेः अमावास्यायामपराह्णे इति अमावास्यापदस्य कर्मण्यत्वाच्च
।पितृयज्ञांगन वेति तु वा दांतरमिति। तैत्तिरीयादीनां तु निर्दिश्यान्त संधिमत्से वाहोरात्रेनुष्ठानं। आश्वलाय
नानां सर्वाधानिनां तावद्दक्षिणाग्निकपितृयज्ञोत्तरं पथ्यो वपार्दरणां। पक्षांतकर्म निर्वर्त्य वैश्वदेवचस्याग्नि

८५ कः पिंडयज्ञं ततः कुर्यात्ततोन्वाहार्यकं बुध इति वाक्यात्। पक्षांतत्र्याधानं। अन्वाहार्यकं पार्वणं श्राद्धं तत्
त्र च निरग्निकवह्निप्रापणो होमः। तथा च परिशिष्टं। यदमावास्यात्र प्रभवं पार्वणं तत् दाहिताग्नेः पि
उपितृयज्ञं कृत्वा करोत्यनाहिताग्निस्तु तद्दिने रेणाप्यतिषज्येति आहिताग्निः पार्वणे चापि उपितृयज्ञक वै
ल्याभावाद्यनुत्तमपायाणां श्राद्धे वेति ब्राह्मणानां पाणिषु होम इति च आहिताग्निः स्म धानी। अनाहि
ताग्नि स्म धानी। केवलस्मार्ताग्निमान् चेति सांप्रदायिकाः। अनयोस्तु यौक्तिककालनिर्णयपक्षे सर्वेदा
श्राहवित्पयज्ञयोस्तत्र विशेषप्रयोव्यतिषंगा एवं काले क्वान्। अग्नौकरणं च स्मार्ताग्नौ भाव्य इति शेषं
प्रदापेतु संपूर्णपर्वण्यव्यतिषंगा एव। कालैक्यादेवं यद्वर्णितु पूर्वदिने पितृपत्नीयचरुश्रपणादि
सकलेतिकर्तव्यताकं श्राद्धं परदिने तु पितृयज्ञः कालभेदेन न तत्र व्यापायप्रवृत्तेः एतेन पूर्वदिनेपि
तपत्नीयचरुश्रपणादि सकलेतिकर्तव्यताकं श्राद्धं। परदिने तु पितृयज्ञः कालभेदेन न तत्र व्यापायप्रवृत्तेः रामः
एतेन पूर्वदिन एव व्यतिषंगादसमाप्तिः कालभेदादेव पिंडपितृयज्ञं ततः कुर्यात्ततोन्वाहार्यकं बुध इति क्रमानुरो ८५

धेनपर्यागानुष्ठानमध्यात्तं। एकदिनीये घेवत्यपक्रमविधिराकांक्षितनियमविधिसंभवैर्भिन्नदिनीये घनाकां
क्षितापूर्वविधानायोगात्। यद्यपि पूर्वदिने वार्षिकादिषु च चरुश्रपणादिकास्तवो। पित्तपत्ने तिकर्तव्यता
या तत्तोभाति। तथापि यद्दत्रमुपभुक्तं तत् स्थालीपाकेन सह पिंडार्थमुद्धृत्तेति सूत्र आत्वार्थस्य नात्राम
र्दः स्थालीपाकश्चो घृतेस्तं दंश्राद्धेषु प्रसंगात्। अनिष्टं चेत तत्तेनानुवाद[illegible] एवायं यत्र स्थालीपाकेविहि
तं तत्र तेन भुक्तशेषेण चापिंडनिर्वपणं यत्रतु स्थालीपाकविधिर्नास्ति तत्र भुक्तशेषेणैव केवलेनतिर्व ८६
पणं भवति। आचार्येण प्रोक्तश्राद्धान्युक्तानि। आन्वष्टक्यं च पूर्वेद्युर्मासिमास्यथ पार्वणं काम्यमभ्युदये
ष्टम्यामेकोद्दिष्टमथाष्टमं। तत्र पूर्वेषु चतुर्षु स्थालीपाकादन्नमुद्धृत्याग्नौकरणं। अग्निसमीपे स्थाली
पाकेन भुक्तशेषेण चापिंडनिपरणं पिंडपितृयज्ञकल्पस्य तेषु तेषु विद्यमानत्वात्। तच्च सोधित मे व मा
कं। उत्तरेषु चतुर्षु भोजनार्थादन्नमुद्धृत्याग्नौकरणं कृत्वा पाणिहोमः ब्राह्मणसमीपे भुक्तशेषमात्रेणापिंड
निपरणं तेषु स्थालीपाकविध्यभावात्। पिंडपितृयज्ञकल्पप्राप्त्यभावात् चात्र ताथ्रीह्रेत्वाचतदभ्युस्मरं

Indira Gandhi National
Centre for the Arts

८६ सकृदाच्छिन्नावलरणं चलेवांत्रिरुदकेनेत्यादिफलीप्राशनांतं च भवति। अग्निप्रत्येपादिति तु न भवति। अन्य
च्चात्तिप्रणायनादि सर्वं न भवतीति वृत्तिग्रंथस्यालोचनेन तु लेखाकरणादिकेव भवति न चरुश्रपणादि
का। युक्तं चेदमुक्तमिति केचित्। चरुश्रपणादिप्रमाणाभावात्। अथाग्नौ जुहोतिपथोक्तं पुरस्तादि
दि सूत्रमति देशार्थमिति चेत्र। उद्धृत्य घृताक्तमनुतापयत्यग्नौ करिष्येकरवैकरकाणेति वा प्रेत्यभि
। त्रोत्रिय तां कुरुष्व कुर्विति सूत्रोज रमथेत्यादि सूत्रमुक्तं। अतो यथोक्तमित्या घुद्धरणे त्र रकाली
नानेवमेक्षरणावदानादीनतिदिशति न प्राक्कालीनानपि श्रपणादीन्। यत्तु पघदत्रमुपभुक्तं तज्जत्या
लीपाके न सह पिंडार्थमुद्धृत्येति सूत्रं। तत्रापि स्थालीपाकस्योद्धरणम्एवकमेलेनात्रसाहित्यं। न पिंडार्थ
त्वेपि। उद्धरणेतु तस्य प्रतिपाद्यत्वमेवाकारणां तत्पभुक्तस्य ज्ञातीयमेवान्नं। अतो न पिंडनमपि चरुश्रपणा
प्रयोजकं वस्तुतस्तु। आश्वलायनं च पूर्वं घुरिसापुत्का चतुर्थीघेषु साग्नीनां वहोहोमो विधीयत इत्याचार्येणा
पित्रयत्वात्तिदिष्णप्रसज्यमानाग्नेःश्राद्धांतरेपि परिसंख्यानात् पि अन्वाल्मरणात्तेस्यो इत्तरे षु चतुर्थ्येपीति त्वतु रामः ८६

वाहकं विधानेवान्सभेदात्। अग्न्यभावे तु विप्रस्य पाणावेवोपपादयेदिति मानवेन पाणौ प्राप्ते श्च अभाव
स्य परिग्रहनाशादेर्शातरे स्विव परिसंख्यया विशिष्टः अष्टत्वे तु गत्योक्तत्वोपाधि कलत्वमेव प्रजरा हुक्त
चतु हूमपि। प्राप्त परिसंख्यात्वे पायेन त्रिदोषा अत्र त्वेवावयं तीत्यत्रे वैवशब्देन पंचपंचनत्वाभस्या
रत्यत्रेवच पंच पदेनात्रापि चतुः पदेन श्रुत्यैव परिसंख्यानात्। नच परिसंख्यायेकानुवादकयोर्वैपरी
त्यं। अग्न्यभावनिमित्तकस्य पाणोः साग्निकर्तृकेष्वाचष्टकादिचतुर्थप्राप्तेः साग्नीनामिसस्यानुवादत्वाणो
गात्। अग्नेः परिसंख्यायां चतत्साध्यं चरुश्रपणादि हूरं निरस्तमेव॥ ॥इति श्रीमच्छंकरभट्टात्मजभ
दनीलकंठकृते भास्करे कालमयूखे रक्षादि कालनिर्णयः अथ ग्रहणनिर्णयः॥ वृद्धगार्ग्यः पूर्णि
माप्रतिपत्संधौ राहुः संपूर्णमंडलं। ग्रसते चंद्रमर्कं च दर्शप्रतिपदंतरे। वृद्धवसिष्ठः गवां कोटिप्रदा
नेन सम्यग्दत्तेन यत्फलं। गंगास्नानेन तत्कुर्यात्सा द्राहुग्रस्ते निशाकरे। दिवाकरे पुनस्तत्र दश संख्यमुद
हृतमिति भारते। गंगास्नानं तु कुर्वीत ग्रहणे चंद्रसूर्ययोः। महानदीषु चान्यासु स्नानं कुर्याद्यथाविधि दक्षः

Indira Gandhi National
Centre for the Arts

८७ उपस्पृषसि यत्स्नानं सर्वपापामुदितेरवौ। चंद्रसूर्योपरागे च प्राजापत्येन नन्तसमुमिति। गंगाया अलाभे त्वन्ना
पुस्त्रो नादि कुर्यादित्यर्थः महानद्यो द्वादश। गोदावरी भीमरथी तुंगभद्रा च वेणिका। तापी पयोष्णी विंध्य
स्पदः स्सिरोत्तमकीर्त्तिताः भागीरथी नर्मदा च यमुना च सरस्वती। विशोका च वितस्ता च विंध्यस्योत्तरतः
स्मृताः महानद्यसंभवे शंखवापीकूपतडा - गेषु गिरिप्रस्रवणेषु चानद्यां नदे देवखाते सरसीषु स्नाता
बुनि। उद्धृतोदकेन वा स्नायात् ग्रहणे चंद्रसूर्ययोः इह पूर्वपूर्वाभावे उत्तरोत्तरकल्पः। उक्तं च मार्कंडेयेन
।शीतमुष्णोदकात्पुण्यमपारक्यं परोदकात्। भूमिष्ठमुद्धृतात्पुण्यं ततः प्रस्रवणोदकं। ततोपि सारसं
५ छ पुण्यं ततः पुण्यं नदीजलं तीर्थतोयं ततः पुण्यं महानद्यंबु पावनं। ततस्ततोपि गंगांबु पुण्यं पुण्यस्ततो
बुधिः व्यासोपि सर्वं गंगासमं तोयं सर्वे व्याससमा द्विजाः सर्वभूमिसमं दानं ग्रहणे चंद्रसूर्ययोः उष्णोद रामः
कमातुरविषयं। आदित्यकिरणैः पूतं पुनः पूतं च वह्निना। अतो व्याध्यातुरः स्नायाद्ग्रहणे रोग्युष्णवा ८७
रिणेति माधवोक्तेः स्नानाकरणे प्रत्यवाय उक्तो वृद्धवसिष्ठेन ग्रहसंक्रमे चैव न स्नायाद्यदि मानवः

सप्तजन्मानि कुष्ठी स्याद्दुःखभागी च जायते इति। भुक्तिस्नानाकरणेपि प्रत्यवायः तथा च ब्रह्मवैवर्ते वि
मुक्तेपदि न स्नायाच्चंद्रसूर्यग्रहे तथा। तस्य तावदशौचं स्याद्यावदन्यः परो ग्रह इति। मासभेदेन नदी
नां पुण्यत्वं देवीपुराणे कार्त्तिके ग्रहणं श्रेष्ठं गंगायमुनसंगमे। मार्गे तु ग्रहणं प्रोक्तं देविकायां ८४
महामुने। पौषे तु नर्मदा पुण्या माघे संनिहिता शुभा। फाल्गुने वरुणा प्रोक्ता चैत्रे पुण्या सरस्वती। वैशा
खे तु महापुण्या चंद्रभागा सरिद्वरा। ज्येष्ठे तु कौशिकी पुण्या आषाढे तापिका नदी। श्रावणे सिंधुना
मा तुल्या भाद्रे तु चंद्रिका। आश्विने सरयूः श्रेष्ठा तथा च पुण्या तु नर्मदेति। तत्रैव। गोदावरी महापुण्या
चंद्रे राहुसमन्विते सूर्ये च राहुणा ग्रस्ते तमोभूते महामुने। नर्मदातोयसंस्पर्शकृतकृत्या भवंति ते
सेत्रविशेषोपि गंगाकनखलं पुण्यं प्रयागं पुष्करं तथा। कुरुक्षेत्रं महापुण्यं राहुग्रस्ते दिवाकरे अत्र
श्राद्धमुक्तं भारते सर्वस्वेनापि कर्त्तव्यं श्राद्धं वै राहुदर्शने। अकुर्वाणस्तु नास्तिक्यात्पंके गौरिव सीद
ति। पंकेदस्यादित्येकरणे दोषः असमर्थः तत्त्वामेन कार्यं। आपद्यनग्नौ तीर्थे च चंद्रसूर्यग्रहे तथा आम

Indira Gandhi National
Centre for the Arts

२८ श्राद्धं द्विजः कुर्याच्छूद्र कुर्यात्सदैव हीतिशानानयोक्तेः तत्र रात्रावपि स्नानाद्याह देवलः यथा स्नानं च
दानं च सूर्यस्य ग्रहणे दिवा। सोमस्यापि तथा रात्रौ स्नानदाने विधीयते अत्राशौचिनोपि स्नानाद्याह
वृद्धवसिष्ठः सूतके मृतके चैव न दोषो राहुदर्शने तावदेव भवेच्छुद्धिर्यावन्मुक्तिर्न दृश्यते। रजस्व
ला स्नाने विशेषः क्वचित्स्मर्यते। स्नाने नैमित्तिके प्राप्ते नारी यदि रजस्वला। पात्रान्तरिततोये न स्नानं
कृत्वा व्रतं चरेदिति। व्रतं रजस्वलाव्रतं। इदं च नाद्रियन्ते शिष्टाः। वारविशेषे फलातिशयमाह व्या
सः रविग्रहः सूर्यवारे सोमे सोमग्रहस्तथा। चूडामणिरिति ख्यातस्तत्र दानंनफलं भवेत्। वारेष्वन्ये
षु यत्पुण्यं ग्रहणे चंद्रसूर्ययोः। तत्पुण्यं कोटिगुणितं ग्रासे चूडामणौ स्मृतमिति षट्त्रिंशन्मते। स
र्वेषामेव वर्णानां सूतकं राहुदर्शने स्नात्वा कर्माणि कुर्वीत शृतमन्नं विवर्जयेत्। ग्रहणान्तरितं पक्व
मन्नं साज्यं ग्रहणेनमपि न भुंजीत सर्वथा केषुचित्सदार्थेषु प्रतिप्रसवः। आरनालं तथा क्षीरं किलाटं राम४
घृतसम्भवः स्नेहपक्वं च तैलं च न कदाचित् दुष्यति। तथा। आरनालं पयस्तक्रं दधि तैलाज्यपाचितं। मणि २८

कस्योदकं चैव न दुष्येद्राहुदर्शने इति। इदं पंचसूतकोक्तिः स्नानार्थानान्यकर्मत्यागार्था। तदुक्तं स्मार्ते क
र्मपरित्यागो राहोरन्यत्र सूतके इति। शिवरहस्ये सूर्येन्दुग्रहणं यावत्कुर्याज्जपादिकं। न स्वपेन्न च भुंजी तादद२
त स्नात्वा भुंजीत मुक्ते पारणे फलविशेषो ब्रह्मपुराणे। उपमर्दे लक्षगुणं ग्रहणं यावज्जावेत्कुर्याज्जपा
दिकं। न स्वपेन्न च भुंजीत स्नात्वा भुंजीत मुक्ते पारणेति फलविशेषो ब्रह्मपुराणे। उपमर्दे लक्षगुणं ग्रहणे
चंद्रसूर्ययोः पुण्यं कोटिगुणं मध्ये मुक्तिकाले त्वनंतकमिति। दानमुक्तं महाभारते। अयने विषुवे चै २५
व ग्रहणे चंद्रसूर्ययोः पात्रभूताय विप्राय भूमिं दद्यात्सदक्षिणां। यद्यपि पूर्वं सर्वं व्यासमात्रमुक्तं त
थापि नब्राह्मणास्तुत्यर्थं दानस्यावश्यकत्वार्थं च। ननु पात्रत्यागेन यस्मै कस्मैचिद्दानप्रतिपादना
र्थं। पात्रलक्षणं दानमयूखेव दृष्टं। अनुकल्पमाह बौधायनः श्रोत्रियोऽश्रोत्रियो वापि पात्रं वा पा
त्रमेव वा। विप्रब्रुवोपि वापि प्रोग्रहणे दानमर्हतीति। भारते भूमिर्गावः सुवर्णं च धान्यं वा यदीक्षितं
। तत्सर्वं ग्रहणे देयं आत्मनः श्रेय इच्छता। पुण्यकालमाह जाबालिः संक्रान्तौ पुण्यकालस्तु षोडशो

Indira Gandhi National Centre for the Arts

म स० ८९ यतः कालाः चंद्रसूर्योपरागे च यावद्दर्शनगोचर इति। अत्र केचित्। राहुदर्शने स्नायाद्दानं च कुर्यादि
त्यादिभिर्वाक्यैर्दर्शने स्नानादिविधीयते दर्शनं चाक्षुषं तच्च स्वकीयमेव निमित्तं। परकीयदर्शनस्य
परं प्रति निमित्तत्वाभावात्। एवं चायमर्थः संपद्यते सर्वग्रहे रोदृष्टे स्नानादिक जैवनमे
४ तत्रा तेद्रेमाहुः तदयुक्तं एवं सर्वस्य स्नानादि न स्यात् [illegible] नेत्रे से तो घं नेमादिलिनाद्यं यतं कदाचन नोपर
क्तं न वारिस्थं न मध्यं न भसो गतमिति वाक्येन स्नातकानां ग्रहणदर्शने प्रतिषिद्धे तेषां स्नानादि न स्या
त्। यदि परं तत्रेष्टापत्तिः किंच एतेन तथा सति सूर्यग्रहे यदा रात्रौ दिवा चंद्रग्रहः स्यात् तत्र स्नानं न कुर्या
त् दानादनं च क्वचिदिति निषेधो नुपपन्नः स्यात्। रात्रौ सूर्यग्रहणस्य जातस्य दिवा चंद्रग्रहण
स्य जातस्य दर्शनाभावे स्नानादेरप्राप्तत्वात्। किंच यदि दृष्टग्रहणे स्नानादेर्निमित्तं तथा सत्तु देशभेदेन
ग्रहणस्य विशेषणां दर्शनेन निविवक्षितं स्यात्। यस्योभयं हविरार्तिमाछेदित्यत्र वहुविषयत्वभ राम ४
यत्वात्। अतः केवलं ग्रहणमेव निमित्तमिति वक्तव्यं। न च ज्ञातमेव निमित्तं सर्वनिमित्तानां ज्ञातानां ८९

मेव नैमित्तिके प्रयोजकत्वमिति विज्ञानेश्वरादिभिस्तत्र तत्र निरूपितत्वात्। तच्च ज्ञानं शास्त्रीयमेव न
लौकिकं। न चैवं द्वीपांतरे जातं द्वीपांतरे पि प्रयोजकं स्यादिति वाच्यं। द्वीपांतरे जातस्य द्वीपांतरे रात्रि
दिनजातत्वेनाप्रयोजकत्वात्। क्वचिद्देशे दृष्टं देशांतरे च मेघच्छन्नं तु भवत्येव प्रयोजकं। न च राहुदर्श
न इत्यनेन चाक्षुषमेव दर्शनं ग्राह्यमिति वाच्यं। अष्टमी रोहिणीयुक्ता निशार्द्धे दृश्यते यदीत्यादिषु शा
स्त्रदृष्ट्यापि दृशिप्रयोगदर्शनात् तेन प्रसस्य दर्शनमेव स्नाननिमित्तमिति केचित्। मलापः शास्त्रमा
यविरुद्ध उपेक्षणीयः। ग्रस्तास्तविषये मनुः चंद्रसूर्यग्रहे नाद्यादद्यात्स्नात्वा विमुक्तयोः अमुक्तयोरस्त
गयोर्दृष्ट्वा स्नानं परे हनि। भृगुरपि। ग्रस्तावेवास्तमानंतु रवीन्दू प्राप्नुतो यदा। तदा परे घु रुदये स्नात्वा
भ्यवहरेन्नर इति। नित्यस्नानं संध्यावंदनहोमादिकं ग्रस्तोस्ते चंद्रोदयात्पूर्वमपि कर्त्तव्यं। तदुक्तमुशन
सा। अस्तं चास्तंगते त्विंदौ स्नात्वा मुक्त्वावधारणं। स्नानहोमादिकं कार्यं भुंजीतेंदूदये पुनरिति। स्नात्वा पाका
दिकं कार्यमिति तत्रीयः पादः क्वचित्पठितः रुंडपटंरवेर [illegible] पलसरां। तुल्यन्यायत्वात्सायंसंध्यादेर्लोप

Indira Gandhi National Centre for the Arts

मथ. ९० पप्रसंगात् ज्ञाते नोभयत्र मुक्तिस्नानं विनापि संध्यादिकार्यमिति वचनतात्पर्यं। उदयोत्तरमेन स्सर्वं
कुर्वंति केचित्। वेधमाह व्यासः। नाघात्सूर्यग्रहात्पूर्वं अह्नि सायं शशिग्रहात्। अहकाले च नाश्नी
यात्स्नात्वाश्नीयाद्विमुक्तयोः मुक्ते शशिनि भुंजीत यदि न स्यान्महानिशा। विशेषमाह वृद्धवसि
ष्ठः ग्रहणं तु भवेदिंदोः प्रथमादधियामतः भुंजीतावर्त्तनात्पूर्वं पश्चिमे प्रथमादधः। रवेस्तावर्त्तना
दूर्ध्वमर्वागेव निशीथतः चतुर्थे प्रहरे चेत्स्याच्चतुर्थप्रहरादधः। रात्रौ प्रथमयामोत्तरं ग्रहणं चेन्म
ध्याह्नात्पूर्वं भुंजीत। रात्र्यंतयामे चेद्रात्रिप्रथमयामात्पूर्वं भुंजीत दिनतृतीयप्रहरे चेद्रविग्रहस्त
दा पूर्वदिनस्याहोरात्रान्यां न भुंजीत। अहश्चतुर्थप्रहरे चेद्रविग्रहणं तदा रात्रेश्चतुर्थयामस्याद
धो भुंजीत। इदं च न रात्रिभोजनपरं किंतु सूर्यग्रहे पूर्वयामचतुष्टयं चंद्रग्रहे यामत्रयमित्येव
परमिति माधवः। तथा च वृद्धगौतमः सूर्यग्रहे तु नाश्नीयात्पूर्वं यामचतुष्टयं चंद्रग्रहे तु यामांस्त्रीन्बालवृ राम ४
द्धातुरैर्विना। बालादिविषये मत्स्ये अपराह्णे न मध्याह्ने मध्याह्ने न तु सं गवे। भुंजीत संगवे चेत्स्यान्न पूर्वं ९०

९२

---

भुजिमाचरेत्। शशिग्रहे यामत्रयापवादमाह वृद्धवसिष्ठः ग्रस्तोदये विधोः पूर्वं नाहर्भोजनमाचरेत् इ
ति। वेधांतरं हेमाद्रौ। त्रयोदशपादिनो वर्ज्या दिनानां नवकं ध्रुवं। अंगत्रेषु समस्तेषु ग्रहणे चंद्रसूर्ययोरिति
। अन्यत्रापि द्वादशादिस्तृतीयांतो वेधः खंडग्रहे स्मृतः। एकादशपादितः सौरे चतुर्थ्यंतः प्रकीर्तितः इदं संपू
र्णग्रहे। खंडग्रहे तु उभयोर्दिनत्रयं। अहं खंडग्रहे तयोरिति वचनात्। अत्र काम्योपवासमाह दक्षः अ
यने विषुवे चैव ग्रहणे चंद्रसूर्ययोः अहोरात्रोषितः स्नात्वा सर्वपापैः प्रमुच्यत इति। पुत्रवद्गृहस्थस्य
तु न भवति। संक्रांत्यामुपवासं च कृष्णैकादशिवासरे चंद्रसूर्य ग्रहे चैव न कुर्यात्पुत्रवान् गृहीति। अ ९५
त्र हेमाद्रिः यदा सूर्यस्य ग्रस्तास्तस्तदा पुत्रवद्गृहिणापि उपवासो न कर्त्तव्यः सापाह्ने ग्रहणं चेत्स्याद
पराह्णे न भोजनं। अपराह्णे न मध्याह्ने मध्याह्ने न तु संगवे इति मोक्षे उपवासस्येतरस्त्वौदित्याह। मा
धवस्तु तस्याथ भोजनमित्याह। युक्तं चैतत्। तस्य उक्तोपवासस्य निषेधोपमुदाहृतनिवासशोषेणादि
हित काम्योपवासस्यैव निषेधो नानुषंगप्राप्तस्यानानुषंगकृतो ग्रासात्योपतो नित्यमुपोषणामिति वाक्यात्

Indira Gandhi National Centre for the Arts

मस०
९१

।न नु तत्प्रयुक्तत्वं न तद्देशेन विहितत्वं किंतु तद्धेतुकत्वमात्रं तद्धेतुकत्वं चानुषंगप्राप्तेष्वप्युपवासेऽस्तीति चेत्
उच्यते। इह व्रतरूपोपवासस्यैव प्रतिषेधो नानुषंगप्राप्तस्य। तत्रैवोपवासपदस्य शक्तत्वात्। अन्यथो
पवासव्रतं चरेदित्यादिषु व्रतशब्दसाहचर्योक्तकल्पसिद्धावपि केवलोपवासे विधिषु संकल्पासिद्धेः।
भोजननिवृत्तावुपवासशब्दस्तु लाक्षणिकः। गौणमुख्ययोर्मुख्ये एव ग्रहणे चित्सत्तान्यायः। हरा भोज
ने प्रायश्चित्तमुक्तं कात्यायनेन। चंद्रसूर्यग्रहे भुक्त्वा प्राजापत्येन शुध्यति। तस्मिन्नेव दिने भुक्त्वा त्रिरात्रे
णैव शुध्यतीति। तस्मिन् दिने पूर्वोक्तप्रतिपादितया मात्सकवैधमध्ये इति। इति ग्रहणनिर्णयः। अथ
संक्रांतिर्निर्णीयते। तत्र नागरखंडे रवेः संक्रमणं राशौ संक्रांतिरिति कथ्यते। वसिष्ठः। अयने
द्वे विषुवे द्वे चतस्रः षडशीतयः। चतस्रो विष्णुपद्यश्च संक्रांत्यो द्वादश स्मृताः। मकरकर्कटसंक्रांती द्वे तू
दग्दक्षिणायने। विषुवती तुलामेषे गोलमध्ये ततोपराः। कन्यायां मिथुने मीने धनुष्यपि रवेर्गतिः। षडशी रम०
तिमुखी प्रोक्ता षडशीतिगुणाफलैः। वृषवृश्चिककुंभेषु सिंहे चैव यदा रविः। एतद्विष्णुपदं नाम विषुवाद ९१

---

९१

धिकं फलमिति वारर्क्षविशेषतः पुनरासां संज्ञात्वमुक्तं देवीपुराणे। मंदा मंदाकिनी ध्वांक्षी घोरा चैव महोदरी। राक्ष
सी मिश्रिता प्रोक्ता संक्रांतिः सप्तधा नृप। सूर्ये घोरा विधौ ध्वांक्षी भौमवारे महोदरी। बुधे मंदाकिनी नाम मंदा सु
रपुरोहिते। मिश्रिता शुक्रवारे स्याद्राक्षसी तु शनैश्चरे॥ तथा। मंदा ध्रुवेषु विज्ञेया मृदौ मंदाकिनी तथा। क्षिप्रे
ध्वांक्षी विजानीयादुग्रे घोरा प्रकीर्तिता। चरे महोदरी ज्ञेया क्रूरे स्याद्राक्षसी। मिश्रिता चैव निर्दिष्टा
मिश्रितर्क्षे च संक्रमः इति। ध्रुवाः शिरोरोहिण्युत्तरात्रयं च। मृदूनि रेवतीचित्रानुराधामृगाः। क्षिप्राश्विनी
हस्तपुष्याः। उग्राणि पूर्वात्रयं भरणी मघा च। चराणि धनिष्ठापुनर्वसुश्रवणस्वातीशततारकाः। क्रूराणि
ज्येष्ठार्द्राश्लेषामूलानि। मिश्रिता विशाखा कृत्तिके। आसु चयुरापतमः कालस्तत्रैवोक्तः। त्रिचतुःपंचस
प्तनवद्वादश एव च। क्रमेण घटिकास्त्वेतास्तासु पुण्यं पारमार्थिकमिति। वसिष्ठः। संक्रांतिसमयः सूक्ष्मो
दुर्ज्ञेयः पिशितेक्षणैः। तद्योगाच्चाप्यधश्चोर्ध्वं त्रिंशन्नाड्यः पवित्रिता इति। अधस्त्रिंशद्घूर्ध्वं च त्रिंशदिति केचि
त्। वस्तुतस्तु। अधः पंचदशोर्ध्वं च पंचदशेत्येवं त्रिंशदिति ज्ञेयं। तथा च देवीपुराणे। अतीतानागते भोगे ना

Indira Gandhi National
Centre for the Arts

मस० ९२ अः पंचदश स्मृताः इति। संक्रांतौ विहितमतिथिस्नानाध्ययनादेः पालनं भोगः जाबालः संक्रांतौ पुण्यकाल
स्तु षोडशोभयतः कला इति। कलानाम् एषां च वासिष्ठादिवाक्यानामविशेषात्सर्वसंक्रांतिपरत्वान्न
त्र चाल्पकालोक्तिः पुण्यातिशयोक्त्यर्थो न पुनर्नियमाय। अत एव शातातपः याः याः संनिहिता नाड्य
स्तास्ताः पुण्यतमाः स्मृता इति वसिष्ठः मध्ये तु विषुवे पुण्यं प्राग्विस्मो दक्षिणायने। षडशीतिमुखे ती
६५ तेऽतीते चोत्तरायणेति मध्ये उभयत इत्यर्थः अत्र च शब्दादुत्तरायणेऽनागतेपि पुण्यमिति हेमाद्रिः
तत्र प्रमाणं विमृश्यं ब्रह्मवैवर्ते। त्रिंशत्कर्कटके नाड्यो मकरे तु दशाधिका इति। स्कांदे। कुलीरे
विंशदेवाद्यो मकरे त्रिंशदुत्तरा इति। कुलीरः कर्कटः वसिष्ठः त्रिंशत्कर्कटके नाड्यो मकरे विंशतिः
स्मृता इति। गौतमः अर्वाक्षोडश नाड्यस्तु परतः षोडशैव तु। तास्वेव दक्षिणे पूर्वा अतीते चोत्त
र परा इति। अत्रापि न्यूनाधिकघटिकानां पूर्वोक्तैव व्यवस्था विज्ञेया वसिष्ठः वर्तमाने तुलामेषे ना रामस०
ड्यस्तूभयतो दशेति। बौधायनोपि। एवं विषुवति प्रोक्तं दश पूर्वा दश परे इति वसिष्ठः षडशीत्यां व्य ९२

२ व्यव

तीतायां षष्टिरुक्तास्तु नाडिका इति। षडशीत्याख्यानां च तस्य राणां संक्रांतीनामेकैकस्याः पंचदशायं च दशमेवं ष
ष्टिर्नाड्यः पुण्या इति हेमाद्रिः तथा च स्कांदे षडशीतिमुखे तीते नाड्यः पंचदश स्मृता इति केचित्। अपि हि रुक्ता
स्तु नाडिका इति पाठं कल्पयंति। अपि षोडशीत्यक्षरदसः षोडशाक्षरपादत्वादिति। तत्रैव पुराणे तु षड्विप्र
षडशीतिमुखे तथा तथा षडित्यर्थः वसिष्ठः पुण्यकालो विष्णुपद्याः प्राक्पश्चादपि षोडशेति। ब्रह्मवैवर्ते।
। विषुवेषष्ठहूर्ते स्यात्षडशीतिमुखेत्रयं तथा विष्णुपदे त्रीणि पुण्यानि कवयो विदुरिति। एवमुक्तन्यूना
धिकपक्षाः पुण्यपुण्यतरपुण्यतमत्वेन व्यवस्थाप्याः याः याः संनिहिता नाड्यस्तास्ताः पुण्यतमाः स्मृता इति पू
र्वोदाहृतशातातपवाक्यात्पूर्वभोगिन्यां सूर्योदयोत्तरमुत्तरभोगिन्यां तदस्तात्पूर्वमसंध्यावधानेन न प्रमानाया ना ४
दिवावच्छेदेन स्नानादिपर्याप्तः कालो न लभ्यते तदा पूर्वभागावच्छिन्नस्योत्तरभागावच्छिन्नस्य वा संपूर्णदिन
स्यैव पुण्यत्वं न प्रयाप्तकालवत्योः पूर्वोत्तरराज्योः आह हि संक्रमणोत्क्रमणं हः पुराणैः प्रकीर्तितं। रात्रौ संक्रमणे
भानौ दिनार्द्धं स्नानदानयोरिति ह्यद्ववसिष्ठवाक्यं तत्। अत्र हि पूर्वोर्द्धं कृत्स्नस्यान्हः पुण्यत्वविधानादेव रात्रौ स्ना

Indira Gandhi National Centre for the Arts

नादि प्रतिषिध्यतेऽन्यथा सर्वे संक्रांतिसाधारणा पूर्वोत्तरपुण्यत्वविधानादेवंतत्सिद्धेरेतस्य वैयर्थ्यापत्तेः
मस० नादिप्रतिषिध्यतेऽन्यथासर्वेसंक्रांतिसाधारणापूर्वोत्तरपुण्यत्वविधानादेवतत्सिद्धेरेतस्य वैयर्थ्यापत्तेः संभवान्
९३ पूर्वभागमाशास्तस्योत्तरस्य चतस्यविषयोमध्याह्नादिसंक्रमएवतत्राहेत्येवप्रशस्तयोस्तयोः संभवात्
गो भिलः रात्रौसंक्रमणेभानोर्दिवाकुर्यात्तुतत्क्रियां। पूर्वस्मात्परतोवापिमत्यासन्नेऽस्तमेलांत्रयेदंश
त्रादधस्तस्मिन्मध्याह्नस्योपरिक्रिया। ऊर्ध्वसंक्रमणेचोर्ध्वमुदयात्प्रहरद्वयं। पूर्णेचेदर्द्धरात्रेतुयदास
क्रमतेरविः प्राहुर्दिनद्वयंपुण्यंमुक्त्वामकरकर्कटावितिमध्याह्नेऽर्वाक् तत्रोदपश्च पूर्वोत्त
रदिनयोः संनिधानलाभात्। दिनद्वयमध्यर्द्धमेवत्तेपं। सत्रौसंक्रमणेभानोर्दिनार्द्धस्नानदानयोरिति
सामान्यतोरात्रिसंक्रमदिनार्द्धपुण्यत्वस्यैवोक्तत्वात्। गार्ग्यः कालेन्यूनेर्द्धरात्रेतुयदासंक्रमणंरवेः
नदहः पुण्यमित्युक्तंगार्ग्यगालवगौतमाः देवीपुराणे। संपूर्णेत्वर्द्धरात्रेतुउदयेत्समयेपिवामानार्द्ध
भास्करेपुण्यंत्वपूर्णेशर्वरीदलेसंपूर्णेत्वर्द्धरात्रेनिशीथेरत्वर्थः उदयात्समयशब्दौप्रातःसायंसंध्योप राम० ९३
लक्षकौ। अपूर्णेशर्वरीदलेसायंप्रातःसंध्योत्तरपूर्वभागयोरित्यर्थः योगीनलक्षणयावाभास्क

रोदिवसः निशीथेसायंप्रातःसंध्ययोस्तदुत्तरपूर्वभागयोश्चसंक्रमणेदिनार्द्धपुण्यमित्यर्थः कस्यदिन
स्याद्र्धमित्यपेक्षायामुक्तंतत्रैव। अर्द्धरात्रेत्वसंपूर्णेदिवापुण्यमनागतं। संपूर्णेतूभयोर्दयमतीते
केपरेहनि। अत्रासंपूर्णार्द्धरात्रशब्देनसायंसंध्यानिशीथपूर्वभागश्चगृह्यते अत्रसंक्रमणेनो
गतमतीतमित्यर्थः तद्दिवामानार्द्धपुण्यंतच्चोत्तरंसंनिधानात्। संपूर्णेर्द्धरात्रेनिशीथरत्वर्थः तत्रसं
क्रमणेतूभयोः पूर्वोत्तरदिनयोस्तत्पूर्वमानार्द्धपुण्यं। अनिरेकोर्द्धरात्रात्परतः संध्यायांवासंक्रमे
गोपरेहन्याद्यमानार्द्धपुण्यमित्यर्थः संपूर्णेतूभयोरित्यत्रव्यवस्थाप्युक्तातत्रैव। आदौपुण्यंविजानी
यादघमिन्त्रलिपिर्भवेत्। अर्द्धरात्रेव्यतीतेतुविज्ञेयमपरेहनीति। पूर्वदिनोत्तरवर्त्तितिथ्यर्द्धरात्रि
संक्रमणकालीनातिथिर्यद्यभिन्नास्यात्तदातदित्यर्थः सिद्धांव्यतीतेत्वर्द्धरात्रेपूर्वदिनतिथ्यभेदेपिपरे
घुरेवेतिपक्षत्वर्द्धरात्रतिथिर्दिनद्वयार्द्धयोरपिस्यात्तत्तपूर्वभागिनीषुपूर्वदिनोत्तरार्द्धमुत्तरभागिनीषु
उत्तरदिनाद्यार्द्धमुभयभोगिनीष्वेच्छिकोविकल्पः एवमयनातिरिक्तसंवत्सरसंक्रमणेदिनार्द्धपुण्य

Indira Gandhi National
Centre for the Arts

मस० त्वेष्यितेविषुयघांधनुर्मीननृपुकन्यासुवेपदा। पूर्वोत्तरगतंरात्रौभानोःसंक्रमणंभवेत्। पूर्वाह्ने पंचना
६४ घस्तुपुण्याःप्रोक्तामनीषिभिः। अपराह्ने चपंचैव श्रौतेस्मार्तेचकर्मणीति। विघाभ्यंतनसुरण्यातिशयदर्शना
र्थे। केचित्वासन्नसंक्रमंपुण्यंदिनार्द्धत्वानदानयोः। रात्रौसंक्रमणेभानोर्विषुवत्स्ययनेदिनइतिवे
त्रोक्तिकपञ्चयाप्यवचनात्सामान्याविषयं [redacted]
[redacted] दिनार्द्धवचनंविषुवद्विषयमित्याहुः। विषुवतिसं
क्रमेरात्रौसतिदिनार्द्धमपनेतुंदिनमितिवाक्यस्यार्थः। वस्तुतस्तुपघत्रविषुवतिदिनार्द्धपुण्यत्वंविधिः
४ नदास स्यात्तथा। नत्वेवं। किंतु। विषुवतिसामान्यवाक्यमात्रमर्थमनूद्यायनेदिनार्द्धयवादेन
संपूर्णदिनपुण्यत्वंविधीयते। यद्वा यथादृष्टयोगसर्वसंक्रांतिषुसामान्यतोदिनार्द्धपुण्यत्वंविधायां
त्सयादेनविषुवत्स्ययनयोःसंपूर्णदिनपुण्यत्वविधीयतेइति। पद्वादिनेइतिपाठः भानोरयनेरात्रौजाते एम४
सतिदिनेदिनमध्येदिनार्द्धपुण्यमित्येवाञ्चेतिनत्वासन्नसंक्रमणमिति। अतएवमाधवीयोक्तरे। मिथुनात्कर्कसं ६४

क्रांतिर्यदिस्याद्दंशुमालिनःप्रभातेवानिशीथेवाकुर्यादहनिपूर्वतः। कार्मुकंतुपरित्यज्यझषंसंक्रमतेरविः। प्रदोषे
वार्द्धरात्रेवास्नानंदानंपरेहनीति। बौधायनोपि। अस्तंगतेसवितरिमकरंयातिभास्करः। प्रदोषेवार्द्धरात्रेवा
स्नानंदानंपरेहनि। अर्द्धरात्रेतदूर्द्ध्वंवासंक्रांतौदक्षिणायने। पूर्वमेवदिनंग्राह्यंयावन्नोदयतेरविरिति। अत्रतुवे
। अदिनरतिष्ठेदः अयनेरात्रौजातेसतिअदिनेरात्रावेवपुण्यमितितदर्थः। तच्चनागरखंडादिपरं। तेषांतथाचारा
त्। अतएवमाधवः कर्कटमकरेरात्रावपवादस्तुष्ठितिरिति। माधवस्तुदिनसंतिदिवेतिवापाठमभिप्रेत्यविषु
वतिरात्रौजातेदिनार्द्धपुण्यमयनसंक्रमणोदिवाजातेसतिद्विवादिनार्द्धपुण्यंकर्केपूर्वार्द्धमकरेत्तरार्द्धम
नच्चमध्यंदिनायनविषयमितिव्याचख्यौ। ननुबौधायनीयेःस्तंगतइत्यनेनप्रदोषार्द्धरात्रयोर्लब्धत्वात्तयोःकु
ग्रहणमनर्थकमितिचेन्न। अस्तंगतइत्येवोक्तेदिनांतरस्यपुण्यतोक्तिः। प्रत्यासन्नेरपररात्रविषयपरायेवस्या
त्तद्वारणायप्रदोषार्द्धरात्रग्रहणस्यसार्थकत्वात्। धनुर्मीनावतिक्रम्यकन्यांचमिथुनंयदा। पूर्वापररविर्भागेन
रात्रौसंक्रमतेरविः। दिनांतेपंचनाड्यस्तुतदापुण्यतमाःस्मृताः। उदयेचतथापंचदैवेपित्र्येचकर्मणीति। रात्रौ
धनुरतिक्रम्यपूर्वभागेसंक्रमेउदयेपंचना तथारात्रौमिथुनमतिक्रम्यापरभागेसंक्रमेदिनांतेपंचनाड्यः

अ:३

Indira Gandhi National
Centre for the Arts

स्मस॰ २५ रतिसामान्यतो बौधायनवाक्येन पुराणप्रोक्तो पुराणपतनमलबोधकं। तेनमकरेस्य पोसादूर्ध्वं यदाकदाचिज्जातेत
नरदिनप्रदर्दुपुण्य। आद्याः पंचघटिकाः पुण्यतमाःकर्केचोदयात्पूर्वं यदाकदाचिज्जाते पूर्वेदिनेह बौजरा
दुपुराणं। अन्त्याः पंचघटिकाः पुण्यतमाइतिबौधायनवाक्य हतनिर्णयानुरोधेनात्कांदंभं त्वाव्याचारखुलाते
चरराणः केचित्त्वातिक्रमरागरूपासंक्रमरागहयाचेति द्वेक्रियोतत्र धनुरादीनामतिक्रमरात्क्रियायां क
मेलस्पेतद्वासस्पायनविषुवपरतया बौधायनभविष्योत्तरवचोविरोधः स्यात्। स्याद्युमधानसंक्रमरात्क्रिया
कमोध्याहारः अतोधनुरादीनांप्रधानसंक्रमरात्क्रियायामेवकर्मत्वं अतिक्रमरात्क्रियायांतु वृश्चिकादी
नांतिननस्यदानामेवाध्याहारः अतो वृश्चिककुंभसिंहवृषातिक्रमेण धनुरादिषडशीतिसंक्रमपर
मेनहुसंनायनविषुवपरंतेननकोपिविरोधः अतएव षडशीत्यांवपरतयाधनुर्मीनमकरकर्कस्यास्तु वे
यदापूर्वेऽजरात्तरात्रौभानोः संक्रमणंभवेत्तदा पूर्वाह्णेपंचनाड्यस्तु पुण्याः प्रोक्तामनीषिभिः अपराह्णेतु पंचैव प्रो रामं॰
नेस्मार्तेचकर्मशीतिनामवचनेकवासनास्पष्टेवभवति। वस्तुतस्तु बौधायनेनापनयोर्विषये षट्दिनपुण्य २५
त्वोन्मवपिक्तोदूतसंतिकस्पादिनेयिपुण्यतावोध्यते। तेनोभयदिनेपिहमुक्तितेपुण्यकालेनकोपिविरोधः

२१

तेनेस्कांदस्यखारसिकोवव्याख्यायुक्तेतिममप्रतिभाति। इतिसंक्रांतिनिर्णयः अथसंक्रांतिकृत्यं। नागरखंडे रवेः
संक्रमणंराशौसंक्रांतिरितिकथ्यते स्नानदानतपः श्राद्धहोमादिषुमहत्फलं। आपस्तंबः अयनेविषुवे चैवयु
हसोवंद्रसूर्ययोः अहोरात्रोषितः स्नातः सर्वपापैः प्रमुच्यते अत्रच वद्धहस्यातिथिकविषयो आदित्ये
हेतिसंक्रांतौग्रहणेचंद्रसूर्ययोः उपवासोनकर्तव्योग्रहिणापुत्रिणातथेतिलस्पत उपवासनिषेधा
त्पातुरत्वेरलालात्व होरात्रभोजननिषेधः स पुत्रवंतमपि गोचरयतिसतहूचनाम वृत्तेः स्कंदं हिवचनं
नियमोव्रतमस्त्रीतवोपवासादिपुण्यकमितिकोशगटुपवासस्यव्रतरूपत्वादगमाद्विहितसर्वव्रतात्मक
उपवासेमवर्जते। ननुनिषेधप्रवृत्तिमात्रेणाहोरात्रभोजनाभावमात्रेवसत्रतलक्षण्या भावादितिद्वे
नतिर्णापितातचरणाः शातातपः रविसंक्रमणोप्राप्तेनस्नायाद्यस्तुमानवः सप्तजन्मानिरोगीस्यान्निर्ध
नश्चैवजायतेयानिदत्तानिहव्यकव्यानिदातृभिः तानिनित्यं ददात्यर्कः पुनर्जन्मनिजन्मनि। वसिष्ठः तिर
अयनेषुचयवृत्तेषडशीतिमुखेषुवा। चंद्रसूर्योपरागेचदत्तंभवतिचाक्षयं। अयनेकोटिपुण्यंचलक्षंविष्णु

व

२. संक्रांतौ

Indira Gandhi National
Centre for the Arts

मस॰
९६ पदीफलं। षडशीति सहस्रंतु षडशीत्यां स्मृतं बुधैः। शतमिंदुक्षये दानं सहस्रंतु दिनक्षये। विषुवे शतसाहस्रंव
तीपाते त्वनंतकं। वृद्धेव।सिष्ठः। अयने विषुवे चैव त्रिरात्रोपोषितः पुमान्। स्नात्वा यो वै यजेद्भानुं स वै काम
फलं लभेत्। ब्रह्मपुराणे। शुक्लपक्षे तु सप्तम्यां यदा संक्रमते रविः। महाजयाने दा सा वै सप्तमी भास्करप्रिया। स्ना
नं दानं तपो होमः पितृदेवादिपूजनं। सर्वं कोटिगुणं प्रोक्तं तयनेन महो असांप स्ससां मान वोभन्या घृतेन स्नाप
ये द्रविं सोऽश्वमेध फलं प्राप्य ततः सूर्यपुरं व्रजेत्॥ पयसा स्नापयेद्यस्तु भास्करं भक्तिमान्नरः विमुक्तः सर्वपापेभ्यो
याति सूर्यसलोकतां मयैषा कथिता पुराणा सप्तमी त्रिपुरांतकं याम पोध्य नरो भक्त्या चलान्मगलान लभेत्
।संक्रांति विशेषेण देयद्विशेषमाह विश्वा मित्रः। मेषसंक्रमणे भानोर्मेषदानं महाफलं। वृषसंक्रमणे
दानं गवां प्रोक्तं तथैव च। वस्त्रान्न पान यानानि मिथुने विहितानि तु। घृतधेनुप्रदानं तु कर्कटे परिशस्य
ते। ससुवर्णा तपत्र दानं सिंहे च विहितं सदा। कन्याप्रवेशे वस्त्राणां सुरभीणां तथैव च। तुलाप्रवेशे धान्यानां
वीजानामेव चोत्तमं। कीटप्रवेशे वस्त्राणां वेश्मनां दानमेव च। कीटो वृश्चिकः। धनुःप्रवेशे वस्त्राणां यानानां रामं॰ ९६

च महाफलं। मकरप्रवेशे दारूणां दानमग्नेस्तथैव च। कुंभप्रवेशे दानं तु गवामंबुतृणस्य च। मीनप्रवेशे स्नानमाल्यानाम
पि चोत्तमं। दानान्येतानि मया मुनींद्रः प्रोक्तानि काले तु नरः प्रदत्वा प्राप्नोति कामं मनसस्त्वभीष्टं न स्यात्प्रसंतति हि
कालदानं। स्कांदे धेनुं तिलमयीं राजन् दद्याद्यश्चोत्तरायणे। सर्वान्कामानवाप्नोति विंदते परमं सुखं। विष्णु
धर्मोत्तरे। उत्तरे त्वयने विप्रा वस्त्रदानं महाफलं। तिलपूर्णमनड्वाहं दत्वा रोगैः प्रमुच्यते। कालिकापुरा
णे। कनकं कुलिशं नीलं पद्मरागं च मौक्तिकं। एतानि पंच रत्नानि रत्नसेदैवसम्मते नि। रत्नानां चाप्यभावे
च कर्षं कर्षार्धमेव वा। सुवर्णं योजयित्वा तु तस्मिन्नेवोत्तरायणे। विधिवस्तु तपाभ्यर्च्य गजेनान्येन भूरिणा प्र
स्थाल्यमर्दयित्वा तु मदद्याद्दूतकवलं। दत्वा चोपस्करं भूयो ब्राह्मणानतिथिभिः सह। संभोज्य दक्षयित्वा तु क
ल्पयेदन्न वारिनिम। कुलिशं हीरकं। देशयित्वा दृ। स्त्रिणा पासं पोजकल्पये द्रूजनमिति शेषः। उपोष्य सर्वे
मेवैनं कुर्पीभक्ति समन्वितः। पंचगव्यं तिलैर्युक्तं पीत्वा वै पारयेद्बुधः। तांतिलैः स्नानं प्रकुर्वीत नैरेवोद्वर्तनं
तु धूपदेवतानां। पितृणां चव उभाभ्यां तु येसनं तथा पारयेत्मारणां कुर्वीत। तिलस्नान पारणायोर्नोत्तरक्रमो विव
क्षितः। उभाभ्यामिति तादृश्यं चतुर्णां होमं तैश्च प्रकुर्वीत सर्वदेवोत्तरायणे। तान्येदेवापापितृभ्यो हाटकेन

Indira Gandhi National
Centre for the Arts

मस० ८० समं द्रदेव। यत्ताद्देवकरो सेवं विनंशंभौ निवेश्ययः उत्तरायणमासाघनरः कस्मात्तच्छोच्यते॥ इति संक्रांतिकृत्यं। अथ पक्षः स च द्विविधः शुक्लः कृष्णश्च। चंद्रकलावृध्युपलक्षितः शुक्लपक्षः चंद्रकलाक्षयोपलक्षितः पक्षः कृष्णः स तु दैवे शुक्लः पित्र्ये कृष्णः तदाह माधवः दैवे मुख्यः शुक्लपक्षः कृष्णोपि त्वविशिष्यते इति। श्रुतिः तो पूर्वपक्षश्चापरपक्षश्चाभवेतां पूर्वपक्षं देवा अन्वसृज्यंत। अपरपक्षमन्वसुरा इति पक्षनिर्णयः। अथ मासः तत्र मस्यते परिमीयते चंद्रवृद्ध्यादिनेति व्युत्पत्त्या मासशब्देन रूप्याभिधेयः स त्रेधा। चांद्रः सावनः सौरश्चेति तदुक्तं माधवीये ब्रह्मसिद्धांते चांद्रः शुक्लादिदर्शांतः सावनस्त्रिंशता दिनैः एकराशौ रविर्यावत्कालं मासः स भास्कर इति। नाक्षत्रमपि मासं केचिदिच्छंतीति माधवीये मदनरत्ने च। एते चांद्रादयो मासा हव्ये नियोगिनः सौरो मासो विवाहादौ यज्ञादौ सावनः स्मृतः श्राद्धिके पितृकार्ये च चांद्रो मासः प्रशस्यते। तत्र चांद्रमासश्चांद्र एव मुख्यः तदुक्तं ब्रह्मसिद्धांते। अमावास्यापरिच्छिन्नो मासः स्याद्रूढतास्तु संक्रांतियोगमासाहीप्यांत पैव नृपवैश्ययोः पितामहोपि राम० ८० देवकर्मणि पित्र्ये च मासश्चांद्रमसः स्मृत इति। यतिधर्मप्रकरणे तु अनुसंधिषु वा पर्वे इति वचनात्

पूर्णिमायां वपनं कुर्वंतीति तस्माद्दर्शांतत्वपूर्णिमांतत्वयोः समो विकल्पो वपने न अनुष्ठाने तु तत्र तत्र व्यव
न विशेषाच्छिष्टाचाराच्च व्यवस्थेति माधवः दर्शांतानां पूर्णिमांतानां च मासविशेषाणां चैत्रादिसंज्ञा
नक्षत्रप्रयुक्ताः तस्मिन् पौर्णमासीति संज्ञायामित्यनुशासनात्। तेन यस्मिन् मासे पौर्णमा चित्रायुता
स चैत्रः एवं वैशाखादयोपि। इति मासनिर्णयः अथ चैत्रकृत्यं भविष्ये ज्वरे चैत्रे त्रिरात्रं न कः शाकं घातो
त्वा दद्यात्तिपः अजाः पंचपयस्विन्यो दरिद्राय कुटुंबिने। न जायते उनरसो जीवलोके कदाचन। तत्रैवाचै
त्रे मासे तु संप्राप्ते यः कुर्यादेकभोजनं। पिष्टं तु पयसा युक्तं भुंजानः शालिसंभवं। पूजयेत्पार्वतीं भक्त्या
कृत्वा वै चंदनस्य च गंधपुष्पोपहारैश्च विशेषात् भुजसंमितां दीं ज्वालामुखीं नाम्नीं कुंकुमागरुचंदनैः।
धूपं मागागरुकर्पूरं भगवत्यै निवेदयेत्। वामनपुराणे। चैत्रे मासि विचित्राणि शयनान्यासनानि च। विप्रो
प्रीत्यर्थमेतानि देयानि ब्राह्मणेभ्यो घृतान्नसेवर्जं पित्वाम चोपलतु दधिक्षीरघृतेक्षवं। दद्याद्वस्त्राणि
सूक्ष्माणि रसवस्त्रयुतानि च। संपूज्य विप्रमिथुनं गौरी मे प्रीयतामिति॥॥ इति चैत्रकृत्यं॥ ॥ अथ वै

Indira Gandhi National
Centre for the Arts

मह॰ ९८

शाखकृत्यं ॥ ॥ विष्णुस्मृतौ । तुलामकरमेषेषु प्रातःस्नायी भवेन्नरः । हविष्यं ब्रह्मचर्यं च महापातकनाश
नमिति । पद्मपुराणे । वैशाखे विधिना स्नानं देवनद्यादिके बहिः । हविष्यं ब्रह्मचर्यं च भूशय्या नियमस्थितिः
व्रतं दानं दमो देवि मधुसूदनपूजनं । अपि जन्मसहस्रोत्थं पापं दहति दारुणमिति । तथा । मधुमासस्य शुक्
लायां एकादश्यामुपोषितः । पंचदश्यां च भो वीर मेषसंक्रमणे तु वा । वैशाखस्नाननियमं ब्राह्मणानामनु
ज्ञया । मधुसूदनमभ्यर्च्य कुर्यात्संकल्पपूर्वकं । मंत्रस्तु । वैशाखं सकलं मासं मेषसंक्रमणे रवेः । प्रातः सनि
यमः स्नास्ये प्रीयतां मधुसूदनः । मधुहंतुः प्रसादेन ब्राह्मणानामनुग्रहात् । निर्विघ्नमस्तु मे पुण्यं वैशा
खस्नानमन्वहं । माधवे मेषगे भानौ मुरारे मधुसूदन । प्रातःस्नानेन मे नाथ फलदो भव पापहृदितिर
त्युच्चार्य विधिवत्स्नायात् । एवं स्नानाशक्तौ न त्रैव । त्रयोदश्यां चतुर्दश्यां वैशाख्यां वा दिनत्रये । अपि सम्
ग्विधानेन नारी वा पुरुषोपि वा । प्रातः स्नातः सुनियमः सर्वपापैः प्रमुच्यते इति । तथा । कंडूयपृष्ठतो एमठ
गां तु स्नात्वा पिप्पलतर्पणं । कृत्वा गोविंदमभ्यर्च्य न दुर्गतिमवाप्नुयात् । पिप्पलतर्पणं पिप्पलमूलसेचनं ९८

॥ अर्चने विशेषस्तत्रैव । माधवं सकलं मासं तुलस्यां योर्चयेन्नरः । त्रिसंध्यं मधुहंतारं नास्ति तस्य पुनर्भव इति । मारतो नि
स्तरेदेकभक्तेन वैशाखे यो जितेन्द्रियः । प्रातःस्नायी नरः स्त्री वा जातीनां श्रेष्ठतां व्रजेत् । वामनपुराणे । वैशा
खे पुष्पलवणं वर्जयित्वा च गोप्रदः । भूत्वा विष्णुपदे कल्पं स्थित्वा राजा भवेदिह । नृसिंहप्रसादे पद्मपुरा
णे । तीर्थे चानुदिनं स्नानं तिलैश्च पितृतर्पणं । दानं धर्मघटादीनां मधुसूदनपूजनं । माधवे मासि कु
र्वीत मधुसूदनतुष्टये । अपरार्के वामनपुराणे । गंधाश्च माल्यानि तथा वैशाखे सुरभीणि च । देयानि द्वि
जमुख्येभ्यो मधुसूदनतुष्टये । उद्यापनं च तत्रैवोक्तं । मासमेकं बहिः स्नात्वा नद्यादौ विमले जले । एकादश्यां
४ म वा द्वादश्यां पौर्णमास्यामथापि वा । उपोष्य नियतो भूत्वा कुर्यादुद्यापनं बुधः । मंडपं कारयेदादौ कलशं तत्र
विन्यसेत् । निष्केण वा तदर्धेन तदर्धार्धेन वा पुनः । शक्त्या वा कारयेद्देवं सौवर्णं लक्षणान्वितं । लक्ष्मीयु
तं जगन्नाथं पूजयेद्वसनैर्बुधः । भूषणैर्वाहनैः पुष्पैर्दीपैर्नैवेद्यसंचयैः । एवं संपूज्य विधिवद्रात्रौ जाग
रणं चरेत् । श्वोभूते कृतमैत्रोथ ग्रहवेद्यां ग्रहान्यजेत् । होमं कुर्यात्प्रयत्नेन पायसेन विचक्षणः । तिला

Indira Gandhi National
Centre for the Arts

म.स० ९९

ज्येनयवैर्वापि सर्वैर्वापि स्वशक्तितः। अष्टोत्तरसहस्रं वा शतमष्टोत्तरं तु वा। प्रातर्विष्णुरूपेनैव रदंविष्णुरूपेन वा। व्र
तसंपूर्तिसिद्ध्यर्थं धेनुमेकां पयस्विनीं पादुकोपानहौ छत्रं गुरवे व्यजनं तथा। शय्यां सोपस्करां दद्याद्दीपिकां द
र्पणं तथा॥ ब्राह्मणान् भोजयेत् त्रिंशत्तेभ्यो दद्याच्च दक्षिणां। कलशं जलपूर्णं तु तेभ्यो दद्याच्च वां तथा। एवं कृ
ते माधवस्य उद्यापनविधौ शुभे। फलमाप्नोति सकलं विष्णुसायुज्यमाप्नुयात्। वैशाखस्य मलत्वेपि न त्रैवत्ता नादि
समाप्यमिति हेमाद्रिमदनौ। तथा च काठकगृह्ये। आरब्धं मलमासात्प्राक् यत्काम्यमसमापितं। संप्राप्ते मलमासे
पि तत्समाप्यमसंशयमिति॥ इति वैशाखोद्यापनविधिः इति वैशाखकृत्यं। अथ ज्येष्ठकृत्यं। भविष्योत्तरे। पि
ष्टेन पंकजं कृत्वा ज्येष्ठमासि सिते दृढं। पुष्पैः संपूज्य गंधाद्यैर्नानावस्त्रविभूषितैः। वर्षकोटिपर्यंतं सार्धं सूर्यलो
के महीयते। पंकजो ब्रह्मा वामनपुराणे। उदकुंभांबुधे तुभ्यं तालवृंतं च चंदनं॥ त्रिविक्रमस्य प्रीत्यर्थं दातव्यं
ज्येष्ठमासि च॥ इति ज्येष्ठकृत्यं। अथाषाढकृत्यं। वामनपुराणे। उपानद्युग्मं छत्रं लवणामलकानि च। आ राम ४
षाढे वामनसंप्रीत्यै दातव्यानीह भक्तितः। भारते। आषाढमेकभक्तेन स्थित्वा मासमतंद्रितः बहुधान्यो बहुधनो ९९

वामन १

बहुपुत्रश्च जायते। इत्याषाढकृत्यं। अथ चातुर्मास्यव्रतानि। भविष्योत्तरे। स्त्री वा नरो वा मद्भक्तो धर्मार्थं सुदृढव्रतः। गृह्णी
यान्नियमानेतान् दंतधावनपूर्वकान्। तेषां फलानि वक्ष्यामि तत्कर्तॄणां पृथक्पृथक्। मधुरस्वरो भवेद्राजा गु
डवो गुडवर्जनात्। तैलस्य वर्जनाद्राजन् सुंदरांगः प्रजायते। कटुतैलपरित्यागात् शत्रुनाशमवाप्नुयात्। तथा
योगाभ्यासी भवेद्यस्तु स ब्रह्मपदमाप्नुयात्। कटुकाम्लतिक्तमधुरक्षारकषायरसं च यः। यो वर्जयेत्स वैरूप्यं
दौर्गंध्यं नाप्नुयात्क्वचित्। तांबूलवर्जनाद्भोगी रक्तकंठश्च जायते। घृतत्यागात्सुलावण्यं सर्वस्निग्धतनुर्भवेत्।
फलत्यागाच्च मतिमान् बहुपुत्रश्च जायते। शाकपत्राशनाद्रोगी अपक्वादो मलो भवेत्। पादाभ्यंगपरित्या
गाच्छिरोभ्यंगविवर्जनात्। दीप्तिमान् दीप्तकरणो यक्षोद्रव्यपतिर्भवेत्। दधिदुग्धतक्रनियमो गोभक्तो गोप
तिर्भवेत्। इंद्रातिथित्वमाप्नोति स्थालीपाकस्य वर्जनात्। लभते संततिं दीर्घां तैलपक्वविवर्जनात्। भूमौ प्रस्त
रशायी च वीरो मुनिवरो भवेत्। सदा मुनिः सदा योगी मधुमांसस्य वर्जनात्। तथा। एकांतरोपवासेन ब्र
ह्मलोके महीयते। मौनव्रती भवेद्यस्तु तस्याज्ञास्खलिता भवेत्। भूमौ भुंक्ते सदा यस्तु स स्यात्पृथ्व्याः पतिर्भवे

Indira Gandhi National Centre for the Arts

म.स० ता। नमो नारायणायेति जपन्नन्तफलं लभेत्। पादाभिवंदनाद्विष्णोर्लभेद्गोदानजं फलं। विष्णुपादांबुसंस्पर्शाद्दि
१०० न पापात्प्रमुच्यते। पादोदकाभिषेकाद्वै गंगास्नानं दिने दिने। विष्णुदेवकुले कुर्यादुपलेपनमार्जनं। कल्पस्था
यी भवेद्राजा स नरो नात्र संशयः। प्रदक्षिणाशतं यस्तु करोति स्तुतिपाठकः। हंसयुक्तविमानेन स च विष्णुपु
रं व्रजेत्। गीतवाद्यकरो विष्णोर्गांधर्वं लोकमाप्नुयात्। नित्यं शास्त्रसमाख्यानाल्लोकान्स्वल्पप्रबोधयेत्। व्या
सलक्ष्म्यानितस्याप्यु विष्णुलोकं स गच्छति। कृत्वा प्रेक्षणकं विष्णोर्लोकमप्सरसां व्रजेत्। तीर्थाम्बुस्नपनाद्विष्णो
र्निर्मलं ज्ञानमाप्नुयात्। पंचगव्याशनात्सार्धं चांद्रायणफलं लभेत्। अयाचितेन प्राप्नोति पुत्रधर्मानशेषतः
षष्ठान्नकालभोक्ता यः कल्पस्थायी भवेद्दिवि। उपवासहृयां नित्यनक्तः शिलोंछेन तु भुंजानः प्रयागस्ना
नमाप्नुयात्। पर्णभुग्यो नरो भुंक्ते कुरुक्षेत्रफलं लभेत्। यामद्वयं जलस्थायी न नरो गैरभिभूयते। गुडव
९२ र्जी मतो दद्यात्पूर्णं ताम्रभाजनं। सहिरण्यं पयश्चैव स्थूलवराप्याख्यं विधिः व्रजसुवैवर्ज्ये। एकभक्तं नरः कृत्वानि राम० १००
त्याहाराद्देवव्रतः योर्चयेच्चतुरो मासान्वासुदेवं सनातनं। पद्मसु पृ हृषीकेशोनक्रमाचरनेव्रतीवस्त्रयुगमन

रोद्दत्वा शिवलोके महीयते। अश्वयुक्पवर्जनं कृत्वा भोजने व्रतमाचरेत्। कार्त्तिके स्वर्णगोधूमान्वस्त्रं दत्वाश्वमेधमाक्रात्र
न्नं दत्वा च विप्राय ब्रह्मलोकमवाप्नुयात्। एकांतरोपवासेन विष्णुप्रजननतत्परः। गां दत्वा वासुदेवस्य लोके संपूज्यते
नरः। पक्षसुप्ते हृषीकेशे सितिशायी भवेन्नरः। शय्यां सोपस्करां दत्वा इंद्रलोके महीयते। वार्षिकांश्चतुरो मासान्मघं
मांसं च यस्त्यजेत्। स्वर्णगोदोहासमुद्दिश्य स भवेद्दूरविद्विजः। स्नपयेत्प्रपूपादेन आयाचा दाद्विचतुष्टयं। विष्णुप्रजन
कृत्स्नः सभवेन्नन्त्रिकेतनं। व्रतांते कृसंतं मेवा समासोमो जपेद्विप्रान्वभक्त्या दद्याच्च दक्षिणां तथा। सममा प्ते
गोयु रं दद्यात्दत्वा विप्राय भोजनं तथा। समासो गोवृषं दद्याद्वास्त्रकांचनसंयुतं तथा। व्रतांते च तथा द
द्या हामे कांचनपायसिनीं तथा। वस्त्रयामं स मासे तु वस्त्रं दद्याद्विजायेत इति। तथा। व्रतांते विप्रमिथुनं प्रजे
धेनु समन्वितां वृक्षानूद्धिरण्ययानं दद्यात्सोश्वमेधफलं लभेदिति। एतेषां च पक्षाणां शक्तितो व्यवस्था चा
तुर्मास्ये निषिद्धास्तु कार्या विप्र विशोन्नरः। सुप्ते यस्मिन्निवर्त्तंते क्रियाः सर्वाः शुभोदयाः। विवाहव्रतबंधादिचू
डा संस्कारदीक्षणं। यज्ञगृहप्रवेशाश्च प्रतिष्ठा देवभूभृतां। पुराणानि यानि कर्माणि न स्युः सुप्ते जनार्दने। वीक्ष

Indira Gandhi National
Centre for the Arts

म०स० १०९

गामपूर्वदेववीक्षणं पुराणानि कर्माणि ज्योतिष्टोमादीनि। इति चातुर्मास्यविधिः। अथ नदीनां रजोदोषः। त
त्र तावन्नद्यो द्विविधाः महत्योऽल्पाश्चेति। तत्र याश्च महत्यस्ता पुराणे। गोदावरी भीमरथी तुंगभद्रा च वेणिका। ता
पी पयोष्णी विंध्यस्य दक्षिणे तु प्रकीर्तिताः। भागीरथी नर्मदा च यमुना च सरस्वती। विशोका च वितस्ता च वि
ध्यस्योत्तरतः स्थिताः। द्वादशैता महानद्यो देवर्षिक्षेत्रसंभवा इति। एतदन्यास्त्वल्पाः। तत्राप्यल्पा गर्त्ताः। तथा
च स्मृतिसंग्रहे। धनुःसहस्राण्यष्टौ च गतिर्यासां न विद्यते। न ता नदीशब्दवहा गर्त्तास्ते तु प्रकीर्तिता इति
।तत्र महत्सु भविष्योत्तरे। आदौ तु कर्कटे देवि महानद्यो रजस्वलाः। त्रिदिनं तु चतुर्थेऽह्नि शुद्धास्स्युर्जाह्नवी य
थेति। देवलः। गंगा च यमुना चैव प्लक्षजाता सरस्वती। रजसा नाभिभूयन्ते ये चान्ये नदसंज्ञिताः। शोणसिं
धुहिरण्याख्याः कोकलोहितघर्घराः। शतद्रुश्च नदाः सप्त पावनाः परिकीर्तिताः। स्मृतिसंग्रहे। तपन
स्य सुता गंगा गोमती च सरस्वती। रजसा नाभिभूयन्ते वेणा च नदसंज्ञिताः। नितामः गंगा धर्मद्रवः पुण्याय- रा०म० १०९
मुना च सरस्वती। अन्तर्गतरजोदोषाः सर्वावस्थासु चामलाः। एवं चाप्रथमं कर्कटे देवि त्र्यहं गंगा मारजस्वला

।तथा कर्कटादौ रजोदुष्टा गौतमी वासरत्रयं। चंद्रभागा सती सिंधुः सरयूर्नर्मदा तथेत्यादि यन्नदंतर्गतरजोदो
षविषयं। अल्पनदीविषये विशेषांतरमाह देवलः। नभोनभस्ययोर्मध्ये सर्वा नद्यो रजस्वलाः। तासु स्नानं न कुर्वी
त देवर्षिपितृतर्पणं। अत्र विशेषः। सिंहकर्कटयोर्मध्ये सर्वा नद्यो रजस्वलाः। न स्नानादीनि कर्माणि तासु कुर्वीत
मानवः। न चैतयोः सर्वानघरस्य विशेषोक्त्या महानदीविषयत्वमपीति वाच्यं। सिंहकर्कटयोर्मध्ये सर्वा नद्यो
रजस्वलाः। तासु स्नानं न कुर्वीत वर्जयित्वा समुद्रगा इति व्याघ्रपादोक्तेः। अल्पनदीष्वत्ववधिमास्योपावन्त्रो
हेतिभगवान्दासिलाशशाविमर्षणां। तावद्रजो महानघः करतोयाः प्रकीर्तिता इति। करतोया अल्पोदकाः॥
कात्यायनेन तत्रोक्तो विशेषः। यः शोषमुपगच्छति ग्रीष्मे कुसरितोऽभिहितासु प्रावृषि न तत्र यादपूर्णो दशवा
सरो रजोदोषश्च न तत्तीरवासिनां। न तु तत्तीरवासिनामिति निरामोक्तेः। विशेषांतरं मत्स्यपुराणे। पुरणाम
सासमाषोगात दुष्टमपां वुपावनमिति। भारते च। अपवित्रमपि प्राप्य गांगेयानि पवित्रतां रजोयुता नदीज
लयाने प्रायश्चित्तं। स्मृतिसंग्रहे। कालेन भस्म शुद्धस्पाक्षिरा तं तु नवोदकं। अकाले तु दशाहं स्याची नेना

Indira Gandhi National Centre for the Arts

म०स०
१०२

२यः तः
घादहर्निशमिति। भविष्ये। महदंबुसमं वापि यदि तिष्ठेत्सुरातनं। नवांबुमिश्रितं तेन तदुष्टमिति सूरयः। पोगपात्र
वल्कैर्जो दुष्टं भसितान्नं वर्जयेन्न घादिवुद्धिजैः कर्दर्पितं रजस्तेषां संयोपात्ति श्वेतपर्णां तथा। अजो गोमहिषी
चैव ब्राह्मणी च प्रसूतिका। भूमिस्थं नवोदकं चैव दशरात्रेण शुध्यति। कृतन्नूतनकूपाद्युदकमपि नवोदकं वा।
घ्रयादः अभावे कूपवापी नान्यत्र न पाचिपपोभ ताः। ज्योदुष्टे पिय पस्त्रिया समयोगेन दुष्यति वसिष्ठः उपाकर्म
णी चोत्सर्गे प्रेतस्नाने तथैव च। चंद्रसूर्यग्रहे चैव रजो दोषो न विद्यते। अथ श्रावणकृत्यं। भारते। श्रावणी
जपतो मासमेकं भक्तेन यः क्षिपेत्। यत्र तत्राभिषेकेण पूजितो ज्ञातिवर्द्धनः। वामनपुराणे। घृतं च क्षीर
कुंभाश्च घृतपक्वं फलानि वा श्रावणे श्रीधरप्रीत्यै दातव्यानि दिने दिने इति श्रावणकृत्यं। अथ भाद्रप
द्रकृत्यं। भारते। प्रोष्ठपदं तु यो मासमेकाहारो भवेन्नरः। धनाढ्यः स्फीतमहतामैश्वर्यं प्रतिपद्यते मासि भा
द्रपदे दद्यात्पायसं मधुसर्पिषी। हृषीकेशप्रीणनार्थं लवणं सगुडौदनं। इति भाद्रकृत्यं। अथाश्विन
कृत्यं। यमः घृतमाश्वयुजे मासि निर्यंतयाद्द्विजातये। प्रीणयित्वाश्विनौ देवौ रूपभागाभिजायते। वामने। तिल रा०म०
१०२

स्थिरांगं वृषभं दधिपायसादिकं। प्रीत्यर्थं पद्मनाभस्य देयमाश्वयुजे नरैः। भारते। तथैवाश्वयुजं मासमेकभक्तेन
यो नयेत्। प्रजावान्वाहनाढ्यश्च धनाढ्यः संजायते। इत्याश्विनकृत्यं। अथ कार्तिककृत्यं। विष्णुः। कार्तिकं सक
लं मासं नित्यस्नायी जितेंद्रियः। जपन्हविष्यभुग्दांतः सर्वपापैः प्रमुच्यते। तपश्रेष्ठदेवतामंत्रस्नायत्रा
वाहितश्च प्रातःस्नायी यमशक्तस्नातकः काशीखंडे। वाराणस्यां पंचनद्यां हं स्नातस्तु कार्तिके। अमीनेषु
गपवधु वसुरूपभाजो तिनिर्मला इति। स्नानकालश्चोक्तस्तत्रैव वा। कार्तिके विद्युतीर्थे यो ब्रह्मचर्यपराय
णः स्नास्यतु दिने भानोर्भानुजान्नस्यभीः कुतः। भानुजा यमा तत्रैव स्नानमंत्रः कार्तिकेऽहं करिष्या
ना४ मि प्रातःस्नानं जनार्दन। प्रीत्यर्थं तव देवेश दामोदर मया सह। इमं मंत्रं समुच्चार्य मौनी स्नायाद्व्रती नर इति। अर्घ्य हा२
मंत्रश्च तत्रैव। व्रतिनः कार्तिके मासि स्नातस्य विधिवन्मम। दामोदर गृहाणार्घ्यं दनुजेंद्रनिषूदन। स्नाने नैमित्तिके ह
स्न कार्तिके पापघ्नो वरो। गृहाणार्घ्यं मया दत्तं राधया सहितो हरिः। इमं मंत्रं समुच्चार्य यो र्घ्यं मत्स्यं प्रयच्छति
वर्णां रत्नपुष्पाणां पुजाशं विनद्यति वा ना। सुवर्णप्रतिमां वापि वीजं कल्पोदकपूर्वकं। तेन दत्ता भवेत्सम्यक्सुपात्राय
२स्नान

Indira Gandhi National
Centre for the Arts

मसः सुपर्वं रीतिति। पाद्मे। तुलसीकाननं एजनगृहे यस्यावतिष्ठति। तद्गृहं तीर्थरूपं तु नयांति यमकिंकराः। रोपणात्पाल
१०३ नाज्जस्पर्शान्नृणां याहरणान्तथा। तुलसी हरते पापं वाङ्मनःकायसंभवं। तुलसीमंजरीभिर्यः कुर्याद्धरिहरार्च
भा२ नं। न स गर्भगृहं याति मुक्तिभागी न संशयः। तुलसीभवनच्छाया यत्र यत्र भवेन्नृपात। तत्र श्राद्धं प्रकुर्वीत पितृणां।
दत्तमक्षयं। तुलसीदललक्षेण कार्तिके योर्चयेद्धरिं पत्रे पत्रे मुनिश्रेष्ठ मौक्तिकं लभते फलं। तत्रैव। कुरुक्षे
त्रे कोटिगुणो गयायामयितत्समः। ततोधिकः पुष्करे स्याद्द्वारवत्यां च भार्गव। दुर्लभः कार्तिको विप्र माथुरे
यां नराणामिह इति। स्कांदे कार्तिकमाहात्म्ये। धात्रीछायां तु यः कुर्यात्पिंडदानं महामुने मुक्तिं प्रयांति पितरः
प्रसादात्तस्य वैष्णवस्य तु। दानमाह वामनः। रजतं कनकं दीपान्मणिमुक्ताफलादिकं। दामोदरस्य प्रीत्य
र्थं प्रदद्यात्कार्तिके नरः। चंद्रप्रकाशो वर्षे दर्पणो विषुवे समनियोर्दद्यात् कार्तिके मासि दीपकं त्वग्निष्टो
मफलं तस्य भवेदिति मनीषिणः। चतुष्पथेषु रथ्यासु ब्राह्मणावसथेषु च वृक्षमूलेषु गोष्ठेषु कांतारग रामः
हनेषु च। दीपदानाद्वि सर्वत्र महाफलमवाप्नुयात्। उच्चैःप्रदीपमाकाशे यो दद्यात्कार्तिके नरः स वैकु १०३

ठं समुद्धृत्य विष्णुलोकमवाप्नुयात् इति। मंत्रोपि तत्रैव। दामोदराय नभसि तुलायां लोलया सह। प्रदीपं ते प्रयच्छामि नमो
नंताय वेधसे इति। स्कांदे। प्रदीपमालां यः कुर्यात्कार्तिके मासि वै ममा श्ववृक्षानेषु दीपानां ब्राह्मणान्भोजयेत्सु
न्विः गणराणप्सुसलभते दीप्यते च रविर्यथेति। भारते। कार्तिकं तु नरो मासं यः कुर्यादेकभोजनं। शूरश्च बहुवी
र्यश्च कीर्तिमांश्चैव जायते। काशीखंडे। कुहूं वा चातिकृच्छ्रं वा प्राजापत्यमथापि वा। संप्राप्ते कार्तिके मासि कुर्या
त्कृच्छ्रमतिप्रयत्नवान्। एकांतरव्रतं कुर्यात्त्रिरात्रव्रतमेव वा। पंचरात्रं सप्तरात्रं संप्राप्ते कार्तिके व्रती। पक्षव्रतं वा
कुर्वीत मासोपोषणमेव वा। शाकाहारं पयोहारं फलाहारमथापि वा। चरेद्यवान्नाहारं वा संप्राप्ते कार्ति
के व्रती ब्रह्मचर्यं चरेदूर्जे महाव्रतफलाप्तये। पत्रभोजी भवेदूर्जे कांस्यं त्यक्त्वा प्रयत्नतः। कांस्यस्य नियमेद
द्यात्कांस्यं सर्पिःप्रपूरितं। नारदीये। कार्तिके वर्जयेत्कांस्यं कार्तिके शुक्लसंधितां शुक्लं पर्युषितं। सधितं लव
णशाकः पात्रे राजिकां माद्रकं चैव वर्जयेत्। कार्तिकव्रती द्विदलं [illegible]तैलं च तथान्यत्ताति दूषितं द्विदलं तु प्र
र्वमुक्तं भारते। कार्तिके वर्जयेन्मांसं कार्तिके वर्जयेन्मधिति। काशीखंडे। मधुस्त्यागे घृतं दद्यात्पायसं च सश

Indira Gandhi National
Centre for the Arts

मसि० केरंमांसाशिनोपियेभूयास्यजेपुलेपिकार्त्तिके।नियमेमत्स्यमांसानां दद्यात्कार्त्तिके व्रती कूष्मांडानिसमांसा
१०४ निदृशात्स्वर्गपुतान्यपि।कार्त्तिके मौनभोजी यः सोश्नात्यमलमेव हि। सुघंटां सतिलां मौनी सहिरण्यां प्रदापयेत्
।कार्त्तिके लवणं त्यक्त्वा ने व्रतभृतासनात्यक्ताः सर्वैरसालेन तत्ता गीगां प्रदापयेत्। भूशय्यां कार्त्तिके कुर्वन्
नमुवंसंस्पशोद्भती पर्यंकं मूषरौ दद्यात्समूलं सोपधानकं। सर्वचातुर्मास्यव्रतान्यपि चतुर्ष्वसंभवे कार्त्तिके
एककार्याणि॥ तथा च तत्रैव। चतुर्ष्वपि च मासेषु न सामर्थ्यं व्रते यदि। तदोर्ज्जे व्रतिना भाव्यं तत्र प्यनुफलमिष्यते
ति। अथ भीष्मपंचकं। कार्त्तिकं पक्षस्य ब्राह्मे एकादश्यां तु गृह्णीयाद्व्रतं पंचदिनात्मकं। व्रती स्नात्वा विधाने
न मध्याह्ने तु तथा पुनः। अत्र प्रातर्मध्याह्ने च स्नानमित्याभ्यां स्नात्वा देवर्षिपितॄन्संतर्प्य विष्णुं पंचामृतपंचग
व्यैः संस्नाप्य कर्पूर कस्तूरी कुंकुम चंदनैरनुलिप्य पुष्पैरभ्यर्च्य कृष्णागुरुणा धूपयित्वा पांचाहिकमन राम०
वरतं दीपं प्रज्वाल्य हविष्यान्नं निवेद्य घसापं संध्यामुपास्य समंत्रं जपेत्। तत्र पंचसु दिनेषु विशेषः। आ १०४
द्यपद्मैः पादौ पूजयेत्। द्वितीये बिल्वपत्रैर्जानुनी। तृतीये जानुतत्रानाभिं तुलसीपत्रैः चतुर्थे जातीपुष्पा

दिभिः स्कंधौ। पंचमे मालतीपुष्पैः शिरस्तथा पंचस्वपि दिनेषु पूजोत्तरं सत्यव्रताय शुचये गांगेयाय महात्मने। भीष्मा
यच ददाम्यर्घ्यमाजन्मब्रह्मचारिणे। वसूनामवताराय शंतनोरात्मजाय च। अर्घ्यं ददामि भीष्माय सोमवंशोद्भ
वाय च। वैयाघ्रपाद्यगोत्राय सांकृत्यप्रवराय च। गंगापुत्राय भीष्माय प्रदास्येहं तिलोदकं। अपुत्राय ददाम्येत
त्सलिलं भीष्मवर्मणे इत्येतैर्मंत्रैर्भीष्मं संतर्प्य गोमयगोमूत्रदुग्धदधिघृतानि पिबेत्। एवं पंचदिनान्युपोष्य
५सं षष्ठदिवसे विधिवत्स्नात्वा पक्वान्नेन पंचब्राह्मणान् भोज्य बंधुभिः सह रात्रौ भुंजीत। अत्र चैकादश्यां तु वरा
हाद्वादश्यां तत्त्रयोदश्यां गोष्ठतुर्दश्यां घृतयापसे पौर्णमास्यां श्वेतकृष्णतिलावरिच देयं। मैथुनान्नवादम
धुमांसतांबूलाभ्यंगामाषमुद्गमसूरचणककुलित्थनिष्पावराजमाषाढक्यादीनि वर्ज्यानि तत्रान्यान्यपि वर्ज्यसि
ऋानि पाद्मे। पलांडुं लशुनं हिंगुं छत्राकं गृंजनं तथा। नालिकां मूलकं शिग्रुं वर्जयेत्कार्तिकव्रती। अलाबुं चा
पि वृंताकं कुष्मांडं बृहतीफलं कलिंगं च कपित्थं च वर्जयेद्वैष्णवो व्रती। तथा। द्विःपाचितं च दग्धान्नं नैवाद्या
द्वैष्णवो व्रती। कूष्मांडं बृहती छत्राकं मूलकं तथा। श्रीफलानि कलिंगं च फलं धात्रीभवं तथा। नारिकेलं

Indira Gandhi National
Centre for the Arts

मसं०
१०५

तथा लावुं पटोलं वदरीफलं। चर्म हंता कजंशाकं शाकं तुलसिजं तथा शाकानेतानि वर्ज्यानि क्रमात्प्रतिपदादिषु धा-
त्रीफलं रवौ तद्वर्जयेत्सर्वरोगहीति। एतेषु च स्नानादिषु सौरश्नाद्वो वा मासमाश्रयणी फ तुलामकरमेषेषु प्रा-
तः स्नानं विधीयते हविष्यं ब्रह्मचर्यं च महापातकनाशनमिति विष्णुस्मृतेः आश्विनस्य तु मासस्य या शुक्ला दशमी
भवेत् कार्त्तिकस्य व्रतानीह तस्यां वै प्रारभेत्सुधीरिति पाद्मोक्तेश्च॥ इति कार्त्तिककृत्यं। अथ कार्त्तिकोद्यापन
विधिः पाद्मे। नारद उवाच। अथोर्जव्रतिनः सम्यक् उद्यापनविधिं नृप तं शृणुष्व मयाख्यातं सविधानं विशे-
षतः ऊर्जे कृष्णचतुर्दश्यां कुर्यादुद्यापनं व्रती व्रतसंपूर्णतार्थाय विष्णुप्रीत्यर्थमेव च। तुलस्या उपरिष्टात्तु कुर्या-
न्मं तुषि कांम्य भांसुतोरणं चतुर्द्वारं पुष्पचामरशोभितां द्वारेषु द्वारपालांश्च पूजयेन्मन्त्रयान्पृथक्
।सुरभशीलं सुशीलं च जयं विजयमेव च तुलसीमूलदेशे तु सर्वतोभद्रमेव च चतुर्भिर्वर्णकैः सम्यक्शोभा-
ढ्यसमलंकृतं। तस्योपरिष्टात्सपिधानं पंचरत्नसमन्वितं महाफलेन संयुक्तं कुंभं तत्र निधापयेत्। पूजयेत्त- राम०
त्र देवेशं शंखचक्रगदाधरं। कौशेयपीतवसनं पंकजतधिकन्यपारेंद्रादि लोकपालांश्च मंडपे पूजयेद्व्रती। १०५

।द्वादश्यां प्रतिबुद्धो सौ अथो दृश्यां यतः सुरैः दृष्टोर्चितश्चतुर्दश्यां तस्मात्पूज्यात्तिथादिहा तस्यामुपवसेद्भक्त्या शांतः प्र-
यतमानसः पूजयेद्देवदेवेशं सौवर्णं गुर्वनुज्ञया। उपचारैः षोडशभिर्नानाभक्ष्यसमन्वितैः रात्रौ जागरणं कु-
र्याद्गीतवाद्यादिमंगलैः मतिं कुर्वंति ये भक्त्या जागरे चक्रपाणिनः जन्मांतरशतोद्भूतैस्ते मुक्ताः पापसंचयैः नरा-
णां जागरे विष्णोर्गीतनृत्यं सम कुर्वतां गोसहस्रं च ददतां फलं सममुदाहृतं गीतनृत्यादिकं कुर्वन्दर्शयन्कौतु-
कानि च। पुरतो वासुदेवस्य रात्रौ वै हरिवासरे। पठन्विष्णुचरित्राणि यो रंजयति वैष्णवान्। सुखेन कुरुते
वा घंत्वेकाला पांश्च वर्जयेत् ततश्च पौर्णमास्यां च सपत्नीकान् द्विजोत्तमान्। त्रिंशन्मितांस्त्वेकं वा स्वशक्त्या
वा निमंत्रयेत् तं वरान् दत्वा यतो विष्णुर्मत्स्यरूपभवत्ततः तस्यां दत्तं हुतं जप्तं दृस्पपफलं स्मृतं। अतस्ता-
न्भोजयेद्विप्रान्पायसान्नादिना व्रती। अतो देवारति ह्राभ्यां जुहुयात्तिलपायसं। प्रीत्यर्थं देवदेवस्य देवानां
च पृथक्पृथक्। दक्षिणां च यथाशक्ति प्रदद्यात्प्रणमेच्च तान् देवदेवं समभ्यर्च्य देवांश्च तुलसीं तथा।
ततो गां कपिलां तत्र पूजयेद्विधिवद्व्रती। गुरुं व्रतोपदेष्टारं वस्त्रालंकरणादिभिः सपत्नीकं समभ्यर्च्य तांश्च

Indira Gandhi National
Centre for the Arts

म०स० विमानस्समापयेत्। युष्मत्प्रसादाद्देवेशाः प्रसन्नो मम सर्वदा व्रतादस्माच्च यत्पापं सप्तजन्मकृतं मया। तत्स
१०६ र्वं नाशमायातु स्थिरा मे चास्तु संततिर्मनोरथाश्च सफलाः संतु नित्यं तवार्चनात्। देहांते वैष्णवं स्थानं प्राप्नु
यामतिदुर्लभं। इति संप्रार्थ्य तान्विप्रान्प्रसाद्य च विसर्जयेत्। कार्त्तिके वाथ तपसि विधिरेव विधः स्मृतः।
विपाप्मा स तु निर्मुक्तो विष्णुसान्निध्यभाग्भवेत्। सर्वेन्न
नारद उवाच। एवं यः कुरुते सम्यक् कार्त्तिकस्य व्रतं नरः। विधानतः। ते धन्यास्ते महापुण्यास्तेषां सर्वप्र
तैः सर्वतीर्थैः सर्वदानैश्च यत्फलं। तत्कोटिगुणितं ज्ञेयं सम्यगस्य विधानतः। ते धन्यास्ते महापुण्या ...। कृपा
लोदयः विष्णुभक्तिरताः स्तेषु कार्त्तिकव्रतकारिणः। देहस्थितानि पापानि वितर्कयंति तन्मदपानं। कृपा
स्यामो वयं त्वेवं पहूर्जे व्रतकृन्नरः॥ नारद उवाच। ऊर्जे व्रतनियमान्प्रणोति मत्त्यो वैतत्कथैपति
वैष्णवाप नितं। मेमम्भव्रतकरणात्फलं भवे यत्तत्सर्वकलुषविनाशनं सभंते। इति कार्त्तिकोद्यापनविधिः
त्र्य मार्गशीर्षकृत्यं॥ ॥ महाभारते। मार्गशीर्षं तु यो मासमेकभक्तेन संक्षिपेत्। भोजयेत्तु द्विजानशक्त्या रा०म०
समुच्यते व्याधिकिल्बिषैः कृषिभागी बहुधनी बहुधान्यश्च जायते। वामनपुराणे। वैरोच्छ्वास्तनरा गावः भाक १०६

दानिस्त्रक्षाविकं दानकेव्यंशं वप्रीमेमासे मार्गशिरे नरैः। इति मार्गशीर्षकृत्यं॥ अथ पौषे। महाभारते। पौषमासं
तु कौंतेय एकभक्तेन यः क्षिपेत्। सुभोगो दर्शनीयश्च यशोभागी च जायते। इति पौषकृत्यं। अथ माघकृत्यंवि
ष्णुस्मृतौ। तुलामकरमेषेषु प्रातः स्नायी सदा भवेत्। हविष्यं ब्रह्मचर्यं च महापातकनाशनमिति। प्रभास
खंडे। माघे मासि च यः स्नायात्तोरं तर्येण भारत। यो उशीरकं फलं तन्न स्यादिवसे दिवसे भवेत्। ब्रह्मपुराणे। एकादृ
श्यां शुक्लपक्षे पौषमासे समारभेत्। द्वादश्यां पौर्णमास्यां वा शुक्लपक्षे समापनं। पद्मपुराणे। पुष्यस्यैकाद
शी शुक्ला आरभ्य स्यादि लेश यः। माघमासं निराहारस्त्रिकालं स्नानमाचरेत्। त्रिकालमर्चयेद्विष्णुं न
क्तभोजी जितेंद्रियः माघस्यैकादशीं शुक्लां यावद्द्वादश्युत्तमा। इदं त्रिकालस्नानं निराहारस्यैव स्नान
यीत। स्नानकालश्च पद्मपुराणे। माघमासे रटंत्यापः किंचिदभ्युदिते रवौ। भविष्योत्तरे। पौमाघमास्युष
सि सूर्यकराभितप्ते स्नानं समाचरति चाहुन दीप्रवाहेरति। ब्रह्मपुराणे। अरुणोदये तु संप्राप्ते स्नानकाले
विचक्षणः। माघवां धिपुण्याप्यापनयः स्नाति पुरः पूजितरिति। तानि शान्तये सपापावच्छिन्नानि। तत्र संक
:-

मस०
१०७

त्यमंत्रमाह विष्णुः तत्र चोत्थापनि मयमंगल्यपाद्विधिपूर्वकं। माघमासमिमं पूर्णं स्नास्येहं देव माधव तीर्थ
स्यास्य जले नित्यं इति संकल्प्य चैनसि स्नानमंत्रः पद्मपुराणे। दुःखदारिद्र्यनाशाय श्रीविष्णोस्तोषणाय च
। प्रातःस्नानं करोम्यद्य माघे पापविनाशनं। मकरस्थे रवौ माघे गोविंदाच्युत माधव। स्नानेनानेन मे देव य
थोक्तफलदो भव। इति मंत्रं समुच्चार्य स्नायान्मौनसमन्वित इति। सवित्रे प्रसवित्रे च परं धाम जले मम। त
। त्तेजसा परिभ्रष्टं पापं यातु सहस्रधेति मंत्रेण सूर्याय अर्घ्यं दानमुक्तं पृथ्वीचंद्रोदये। मासपर्यंतं संभवे म-५
त्र्यहं कृत्वे वं अस्मिन्योगे लब्धोपि स्नापादपि दिनत्रयं। प्रयागे माघमासे तु त्र्यहं स्नानस्य यत्फलं। नाश्व
मेधसहस्रेण तत्फलं लभते भुवीति पद्मपुराणात् प्रयागासंभवे काशीखंडे काश्यां कूवे प्रयागो येन पश्चि
लोति मानवाः दशाश्वमेधजनितं फलं तेषां भवे ध्रुवमिति। भविष्योत्तरे। आमावृतशरीरस्तु पंचकर्षं स्ना
नमाचरेत्। पदे पदेऽश्वमेधस्य फलं प्राप्नोति मानवः। नारदीये। न वह्निं सेवयेत्स्नातो ह्यस्नातोपि वरानने। एमश्र
होमार्थं सेवयेद्वह्निं शीतार्थं न कदाचन। अत्र हस्तदानदानमाह तिलाः शार्करयान्विताः त्रिभागस्तु तिलानां हि च १०७

तुर्थः शर्करान्वितः तथा। तिलस्नायी तिलोद्वर्ती तिलहोमी तिलोदकी तिलभुक्तिलदाता च षट्तिलाः पापनाश
नाः तैलमामलकाभ्यां वै तीर्थे देयात्तु नित्यशः तथा प्रज्वालयेद्वह्निं सेवनार्थे द्विजन्मनां पाद्मे। दानखंडे दीप
कोऽरवं उद्देवमुद्दिश्य माधवं विष्णुः माघे मासस्यंप्रसहंति लेडुत्वा सघृतकृशरं ब्राह्मणान्भोजयित्वा
दीप्तास्मि भवतीति। माघव्रतोद्यापनमाह चंद्रप्रकाशे विष्णुः एवं स्नानावसाने तु भोज्यं देयमवारितं भोज
येद्द्विजदांपत्यं भूषयेद्वस्त्रभूषणैः। कंबलाजिनरत्नानि वासांसि विविधानि च। चोलकानि च देयानि प्रच्छा
दनपटास्तथा। उपानहौ तथा गुप्तमोचकौ पापमोचकौ। अनेन विधिना दद्यान्माधवः प्रीयतामिति। अथ
समापनमंत्रः सवित्रे प्रसवित्रे च परं धाम जले मम। त्वत्तेजसा परिभ्रष्टं पापं यातु सहस्रधा दिवा
कर जगन्नाथ प्रभाकर नमोस्तु ते। परिपूर्णं कुरुष्वेहं माघस्नानं तवाज्ञया अत्र हस्तहनिदानमाह ति
लाः शर्करयान्विताः मासावसाने तु भवेत् षट्त्रिंशत्भोजनं तथा। सूर्यो मे प्रीयतां देवो विष्णुर्मूर्ति
र्निरंजनः दंपत्योर्वाससी सूक्ष्मे ससधान्यसमन्विते। त्रिंशन्नु मोदका देयाः शर्करातिलसंयुताः भागत्र

Indira Gandhi National
Centre for the Arts

मस०
१०८

यंतिलानां तु चतुर्थ्यः शर्करांशकः। अनभ्यंगी वरारोहे सर्वमासं नयेद्बुधः। विशेषो घायनं तु। कार्तिके वा थ तपसि
विधिरेवं विधः स्मृत इति वचनात्पूर्वोक्त एव ज्ञेयः इति माघकृत्यं। अथ फाल्गुनकृत्यं। स्कांदे। एकभक्तं
तु कुर्वीणः फाल्गुने मासि नित्यशः। स्त्रीषु सौभाग्यमाप्नोति विपश्चयरम स्त्रियः। वामने फाल्गुने व्रीहयो गावो
वस्त्रं कृष्णाजिनान्वितं। गोविंदप्रीणनार्थाय दातव्यं पुरुषर्षभ। तथा प्रातः स्नायीभवेन्नित्यं द्वौ मासौ मा
घफाल्गुनाविति। इति फाल्गुनकृत्यं। अथ मलमासः। तत्स्वरूपं माधवीये ब्रह्मसिद्धांते। चांद्रो मासो ह्यसं
क्रांतो मलमासः प्रकीर्तितः इति। स द्विविधः अधिमासः क्षयमासश्चेति। तदुक्तं मदनरत्ने काठकगृह्ये
। यस्मिन्मासे न संक्रांतिः संक्रांतिद्वयमेव च। मलमासः स विज्ञेयो मासः स्यात्तु त्रयोदश इति। अधिमास
क्षयस्य कालनियमो ब्रह्मसिद्धांते। द्वात्रिंशद्भिर्गतैर्मासैर्दिनैः षोडशभिस्तथा घटिकानां चतुष्के
ण पतत्यधिकमासकः इति। अयं चागणितोपयोगी मध्यममानेन न तु वास्तवः। श्रौतस्मार्तानुष्ठानो रामं०
पयोगी तु स्फुटमानायत्तो दर्शांतरप्रतिपदादिरेव संक्रांतिरहितः। अत एव असंक्रांतिमासोधिमा १०८



सः स्फुटः स्यादित्युक्तं स्फुटस्य ग्रहमानायत्तत्वात्। अन्यथा क्षयमासद्वितीयायां घटिकाचतुष्टययोगेऽधिमासः
स्यात्। स चानिष्टः ४ रं ब्रह्मीयत्र ह येन मासादिः सम्प्रकीर्तितः। अग्नीषोमौ स्थितौ मध्ये समाप्तोपि तत्सो
मकौलमतिक्रम्य तु यदा रविर्गच्छेत्परं च न। अग्नीषोमस्तु चोक्तो यो द्वितीयः मासकृतस्मृत इति हारि न
वचनविरोधात्तस्मादागमनकालोचितत्रैव। गतोब्दाद्विनं देर्मितेशाककालेतिथीशैर्भविष्यतश्च
गाक्षरूपैः गजाघ्नैरभूभिस्तथा प्रायशो यं कुवेदें दुवर्षैः क्वचिद्गोकुभिश्चेति। अस्यार्थः अब्दपश्च
त्वारः अद्रयः सप्त। नंदा नव। एतत्संख्यात्रयमंकानां वामतो गतिरिति प्रकारेण प्रातिलोम्येन बो
ध्यं। एवं च मेलने चतुःसप्तत्यधिकनवशतसंख्या संपद्यते। एभिर्वर्षैः परिमिते कस्मिन्क्षयमा
सः पूर्वं जात इत्यर्थः। एवमग्रेपि प्रातिलोम्येन संख्या बोद्धव्या तिथयः पंचदश ईशा एकादश प
च दशाधिकशतयुक्तसहस्रसंख्याके वर्षैर्मिते याते कश्चित्क्षयमासो येन संवत्सरो भविष्यतीति
त्यर्थः। अंगानि षट् अक्षाणींद्रियाणि पंच भूपा द्वादश। षट्पंचाशदधिकशतद्वयोपेतसहस्र

Indira Gandhi National
Centre for the Arts

अ१ अ२

मस० १०९ संख्याकेर्वत्सरेर्मितेयातेभविष्यतीत्यर्थः। गजाष्टोत्र इषः सप्त अग्नयस्त्रयः भूरेकाः अष्टसप्ततधि
कशतत्रयोपेतेनसहस्रसंख्याकेयातेभविष्यतीत्यर्थः। गजाष्टौ। अद्रयः सप्त। अग्नयस्त्रयः। भूरेका।
अष्टसप्ततधिकशतत्रयोपेतेनसहस्रसंख्याकेयातेभविष्यतीत्यर्थः। कुः एको विदाश्चत्वारः इंदुरे
कः एकचत्वारिंशदधिकशतसंख्याकेवर्षेलथागवः नवकुरेकाः एकोनविंशतिसंख्याकेव
र्षेरप्यंप्रापशोजायतेइत्यर्थः। इतिमलमासस्वरूपं अथात्रवर्ज्यपेछनसिः श्लो० नस्मार्तक्रियाः सर्वा
द्वादशेमासिकीर्तिताः त्रयोदशेतुसर्वास्ताःनिष्फलाः परिकीर्तिताः जाबालिरपि नित्यनै
मित्तिकेकुर्यात्प्रयतःकुर्यान्मलिम्लुचे। तिथिनक्षत्रवारोक्तकाम्यंनैवकदाचन। कानिविलि
म्लान्यपिमलिम्लुचेवर्ज्यानीतिकाठकगृह्ये। षष्ठीत्याग्रयणाधानंचातुर्मास्यादिकान्यपिमहालया
ष्टकाश्राद्धोपाकर्माद्यपिकर्मयत्। स्पष्टमासविशेषाख्याविहितंवर्जयेन्मलइति। षष्ठीः का रा०म० १०९
ठकाद्दोषा। सिद्धमदनरत्नेस्मृतिसंग्रहे। जातकर्मचपुंसूतिः सीमंतोन्नयनव्रतं। मलिम्लुचेपिकर्तव्यं

निमित्तंयदिजायतइति। माधवीयेभृगुः वृद्धिश्राद्धंतथासोममग्न्याधेयंमहालयं। राजाभिषेकंकाम्यंचनकु
मू २ र्यादर्कनुलंघिनीति। वृद्धमनुः अग्न्याधेयंप्रतिष्ठांचयज्ञदानव्रतानिचवेदव्रतवृषोत्सर्गचूडाकरणमेखला:
मांगल्यमभिषेकंचमलमासेविवर्जयेत् वृषोत्सर्गः काम्यः ज्योतिःशास्त्रे। तत्रदत्तमदत्तंचहुतंनहुतमेववा
। सुजप्तमथजप्तंस्यात्रोपवासःकृतोभवेत्। नयात्रांनविवाहंचनचवास्तुनिवेशनं। नप्रतिष्ठांचदेवानां
प्रासादग्रामभूरुहामिति। ज्योतिःसारे। वापीकूपतडागादिप्रतिष्ठापनकर्मचानकुर्यान्मलमासेतुमह
दानव्रतानिचेति। प्रजापतिः उपाकर्मचहव्यंचकव्यंपर्वोत्सवस्तथा। उत्तरेनियतंकुर्यात्पूर्वेतन्निष्फ
लंभवेत्। अत्रमंत्राधि। अवरोहश्चहेमंतः सर्पाणांबलिरष्टकाः ईशानस्यबलिर्दिक्षोः शयनंपरिवर्त
नं। प्रापश्चित्तंतुसर्वेस्यमलमासेविवर्जयेत्। त्वपरिशिष्टे। अवषट्कारहोमांश्चपर्वचाग्रयणंतथान
लमासेपिकर्तव्यंकाम्यारिष्टीश्चवर्जयेत्। अवषट्कारहोमाः अग्निहोत्रोपासनवैश्वदेवादयः पर्व
दर्शपूर्णमासौस्थालीपाकोच। आग्रयणंप्राग्रयणेष्टिः साचद्वर्भिक्षइतिदीपिकायांबृहस्पतिः बाले

Indira Gandhi National
Centre for the Arts

मु०
११०

वायदि वा वृद्धे शुक्रे वालं गते गुरौ मलमासे च वैतानि वर्जये देवदर्शनमिति। आधानं पत्तकर्मादि प्रायश्चित्तं व्रतानि
चा न कुर्यात् मलमासेपि शुक्रगुर्वोरुपप्लवे। अस्तंगते गुरौ शुक्रे वृद्धे वा लेमलिम्लुचे। व्रतारंभापवर्गौ च न कुर्या
न्मौंजिबंधनं तिः क्रमं जातकर्मादिशाकाम्यं वृषविसर्जनमिति। जातकर्मादि जाते च्छिः वऊव चनं घ्यां दत्तं। अ
स्तं उक्तो ब्रह्मसिद्धांते। रविणास्तमितस्ते षां ग्रहाणामस्तउच्यते। ततो बाला द्वितीये घाटूर्ध्वं वालं प्रकीर्तितमि
ति। वाद्धकवाल्ययोर्मानमपि तत्रैव पक्षंप्रागदिशि वृद्धत्वं पश्चात्यं च दिनं कवेः शेशवं प्राकुपंचाहं पश्चाद्दशदि
नं स्मृतमिति। कदिः शुक्रः अत्र विशेषः यक्षंवृद्धो महास्तेतु वालश्चात्र दृशाहि कःपादास्ते तु दृशाहानि वृद्धो वा
४ स
लो दिनत्रयं। महीयादालस्सर्गांतु। द्वात्रिंशद्दिवसाश्चास्ते जीवस्स भार्गवस्य तु द्वादश प्रतिमे ह स्तले पादास्ते द्वाद
शाकमादित्यित्रैवा प्राक्पश्चादुदितः शुक्रः पंचसप्तदिनं शिशुः विपरीतं तु वृद्धत्वं तद्वदेव गुरोरपीत्यादिनान्य
नाधिकभावः श्रूयते। एतद्व्यवस्थामाह गर्गः शुक्रो गुरुः प्राग अपराक्कवालो विंध्ये दशावं तिषु सप्तरात्रं। वंगोत्
हूणेषु षषट् च यं च शेषे च देशे त्रिदिनं वदंतिं वृद्धत्वमप्येतत्प्रमाणं ज्ञेयं। एवं वक्रातीचार सिंहराशिगतो गु ११०

रुरस्तंगत रवश्मभकर्म सुवर्ज्याः तदुक्तं लल्लेन नीचस्थे वक्रसंस्थेप्यतिचरणगते वालवृद्धास्तगे वा संन्यासो दे
वयात्रा व्रतनियमविधिः कर्णवेधो दिक्षा मौंजीवंधो च चूडापरिणयनविधिर्वास्तुदेवप्रतिष्ठा वर्ज्याः स
द्भिः प्रयत्नात् त्रिदशपतिगुरौ सिंहराशिस्थिते चेति। नीचस्थो मकरस्थः विशेषमाह मांडव्यः श्रुतिवेध ५४
जातकान्नप्राशनचूडादिकं सर्वं रविभवनस्थे जीवे कार्यं वर्ज्यो विवाहस्त्विति। तथा रविक्षेत्रं ते जीवे जी
वक्षेत्रं गते रवौ। वर्जयेत्सर्वकर्माणि व्रतस्वस्ययनानि च। तथा गुर्वादित्ये गुरौ सिंहे शुक्रे चास्तमुपा
गते। त्यजेद्धानं महादानं व्रतं देवविलोकनं लल्लः गुरुक्षेत्रगतो भानुर्भानुक्षेत्रगतो गुरुः गुर्वादित्यः स
विज्ञेयः सर्वकर्मसु गर्हितः शौनकः एकराशिगतो सूर्यं जीवो स्यातां पदापनः व्रतबंधविवाहादिशुभं क
र्मा खिलं त्यजेत्। राजमार्तंडे यात्रां चूडां विवाहं श्रुतिविवरविधिं शांतमप्रवेशं प्रासादोद्यानहर्म्यं
सुरनरभवनारंभविद्याविधानं। मौंजीवंधप्रतिष्ठां मणिकनककराधारणं कुर्वते ये म्लः सिंहस्थिते जी
गुरुदिनकरयोरेकराशिस्थयोश्च। तथा। गुर्वादित्ये गुरौ सिंहे नष्टे शुक्रे मलिम्लुचे पाम्यायने हरौ सुप्ते

Indira Gandhi National
Centre for the Arts

हे १

मु० १११ सर्वकर्माणि वर्जयेत्॥ सिंहस्थे गुरौ विशेषमाह शतानंदः॥ मघांपदिमघा नास्ति सिंहगुरुः कारणमिति॥ अत्रापि। मघाक्षपरित्यज्य दासिंहे गुरुर्भवेत्। तदा चेत्कसकाकनशुभागामुपि याम वेत्॥ तथाम
घीमघाचसंपूर्णामघायां च गुरुर्भवेत्॥ महामाघलदामोक्तो व्रतोद्वाहे च वर्जयेत्॥ तथापि सिंहस्थिते मम
घासंस्थगुरुं पत्ने न वर्जयेत्॥ अन्यत्र सिंहभागे तु विवाहादि विवर्जयेत्॥ देशतोपि व्यवस्थामाह गार्ग्यः
सिंहस्थिते देवगुरौ विवाहं नेच्छंति यात्रां पमुनान देषु। कलिंगवंगे घणमागधे षु दोषः प्रयुक्तो न तथान्य
देशे गोत्तमोपि। कंठीरवस्थे धिषणे विवाहं कुर्यान्न यात्रां व्रतबंधदीक्षां गोदावरी चोत्तरतोहि दोषो गो
दावरी दक्षिणतो न सोस्ति कंठीरवः सिंहः देवलोपि व्रतबंधं च प्रतिष्ठां विवाहं मंदिरप्रवेशं च याम्यदेशे
कुर्याद्यैर्न सिंहांशे॥ आर्यो बृहस्पतिः बृहद्गार्ग्यः मीने धनुषि सिंहे च स्थितेसम्यगुरौ गमे। क्षौरमत्र
न कुर्वीत विवाहं गृह कर्म च॥ तथा वापी कूप तडागादि यागमनक्षौरमानि ग्वाव्रतं विद्यामंदिरकर्णवेध
नमहादानं वनं सेवनं तीर्थस्नानविवाह देवभवनं मंत्राादि देवेक्षणं दूरे गोवर्जितो विबुधः परिहरेत् मु० १११

द्वसंगते मार्गवरानि। लक्ष्मोत्रपुनर्विशेषमाह उपप्लवे शीतलमानुभाषोरुद्वीदयेवाकपिलाख्य षष्ट्यां सुरासुरेज्या
मयेधनी वैयात्राविधिसंक्रमरणो विशालः गुरुः शुक्रास्तमयादिनिषिद्धकाले ग्रहरणदोन दोषदतिलक्षो दा
हृतवचनार्थः॥ अतिचारगतो जीवस्तराशिं नैति चेत्पुनः लुप्तः संवत्सरो ज्ञेयः सर्वधर्मवहिष्कृतः॥ अस्यापवादः वृ
षे मेषे स्वषेकुंभे यत्ती चारगो गुरुः नतत्र काललोपः स्यादित्याहुगार्ग्यो मुनिरिति॥ काललोपः संवत्सरा
ख्यकालस्य नलोपः लुप्तसंवत्सरो नाम्नीत्यर्थः वक्रातीचारयोर्दिवससंख्यामाहराजमार्तंडः वक्रातिचारो जी
वे वर्जयेन्न दनं तरेत्व्रतोद्वाहादि चूडापाम रचा विंशति वासरमिति॥ पापविषये वृद्धपुराणे विशेष उक्तः म
यायां सर्वकालेषु पिंडं दद्यादिचक्षणः अधिमासे जन्मदिने अस्ते चागुरुशुक्रयोः न सक्रव्यं गया श्राद्धं
सिंहस्थे च बृहस्पतौ॥ तथा॥ गोसवर्यागयायां च श्रीशैले ग्रहणद्वये। सुरासुरगुरूणां च मोढदोषो न विद्य
२ त ते॥ तथा शांतिकर्मप्रकुर्वीत गेहेमिति केतथा गुरुभार्गव मौढ्यादि दोषस्तत्र न विद्यते॥ तथा काश्यामपि
स्कंदे सदा कृतयुगं चात्र महापर्वसदात्र वै नग्रहास्तोदयकृतो दोषो विश्वेश्वरालये॥ सदा सौम्यायनं तत्र स

Indira Gandhi National
Centre for the Arts

दधिमासमनस्याधिमासेशुद्धमासमनस्यशुद्धेएवेत्येवंव्याख्येयम्।मलमासमृतानांतुयदिकदाचित्सएवमलमासउपागत ॰

म.स०
११२
सांतत्रमहोदयःएतानिकाशीस्तुतिमात्रपराणीतिदृष्टः।मात्स्योदर्शीयहरहः।श्राद्धंदानंचप्रतिवासरंगोभूति
लहिरण्यानांमासेपिस्यान्मलिम्लुचेरति।यत्तुसंवत्सरातिरिक्तेगामासोयस्यान्मलिम्लुचः।तस्मिंस्त्वपोद
शीश्राद्धंनकुर्यादिंदुसंक्षयेइतिगोउनिबंधधृतब्रह्मपुराणवचनंतत्कार्तिकादिमासविशेषसंबंधमा
वास्यायांविहितफलविशेषार्थश्राद्धपरंबोध्यं।मदनरत्नेयमः।आब्दिकंप्रथमंयत्स्यात्तत्कुर्वीतमलि
म्लुचे।चतुर्दश्यांतुसंमाप्नेकुर्वीतपुनराब्दिकं।पुनराब्दिकंद्वितीयाद्याब्दिकं।सत्यव्रतोपि।वर्षेवर्षेतु
यच्छ्राद्धंमातापित्रोर्मृते तेहनि।मलमासेनकर्तव्यंव्याघ्रस्यवचनंयथा।यानिमासद्वयेपिकुर्वीतेत्या
दीनिवचनानितानिमासिकविषयाणीतिमदनरत्ने।यत्तुप्रतिमासंमृताहेचश्राद्धंप्रतिवासरं
।मन्वादौचयुगादौचमासयोरुभयोरपीतिसांवत्सरिकश्राद्धस्यमासद्वयकर्तव्यताबोधकवचनंतत्
लदानंत्रैवप्रत्याब्दिकंकार्यंनतुशुद्धमासेनदाहमाधवीयेभृगुः।मलमासमृतानांतुयच्छ्राद्धंप्रतिव
त्सरं।मलमासेतुतत्कार्यंनान्येषांतुकदाचनेति।यत्तुहेमाद्रौव्यासः।मलमासमृतानांतुसौरमानंसमाश्र राम॰
११२

मासत्वेपिशब्दप्रतेःअगतिकत्वादितिभावः।यस्तुक्षयमासगतप्रतिपदितिथौपूर्वोर्द्धमृतःसैवतिथिःक्षयात्पूर्वेः

येनामसएवदिवसस्तस्यश्राद्धपिंडोदकादिषितितंद्वथेतत्तरमेव।कार्तिकेदिक्षयमासेतुकार्तिकमार्गशीर्ष
दिप्रत्याब्दिकंएकदिनएवकार्यं।तदाहमदनरत्नेसत्यव्रतः।एकएवयदामासःसंक्रांतिद्वयसंयुतःमा
सद्वयगतेश्राद्धंमालमासेविशेषतः।रतिमलमासस्थितायात्स्वा।उत्तरार्द्धेचेत्तदाउत्तरमासस्थितायात्स्या
तथाचोक्तंदीपिकायां।तिथ्यर्द्धेप्रथमेपूर्वोद्वितीयेर्द्धेतदुत्तरो।मासावितितुयैर्भिन्नौक्षयमासस्समप
गावितिअथात्रदानमुक्तंहेमाद्रौपद्मे।अधिमासेतुसंप्राप्तेगुडसर्पिर्युतानिचत्रयस्त्रिंशदपूपानिदद्या
त्प्रतिदिनेदिने।अधिमासेतुसंप्राप्तेत्रयस्त्रिंशत्तुदेवताःउद्दिश्यापूपदानेनपृथ्वीदानफलंलभेत्।
त्रयस्त्रिंशदपूपान्नंकांस्यपात्रेनिधायच।सघृतंसहिरण्यंचब्राह्मणायनिवेदयेत्।विष्णुरूपीसह
स्रांशुःसर्वपापप्रणाशनः।अपूपान्नप्रदानेनममपापंव्यपोहतु।नारायणजगद्बीजभास्करप्रतिबिं
पक।व्रतेनानेन पुत्रांश्चसंपदंचाभिवर्द्धय।यस्यहस्तेगदाचक्रेगरुडोयस्यवाहनं।शंखःकरतलेय
स्यसमेविष्णुःप्रसीदतु।कलाकाष्ठादिरूपेणनिमेषघटिकादिना।योवंचयतिभूतानितस्मैकालात्मने

Indira Gandhi National
Centre for the Arts

मस॰ मः कुरुक्षेत्रमयं देशः कालः पर्व द्विजो हरिः पृथ्वीसममिदं दानं गृहाण पुरुषोत्तम। मलानां च विशुद्ध्यर्थं
११३ पापप्रशमनाय च। पुत्रपौत्राभिवृद्ध्यर्थं तव दास्यामि भास्कर। मंत्रेणानेन यो दद्याच्चतुस्त्रिंशदपूपका
न्। मासि मासि तिविपुलां लक्ष्मीं त्रयोत्रादि संपदः इति मलमासनिर्णयः। अथर्तुनिर्णयः। स च षड्विधो मास
द्वयात्मकश्चांद्रः सौरश्च वसंतो ग्रीष्मो वर्षा शरद्धेमंतः शिशिर इति। षड् ऋतव इति श्रुतेः। यत्तु
श्रौतो द्वादश मासाः पंच र्तवस्त्युक्तं तत्र पंचप्रयाजानुरोधेन हेमंतशिशिरयोरेकीकरणं विवक्षि
तं। ते च वसंतादयः क्रमात् मुखं वा एतदृतूनां यद्वसंत इति श्रुतेः मासद्वयात्मकत्वं चाग्निचयने चे
ष्टको पधान ब्राह्मणे दृष्टं मधुश्च माधवश्च वासंतिकावृतू इति। वसंतादृतुक्रमेण चैत्रमासादिद्वंद्वमि
ति। मधुश्च माधवश्च वासंतिकावृतू इति श्रुतेः। ननु कदाचिदधिमाससत्त्वे मासस्य षष्टिदिनात्मक
मासावयवत्वस्य प्रतिपादितत्वात्। अयं चांद्रः सौरोऽप्यृतुर्मलमासाख्या। मेषादिराशिद्वयभानुभोगा रामच॰
त्सद्वर्तवः स्युः शिशिरो वसंतः ग्रीष्मश्च वर्षाश्च शरच्च तद्वद्धेमंतनामा कथितोत्र षष्ठ इति। इत्यृतुनि ११३

२ मासत्रयात्मकः कश्चिदृतुर्भवतीति तत्कथं मासद्वयात्मकत्वमिति चेन्न -अपि ३

र्णयः। अथायनं। तत्र ऋतुत्रयात्मकं सौरमेव तदुक्तं दीपिकायां सौरर्तुत्रितयं प्रदिष्टमयनं चेति। अनुत्त
पं चायनं स्यात् द्विनिमदनरलेविस्सुधर्मोक्तेश्च। तच्च द्विविधमुत्तरं दक्षिणं च। शिशिराद्युत्तरं वर्षादि दक्षि
णं। ननु केरलमालायां शिशिरपूर्वमृतुत्रयमुत्तरं त्वयनमाहुरहश्च तदामरं। भवति दक्षिणमन्यदृतुत्र
यं निगदितारजनीमरुतां च सेति। श्रुतिरपि। तस्मादादित्यः षण्मासान् दक्षिणेनैति षडुत्तरेणेति। अ
नयोरुपभोगमाह माधवीये कश्यपः उदगयन आपूर्यमाणपक्षस्य पुण्याहेषु दशाहमुपवसेद्व
तीभूत्वेत्यादि। सत्यव्रतोऽपि। देवतारामवाप्यादिप्रतिष्ठोदगुत्तरे रवौ। दक्षिणायनगं मुख्यं कुर्वन्नतत्
त्फलमवाप्नुयादिति। वैखानससंहितायां मात्रभैरववाराहनारसिंहत्रिविक्रमाः महिषासुरह
ती च स्थाप्या वै दक्षिणायने इति। मदनरत्ने ज्योतिःशास्त्रे। गृहप्रवेशत्रिदशप्रतिष्ठाविवाहचौ
लव्रतबंधपूर्वं। सौम्यायने कर्म शुभं विधेयं यद्गर्हितं तन्नतु दक्षिणे चेति॥ इत्ययननिर्णयः। अथ
संवत्सरः स च मासवत्त्रैविध्यात्त्रिविधः इति हेमाद्रिः। अनलव्रतसूक्ति दर्शिते॥ चांद्रसावनसौरा णां मासा

मस०
११४

नांतु प्रभेदतः चांद्रसावनसौराः स्युस्त्रयः संवत्सरा ग्रमीति॥ तत्र चांद्रसंवत्सरश्चैत्रशुक्लप्रतिपदादिः फा
ल्गुनदर्शांतः सौरस्तु रवेर्द्वादशराशिभोगेन सावनः षष्ठ्युत्तरशतत्रयाहोरात्रात्मकः आद्य उक्तो ब्रह्म
पुराणे॥ चैत्रे मासि जगद्ब्रह्मा ससर्ज प्रथमेहनि॥ शुक्लपक्षे समग्रं तु तदा सूर्योदये सतीति॥ आर्षि
षेणापि॥ स्मरेत्सर्वत्र कर्मादौ चांद्रसंवत्सरं सदा॥ नान्यं यस्माद्वत्सरादौ प्रवृत्तिस्तस्य कीर्तितेति। इमे चा
रंभसमाप्तौ कर्मांगस्मरणे प्रयुज्यंते नैव तत्तन्मासानयने प्रतिपत्तिरमारभ्य वर्षांतरप्रतिपत्पूर्वं भावि
तिथ्यंतेऽपि वत्सरश्चांद्र एव चंद्रकलाह्रासवृद्धितिथिघटितत्वात्॥ अन्यानपि भेदानाह नारदः प्रभवो विभवः
शुक्लः प्रमोदोऽथ प्रजापतिः अंगिराः श्रीमुखो भावो युवा धाता तथैव च। ईश्वरो बहुधान्यश्च प्रमाथी वि वि ३
क्रमो वृषः। चित्रभानुः सुभानुश्च तारणः पार्थिवो व्ययः सर्वजित्सर्वधारी च विरोधी विकृतः खरो नंद
नो विजयश्चैव जयो मन्मथदुर्मुखौ हेमलंबो विलंबोऽथ विकारी शर्वरी प्लवः शुभकृच्छोभनः क्रो राम०
धी विश्वावसुपराभवौ प्लवंगः कीलकः सौम्यः साधारणविरोधकृत् परिधावी प्रमादी च आनंदो राक्षसो ११४
धी विश्वावसुपराभवौ प्लवंगः कीलकः सौम्यः साधारणविरोधकृत्

नलः पिंगलः कालयुक्तश्च सिद्धार्थी रौद्रदुर्मती। दुंदुभी रुधिरोद्गारी रक्ताक्षी क्रोधनः क्षय इति। एताश्च संज्ञा
श्च यद्यपि ज्योतिः बार्हस्पत्यसंवत्सरोक्तास्तथापि चांद्राणां प्रभवादीनामिति चांद्रस्यैव प्रभवादिनामभिर्व्यव
हारः शिष्टाचारश्च मासपक्षादिवत् प्रभवादिश्चांद्रः संवत्सरोऽपि संकल्पादौ संकीर्त्यः ज्योतिःशास्त्रे तु
बार्हस्पत्यः सनाक्षत्रावपि वत्सरावुक्तौ तत्र बृहस्पतेर्मध्यमानेनैकराशिभोगो बार्हस्पत्यः सप्तविंशतिन
क्षत्रपरिवर्तस्त्वेको मासः तैर्द्वादशभिर्वत्सरः अनयोस्तु धर्मशास्त्रेनक्वोपयोगः॥ ॥ इति संवत्स
रनिर्णयः॥ ॥ अथ जन्मतिथिकृत्यं। तन्मलमासे न कर्तव्यं। चांद्रमसीयत्वेनमावकाशत्वात्। ब्रह्म
पुराणे। स्वे स्वे च जन्मदिवसे स्नाते मंगलपाणिभिः गुरुदेवाग्निविप्राश्च पूजनीयाः प्रयत्नतः सुनक्ष
त्रं च पितरस्तथा देवप्रजापतिः प्रतिसंवत्सरं चैव कर्तव्यश्च महोत्सवः स्नाने तिलस्नानैः तथा च
तत्तिथिमधिकृत्य तिलस्नायी तिली दद्यात्तिलहोमी तिलप्रदः तिलभुक् किल वापी वर्षवृद्धिमवाप्नोति
इतीति। मंगलपाणिभिः अभिप्रेतार्थसिद्धिहेतुतया गोरोचनादिकं मंगलं गुग्गुलुं निंबसिद्धार्थपूर्वं

Indira Gandhi National Centre for the Arts

म॰ ११५

गोरोचनायुतं सेपूज्यभानुविप्रेभ्यो महर्षिं प्रार्थयेदिदं। चिरजीवी यथा त्वं भो भविष्या मित्तथा मुने। रूपवा
न्वित्तवांश्चैव श्रियायुक्तश्च सर्वदा। मार्कंडेय महाभाग सप्तकल्पांतजीविन। आयुरिष्टार्थसिद्ध्यर्थं अस्मा
कं वरदो भव। पुनस्तत्रं जन्मकालीनं नाम कालोन यादर्शनात्। तथा श्रीयति रत्नमालायां। नववस्त्र
धरो भूत्वा पूजयेच्च चिरायुषं। द्विभुजं जटि लं सौम्यं सुवृद्धं चिरजीविनं। मार्कंडेयं नरो भक्त्या पूजयेत्स
पतस्तथा। ततो दीर्घायुषं व्यासं रामं द्रौणिं कृपं बलिं। प्रल्हादं च हनूमंतं विभीषणमथार्चयेत्। षष्ठीं
च दधि भक्तेन वर्षे वर्षे पुनः पुनः रामः परशुरामः द्रौणिरश्वत्थामा ततस्तिलहोमः पूजितदेवतानाममं
५ ति त्रैः स्वाहांतैः कार्यं देवीपुराणे होमोग्रहादिपूजा यां शनम ... षोत्तरं भवेत्। अष्टाविंशतिरष्टौ वा
यथाशक्ति विधीयते। ततो गुडदुग्धतिलपानं तत्र मंत्रः सतिलं गुडसंमिश्रं मंजल्य द्धमितं पयः मार्कं
डेयवरं लब्ध्वा पिबाम्यायुष्यहेतवे इति स्कांदे। खंडनं नखकेशानां मैथुनाध्वानमेव च। आमिषं कल
हं हिंसां वर्षवृद्धौ विवर्जयेत्। कलहमित्यत्र संगरमिति क्वचित्पाठः वृद्धमनुः स्वजन्मनि संक्रांतौ श्रा रा॰म॰ ११५

द्धे जन्मदिने तथा। अस्पृश्यस्पर्शने चैव न स्नायादुष्णवारिणा ज्योतिषे। स्नायाज्जन्मदिने त्रिपंचयरिहरन्
२ परं स भीष्टं मत्स्यान्नो च यतो द्विजाय दत्तोयर्थं श्चिरं वर्धते। सद्भूतला इतिपश्चात्सप्तरिपवो नाशं प्रयांति ध्रुवं भु
३ स क्ते यश्च निरामिषं हि भवे ज्जन्मांतरे पंडितः। जन्मतिथेः खंडत्वे तु देवीपुराणे। घस्त्रद्वये जन्मतिथिर्यदास्या
४ सं त्पूज्या तदा जन्मभसंयुताच। अस्तु ताभेन दिनद्वये पि पूज्या परा याभतीहनं त्रं उभयदिने जन्मनक्षत्रा
५ पि लाभे तु पूर्वा ह्रव्यानी ग्रहर्लनस्य कर्मकालत्वात्॥ अथ केषुचित्सदार्थेषु वर्ज्यतिथयः सिंहादिसे भाद्रपद्रे
चतुर्थ्यां चंद्रदर्शनं। मिथ्याभिदूषितं कुर्यात्तस्मात्पश्येन्न तं सदेति। सप्तम्यांन स्पृशेत्तैलं नीलं वस्त्रं न धारये रो ६
न्न चाप्यामलकैः स्नायान्न कुर्यात्कलहं नरः इतिवसभक्षरां ते लंतिलैः स्नर्या गमं जनं। सप्तम्यां नैव कु
र्वीत ताम्रपात्रे न्नभोजनं। स्कांदे शिरः कपालमं त्राणि नखचर्मतिलानि च। अपीतानि क्रमशो निम्य म
ष्टम्यादिषु वर्जयेदिति। शिरो नारिकेलं कपालमलाबु अंत्रं आलिपटोलं। न खं निष्पावः चर्म म
सूरिका तिलाः हंताकमिति हेमाद्रौ। चतुर्विंशतिमतेतु पक्षे भोटूर्ध्वगमनमष्टम्यादिषु वर्जयेदि

मस० तु नरा द्वैयठंति। व्यासः षष्ठ्यष्टमी अमावास्या पक्षद्वय चतुर्दशी। अत्र संनिहितं पापं तैलेमांसे क्षुरे भगे रतिंगा
११६ ग्रे त्रयोदश्यां तृतीयायां प्रतिप द्दशमी द्वये। तैलाभ्यंगं न कुर्वीत स्पृशे द्धान वमीं विनामो हात्प्रतिप द्दंष कौं
कुहू रिक्तातिथिं तथा तैलेनाभ्यंजये घस्त्र चतुर्भिः यरिहीयते व्यास० आदित्यादिषु वारेषु तापः कीर्तिर्म
तिर्धनं दारिद्र्यं दुर्भगत्वं च कामासिः स्नानतः क्रमात्। अत्र प्रतिप्रसवमाह प्रचेताः सार्षपं गंधतैलं च य
त्तैलं पुष्पवासितं। अन्यद्रव्ययुतं तैलं न दुष्यति कदाचन निषिद्ध तिथिष्वपि शुभवारयोगे तैलस्नानं कार्यं।
तिथ्य पेक्षया वारस्य प्राबल्यात् तदुक्तं ब्रह्मसिद्धांते। तिथिरेकगुणा प्रोक्ता नक्षत्रं च चतुर्गुणा। कर
णांच द्गुणं चैव वारः शतगुणः स्मृत इति वामन पुराणो नंदासु नाभ्यंगम् याचरे तक्षौरं च रिक्तासु ज
यासु मांसं। पूर्णासु योषित्परिवर्जनीया भद्रासु सर्वाणि समारभेत इति। क्षौरं सा यं च दर्शं च द्वादश्यां श्रा रामष्ठ
द्धवासरे वस्त्रं निष्पीड्यते नैव क्षुरेणापि न हिंस्यते। वस्त्रं निष्पीडनं तर्पणांते तत्स्नाये निषेधः सस्व तैलं ११६
१२ नंस्पृशेदामं वृक्षादीन छेदयेत्त चापक्षादौ चरवोषण्यां रिक्तायां च हरेत्तिथौ आमं नीलतरुणां वामन

पुराणो। नाभ्यंगमर्केन च भूमिपुत्रे क्षौरं च शुक्रे च कुजे च मांसं। बुधे च योषां न समाचरेत शेषेषु सर्वाणि स
दैव कुर्यात्। चित्रासु हस्ते श्रवणे च तैलं क्षौरं विशाखाप्रतिपत्सु वर्ज्यं मूले मृगे भाद्रपदासु मांसं योषिन्म
घा कृत्तिका सोत्तरासु रतिं हारिनः तैलं मांसं भगं क्षौरं पर्वकालेषु वर्जयेत्। अश्वत्थमाग से सेवो न ल्मस्ट
धो कदाचन अश्वत्थं मंदवारे तु समुद्रं पर्वणि स्पृशेत्। वाराहे। चतुर्दश्यां तथाष्टम्यां पंचदश्यां च पर्व
सु तैलाभ्यंगं तथा भोगं योषितश्च विवर्जयेत्। न मत्स्य गोमयं चापि न निशायां तु गोमयं। गोमूत्रं च
भग्न हीयादुद्धिमान्नरः। संध्याव ज्यांसा ह मनुः चत्वारीमानि कर्माणि संध्यायां परिवर्जयेत् आहार
१२ ज्ञायते व्याधिर्गर्भ द्राचश्च मैथुनात् निद्रातो जायते लक्ष्मीः स्वाध्याया दायुषः क्षय इति॥ इति कालवि
शेष वर्ज्यानि॥ अथ क्षौरे निषेध कालः पंचदश्यां चतुर्दश्यां अष्टम्यां च विशारदा तैलं मांसं व्यवायं च हु
रं च परिवर्जयेदिति पमः तथा सिनास्व षमो षु भूता हे दुष्यये तथा तैलाभ्यं क्षौर कर्म स्त्री संगं च विवर्ज
येत्। व्यासः क्षौरे शनैश्चरादित्य भौमा होरात्र मेव च तथा प्रतिपदं रिक्तां तिथिं च परिवर्जयेत्। अ

Indira Gandhi National
Centre for the Arts

मम॰ हे रात्र्ययहरां नवारदोषांश्च भवंतिरात्राविति च नवाधार्थं हेमाद्रौ ज्योतिःशास्त्रे। नाभ्यक्तमुक्तरणः का
११७ ल निरामनानीनस्नानमुपंगमनांभुक्तमुपितानां। संध्यानिशार्के कुजसौरदिनेष्वहरणा सौरं हितंभ
वति चाह्नि तथापि विष्यांश्च हि। तिथ्यहोरात्रोपलक्षणं। मार्कंडेयः अष्टमी च तथा षष्ठी नवमी च चतुर्द
शी। क्षुरकर्मणि वर्ज्या च पर्वसंधिस्तथैव च। षट्त्रिंशन्मते कुंभे कर्कटके चैव कन्यायां क्षुरकेरवो
। रोमखंडं गृहस्थस्य पितृन् प्राशयते पसः वृद्धगार्ग्यः मीने धनुषि सिंहे च स्थिते सप्ततुरंगमे। सौरमत्र
न कर्तव्यं विवाहं गृहकर्म चेति। श्मश्रुकर्मणि मरीचिः निरामनस्य सुस्तस्य तिष्ठतश्च तथैव च। स्नापंभु
क्तवतश्चैव स्नातस्य हृषितस्य च। यात्रापुरस्थो घतस्य। पिश्मश्रु कर्म विवर्जयेत्। अथ मांसनिषिद्धकालः
हेमाद्रौ नंदिपुराणे। यदि नाम चतुर्दश्यां सदा मांसं विवर्जयेत्। । वर्जयेद्दयने मुख्ये हुतस्त
गमति निरः चतुर्थी चाष्टमी चैव द्वादशी च चतुर्दशी। तथा पंचदशी वापी षोडशीति मुख्यानि चासंक्र रामः
मे चापि सूर्यस्य विषुवे चापि वार्षिके। मांसानुविरतो मर्त्यो यातिस्वर्गं दिनत्रयमिति। संक्रमाद्दयनवि ११७

षुवतोर्ग्रहणं दोषातिशयार्थं वार्षिके वर्षा कालसंबंधि मासचतुष्टये दिनत्रयमपि वार्षिके दिरतरति
संबंधः अथ वाश्वयुजं मांसं वर्जयेन्मांसभक्षणं बहुमासकृतं पुण्यं प्राप्नोति लभेनाश्वयुजान्तरः अन्यत्र मा
सत्रयपर्यंतं मांसत्यागी यत्फलं तत्प्राप्नोतीत्यर्थः योनरः कार्तिके मासे मांसं तु परिवर्जयेत् संवत्सरस्य
तपस्तेषु रणं मासविवर्जनादितिः अथ कलिवर्ज्यानि। आदित्यपुराणे। यत्तु कालेयुगे धर्मो न कर्तव्यः
कलौ युगे। पापप्रयुक्त्याश्च सदा कलौ नार्यो नराः स्मृताः। कालेयुगः कृतयुगासंबंधी। हेमाद्रौ माध
वीये। विधवायां प्रजोत्पत्तौ देवरस्य नियोजनं। बालिकाक्षतयोन्याश्च वरेणान्येन संस्कृतिः विधवायांवा
ग्दत्तानानंतरं देवरस्य नियोजनं। यस्या म्रियेत कन्याया वाचा सत्ये कृते पतिः तामनेन विधाने न निजो
विंदेत देवरः। अपुत्रां गुर्वनुज्ञातो देवरः पुत्रकाम्यया। सपिंडो वा सगोत्रो वा घृताभ्यक्त ऋतावियादिति
मनुयाज्ञवल्क्याभ्यामुक्तं निषिध्यते। नतु विवाहानंतरं विधवायां। नान्यस्मिन्विधवा नारी नियोक्तव्या
द्विजातिभिरितिमनुनातन्निषेधात्। वरेणान्येन संस्कृतिरितिभिन्न देवर नियोजनपरं। पूर्वेणायोनह्यात्

Indira Gandhi National
Centre for the Arts

मस०
११८

।बालिका संकल्पदत्तान वाग्दानात् दानीक्षतयोनित्वशंकाया अभावात् इदं च विज्ञानेश्वरेणादत्ता
मपि हरेत्पूर्वां श्रेयांश्चेद्वर आव्रजेदित्यनेन सप्तपद्युक्तमरणात्प्राग्दत्तस्यैव दानमुक्तं नद्विषयमिति
ध्येयं। तथा कन्यानामसवर्णानां विवाहश्च द्विजातिष्विति तोवर्णानुपूर्वेण हे तथोक्ता यथाक
मं। ब्राह्मणस्य क्षत्रियविशां भार्याः स्वाश्च शूद्रजन्मन इति विहितः तथा आततायिद्विजाग्र्याणां धर्मयुद्धेन हिं
सनमिति द्विजाग्र्याणां विप्राणां। आततायिनमायांतं हन्यादेवाविचारयन् इति विहितं सन्मुखमकृ
त्वा ब्राह्मणमारणं। एतेन नाततायिवधे दोषो सत्रगो ब्रह्मणो भवेदसिमुमंतु वा कलिविषयमेवेति
सिद्धं। तथा हि तस्या ब्रोतुनो पानुः शोधितस्यापि संग्रहः सत्रदीक्षा च सर्वेषां कमंडलुविधारणमपि
ति। सत्रदीक्षानिषेधमुखेन सत्राधिकार एव विप्राणां पर्युदस्यते अथ कमंडलुचर्यामुपदिशंती
स्यादि बोधायनेतिकर्तव्यताकं सोदकं च कमंडलुमिति स्नातकस्य विहितं मन्यस्य स काष्ठकमंड रा०म०
लोर्धारणं। अत्रे तु कमंडलुधारणमित्यनेन वानप्रस्थाश्रम एव लभ्यत इति आहुः तत्र। वृहन्नार ११८

दीये उभयोरपि भिन्नत्वेनोपादानात्। तथा महाप्रस्थानगमनं गोसंज्ञप्तिश्च गोसवे इति। महाप्रस्थानगा
मनं उत्तरदिग्गमनं। गोसवो यज्ञविशेषः तथा सौत्रामण्यामपि सुराग्रहस्य च संग्रह इति। अग्निहोत्र
हवण्याश्च लेहो लीढापरिग्रहः लेहः जिह्वयास्वादनं। कथंचित् स्त्रीदुष्टायाः परिग्रहः पुनर्होमसाधनत्वेन तथा
वानप्रस्थाश्रमस्यापि [illegible] प्रवेशो विधिबोधितः इत्युक्तस्वाध्यायसापेक्षमघसंकोचनं तथेति। वृत्तमग्नि
यतिचर्यादि वेदाग्नियुक्तविप्रस्य त्र्यहमाशौचमिष्यत इति देवलवचनविहितं। तथा प्रायश्चित्तविधाने
हि विप्राणां मरणांतिकमिति। कामकृते महापापादौ तन्नस्या निष्कृतिर्दृष्टा भृग्वग्निपतनादृते इति
विहितस्य विधानं। उपदेशः एवं च मतिपूर्वमेतन्निर्देश्यं [illegible] प्राणांतिकमिति स्थितेरिति मनुवाक्यम्
येन द्युगविषयमेव। एकमूलकृत्स्नालाघवात्। संसर्गदोषस्तेयान्यमहापातकनिवृत्तिरिति। त्यजे
देशं कृतयुगे त्रेतायां ग्राममुत्सृजेत्। द्वापरे कुलमेकं तु कर्तारं तु कलौ युगे इति पराशरवचनेन
संलापादिनवविधसंसर्गाभावेपि विहितस्य देशादित्यागस्य निषेधः परः। कृते संभाष्य पतति त्रेता ति४

Indira Gandhi National Centre for the Arts

प्रप्र० ११९

यांस्पर्शेनेनतु। द्वापरे त्वन्नमादाय कलौ कर्तैव लिप्यत इति वचनेन शास्त्रस्य संभाषणस्पर्शनादिजन्यपा
तित्यस्यैव निषेधः ननु पतितेन सह संवत्सरेण नवविधसंसर्गोत्थपातित्यस्य। पूर्वोक्तवचनद्वयबा
धमात्रेणाचरितार्थस्य नवविधसंसर्गनिषेधप्रतिपादकानेकवाक्यबाधस्यान्याय्यत्वात्। कलौ पत
तिकर्मणो निवासस्वारस्येन पतितसंसर्गरूपकर्मजन्यस्य पातित्यस्य दुर्निवारत्वाच्च अत्रेनश्चेदोनी
तनानां संसर्गप्रायश्चित्तानुष्ठानाचारः स्वाचार एव। लेपान्यमहापातकेषु निष्कृतिः रहस्यप्राय
श्चित्तं निषिध्यते। आत्रके वित्तलेपान्यमहापातके प्रायश्चित्तमेव कलौ न भवतीत्याकृतम्। पराश
रस्मृतौ महापातकिनामपि त्यैकं प्रायश्चित्तविधानात् कृते तु मानवा धर्मास्त्रेतायां गौतमाः
स्मृताः द्वापरे शांखलिखिताः कलौ पाराशराः स्मृता इत्यनेन श्रुतिस्मृतिविरोधे विकल्पप्रसक्तौ स्म
त्यंतरीयविशेषशास्त्रेण च बाधप्रसक्तौ पराशरस्मृतेः कलौ बलीयस्त्वनियमेन लेपान्यत्वस्याबा
धात्। न च बाधे विषयानरासंभवादप्रामाण्यापत्तिः औडुंबरीं स्पृष्ट्वोद्गायेदिति श्रुत्याबाधितायां औ ११९

डुंबरी सर्वा वेष्टयितव्येति स्मृतेर्द्दित्राणं पंगुलानि मुक्त्वा सर्वावेष्टयितव्येति न्यायसुधाकृतोक्तत्वात्। एवं कल
न वदिहापि लेपान्यमहापातकनिष्कृतिर्नोपदेशः। कृतायामपि निष्कृतौ संसर्गो न कार्य इति तात्प
र्यकल्पनात्। वस्तुतस्तु मनुवाक्ये नोपदेशनिषेधस्य सिद्धत्वाद्ग्रहणभोजनादिविधिविरोधाच्च रह
स्यप्रायश्चित्तं निष्कृतिर्न भवतीति कल्प्यं। अत एव तत्र रहस्यप्रायश्चित्तं निंदितं। तस्मात्प्रकाशायेत्या
यमित्यादि चोक्तं। नचैवं लेपपर्युदासो संगतः तस्य कलावन्यायासेन लेपनिष्पत्त्या प्रतिनिमित्तमु
पदेशासंभवे रहस्यप्रायश्चित्ताभ्यनुज्ञानार्थत्वात्। तथा वरातिथिपितृभ्यश्च पशूपाकरणक्रि
येति वरस्याजापत्यो तिथेराज्ञावेश्यान इति याज्ञविधिः वार्धीणस्य मांसेनानंत्यं द्वादशवा
र्षिकीत्यादि वचनकदंबकेन त्रिष्वपि प्राप्तिः अत्र श्राद्धे पशूपाकरणाभावेन तद्धर्मानतिदेशादुपा
करणप्राप्तौ पशूपाकरणेश इत्यसितं तत्र कृतिकं पितृभ्यो मांसदानं निषिद्धं तो तथा च। श्राद्धे
मांसमित्यनेनैकमूलत्वात्कल्पनागौरवं। तथा द्विजोरसोन्येषां तु पुत्रत्वेन परिग्रहः सवर्णान्यां गत्वा

Indira Gandhi National Centre for the Arts

आ१

मस० दुष्टैः संसर्गः शुद्धिविनैरपि सवर्णान्यासवर्णपात्रं गत्वा स्वाभिर्दुष्टैः स्तेनैर्यज्ञैः कृतप्रायश्चित्तैरपि
१२० संसर्गः इदं चोत्तमवर्णविषयमेवेति उक्तमुक्तमस्माभिः तथा। अपोनो संग्रहे वृत्तेयरित्यागो गुरुत्वि
याः इति। चन्नत्वलु परित्याज्याः शिष्यगणगुरुगणचया। पति श्रीचविशी घेराज्जुमितोपगताच ये स्यादि सं४
नाविहितः अनेन पुराणांतरे अयोनौ संसर्गो परित्यागः इति। मनेतथापरो देशान्मे त्यागात् उच्छिष्टस्यो
पवर्जनं। गवार्थे ब्राह्मणार्थे वासघः प्राणान्परित्यजेदिति विहितः स्वमुच्छिष्टमुच्छिष्टोपहते
चेत्रिवसिष्ठाद्युक्तं न त्रिमिनं प्रायश्चित्तं चेतिकेचित्। विश्वाराणां वितरणं स्पर्शनं प्रतियादृतं। प्रादे
शानं निर्वपणमपवर्जनमंहतिरिति त्रिदंडिस्मरणा दपवर्जने दानं। ब्राह्मणापोदगुच्छिष्टमपप्ये हित्वा
दिमधुपर्कादि विहितमिति प्रातश्चरणाः प्रतिमाभ्यर्चना थोपसंकल्पश्च सधर्मकः इयमेवप्र
२तृ तिमापावर्जीवंमयोपूजनीयेत्यादिकः आहिसंचपना हूर्ध्वमगास्पर्शनमेवच। शान्तित्रं चे रा.प्र.४
वविमारणं सोमविक्रयाणां तथा शान्तिमंत्रं प्रत्येषपमेवयभुमान्रणोषु रुक्मानश नेमान्नह १२०

रणां हीनकर्मणांः चतुर्णामनशनं उपवासत्रयं तु मुख्यितस्य हंस्थित्वा धान्यम ब्राह्मणाद्दूरे तु इति विहितं। प्रदेषुद
समोयालकुलमित्रौ दुःसीरिणां। भोज्यान्नता गृहस्थस्य तीर्थयात्रातिदूरतः गृहस्थस्याहिताग्नेरिति केचि
त्। तथा शिष्यस्य गुरुदारेषु गुरुवद्वृत्तिरीरिता। गुरुवत्प्रतिपूज्याश्च सवर्णा गुरुयोषित इति मनूक्तान
।तथा। आपद्वृत्तिर्द्विजाग्र्याणामश्वस्तनिकता तथा स्याच्चेणकर्मणाजीवेद्विशां वाप्यापदि द्विजः इति आहि
कोश्वस्तनोपि वेति उक्तं। तथा प्रजार्थं तु द्विजाग्र्याणां जातारणिपरिग्रहः ब्राह्मणानां प्रवासित्वं मुखाग्नि
धमनक्रिया। प्रवासशीलत्वं। वृथा तु न चिरं वसेदिति स्मरणादिति केचित्। तथा। बलात्कारादि दुष्टस्त्रीसंग्र
हो विधिचोदितः यतेश्च सर्ववर्णेषु भिक्षाचर्याविधानतः नवोदके दशाहं च दक्षिणाविधिचोदितेति। द
१ वि शरात्रेणाशुद्धांतिभूमिबंधनवोदकमिति विहितं। गुरवे तु वरं दत्वा स्नायीत तदनुज्ञयेति विहितं दक्षिणाभ्यां
तथा ब्राह्मणादिषु अदृष्टसपचनादिक्रियापि वाच्याया धि छिन्ना अप्रदुष्टः संस्कर्तारः स्युरित्यो पत्ते च विहि
ताः तथा। भृगवग्निपतनैश्चैव वृद्धादिमरणं तथा। अत्र मूलं वृद्धः शौचस्मृतेर्भुवः प्रमाप्यात पि

Indira Gandhi National
Centre for the Arts

मसं वक्रियः स्मृत्यादिविज्ञानेष्वस्वं यादृष्ट्याः। गोत्वस्ति शिष्टैर्यथा सिशिष्टैराचमनक्रिया पितापुत्रविरोधे
१२१ च साक्षिणां दंडकल्पनं। साक्षिणां समाधानं ग्रां च। पितापुत्रविरोधे तु साक्षिणां द्विगुणो दमः अंत
रे च तयोर्यः स्यात्तस्यापि च गुणो दमः इति विहितं। यत्र सायंगृहत्वं च मुनिभिस्तत्त्वदर्शिभिः यत्र सायंकालो
जातस्तत्रैव स्थायित्वमवस्थानं। एतानि लोकगुप्त्यर्थं कलेरादौ महात्मभिः निवर्तितानि कर्माणि
व्यवस्थापूर्वकं बुधैः समयश्चापि साधूनां प्रमाणं वेदवद्भवेत्। ब्रह्मपुराणे। दीर्घकालं ब्रह्मचर्यं धा
रणं च कमंडलोः ॥ गोत्रान्मातृसपिंडाच्च विवाहो गोवधस्तथा। नराश्वमेधौ मद्यं च कलौ वर्ज्यं द्वि
जातिभिः दीर्घकालमिति कालपदोपादानबलादष्टाचत्वारिंशद्वर्षाणि वेदब्रह्मचर्यमिति श्रुत्युक्तं
। अन्यथा द्वादशवर्षं ब्रह्मचर्यमित्येवावसेत्। एतेन ब्रह्मव्रतं नैष्ठिकमिति रामचंद्राचार्योक्तिः परास्ता। अ
त एव द्विजानां नैष्ठिकब्रह्मचर्याचारः संगच्छते। कमंडलुधारणं व्याख्यातं। गोत्रान्तरत्वेन स्वगो रामः ४
त्रोत्पन्नायाः पितृष्वसुः मातृसपिंडादित्यनेन मातुलगोत्रसापिंड्ययोः सामान्यनिषेधेनैव प्राप्तभावान्मा १२१

तुलकन्यापरिणयनं च निषिध्यते। तेन मातुलकन्यापरिणयननिषेधकानि वाक्यानि कलिविषयाण्येव वा।
अत एव वाधुनिकानां न दाचारेण नाचार एवा। कृष्णार्जुनादीनां तु युगान्तरीयत्वात्तदाचार एवा। अत एव
व्यासेन कलिनिंदाप्रक्रमे। इतीयां मातरतः कन्यांतरीयां पितरतस्तथा। श्रुत्वैन चोद्दिष्यति विमाः यापवि
मोहितारस्वजं वोक्षापनेन मातुलपितृष्वसृदुहितृगमनमिति दाक्षिणात्यानाचारेषु गणितं। गोवधो म
धुपर्कोसौ नरमेधः ब्राह्मणो ब्राह्मणमालभेत इत्यादि। मद्यं गौडीमाध्व्यादिरूपं क्षत्रियवैश्ययोर्निषि
अतेन ब्राह्मणस्यानित्यं मद्यं ब्राह्मणो वर्जयेदिति न निषेधस्यासिद्धत्वात्। न पेष्याः सुरा वै मलमन्नानां
याप्मा च मलमुच्यते। तस्माद्ब्राह्मणराजन्यौ वैश्यश्च न सुरां पिबेदित्यनेन सुरापा द्विजात्यवरछेदे
न निषेधस्यासिद्धत्वात्। यद्वा वाममार्गादौ त्रैवर्णिकपुरस्कारेण विनापकर्षणात्यादौ क्षत्रियादिपर
स्कारेणोक्तं च निषिध्यते। ऋतुः देवरात्सुतोत्पत्तिर्दत्ता कन्या न दीयते। न यज्ञे गोवधः कार्यः क
लौ न च कमंडलुः विधवायां प्रजोत्पत्तावित्यनेन समानार्थकं पूर्वार्द्धं। आदित्यपुराणे। ऊढायाः पुन

Indira Gandhi National
Centre for the Arts

म.स.० १२२

सह्याहं ज्येष्ठांशं गोवधं तथा। कलौ पंच न कुर्वीत भ्रातृभार्यां कमंडलुं। ज्येष्ठांशं विषमविभागं भ्रातृजायां जाया
मिति शेषः दानं हेमाद्रौ ब्राह्मे अश्वदानं मकरगोमधुपरासौ। न कलौ क्रियते तत्राश्वमेधो वाप्यथ गोसवः नरमेधो
सता नारीदेवरात्सुतसंततिः गार्हितं समकं स्वेन द्विजस्य कमंडलुः। आह्नदीपकलिकायां मदनपारिजाते
[..]नगमः अस्तागोपशुश्चैव श्राद्धे मांसं तथा मधु देवराच्च सुतोत्पत्तिः कलौ पंच विवर्जयेत्। यथा वेदिव
हिर्धर्मो शां प्रधानसंबंधिमात्रांशे विधिनेत्युनादर्थ्यांशे प्रमाणाभावाज्ज इति। श्राद्धे मांसमित्यत्र श्राद्धसं
बंधि क्रत्वर्थपुरुषार्थं च निषिध्यते। अविशेषात्। पंचेत्यत्र न परिसंख्या। दोषत्रयापत्तेः। पूर्वो
क्तानेकवाक्यानर्थक्यापत्तेश्च। अतः प्रदर्शनमात्रार्थं। एतद्वाक्योपात्तत्वोपाधिना च पंचत्वोपपत्तिः
आदित्यपुराणे। शपथाः शकुनाः प्रश्नाः सामुद्रिकमुपश्रुतिः उपयाचितमेतानि संभवंति क्वचित्कलौ
। तस्मात्तन्मात्रलाभेन कलौ कार्यं न कारयेत्। विश्वेश्वरपद्धतौ व्यासः चत्वार्यब्दसहस्राणि चत्वार्यब्दशतानि राम४
च कलेर्यदा गमिष्यंति तदा त्रेतापरिग्रहः संन्यासश्च न कर्तव्यो ब्राह्मणेन विजानतेति। अत्र त्रेतापरिग्र १२२

---

हाइति वदता सर्वाधानमेव निषिध्यते अतएव लौगाक्षिः अर्धाधानं स्मृतं
श्रौतस्मार्ताग्न्योस्तु पृथक्कृतिः सर्वाधानं तयोरैक्यकृतिः पूर्वयुगाश्रितेति यु
गस्य पूर्वं पूर्वयुगं कलेः पूर्वभाग इत्यर्थः अर्धाधानमपि यावद्वर्णविदविभागका
र्यं तदाह देवलः यावद्वर्णविभागोस्ति यावद्वेदः प्रवर्तते संन्यासं चाग्निहोत्रं च
तावत्कार्यं कलौ युगे इति यद्यपि संन्यासस्य चतुश्चत्वारिंशत् शताद्वावधिक
त्वं व्यासेनोक्तं तथापि गौणकालोनेन समर्थ इति केचित् त्रिदंडैकदंडाभिप्रा
येण व्यवस्थेत्यपरे सामान्यतो निषिद्धस्य व्यासवाक्येनोपसंहारः इत्यन्ये

Indira Gandhi National
Centre for the Arts

~~स्मलस्त~~ चत्वार्यपीत्यादीनि वचनानि महानिबंधेषु न दृश्यंते इतिकलिवर्ज

१२३ निर्णयः इतिश्रीमीमांसकशंकरभट्टात्मजनीलकंठकृते विद्वद्भास्करे समय

मूखः समाप्तः श्रीईश्वरार्पणं

१२३

Indira Gandhi National
Centre for the Arts



पत्रे
१२७

Indira Gandhi National
Centre for the Arts